

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

षष्ठवर्षे प्रथमोऽङ्कः

१५ जनवरी १९८४

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः



प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

विषय-सूची

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20.00 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन' देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-'अर्वाचीनसंस्कृतम्' (६/१)। प्रधान सम्पादक.— डा० रमाकान्तशुक्लः। प्रकाशनतिथिः १५-१.१९८४।

सम्पादकीयम्

सर्वेभ्यः पाठकेभ्यो नूतनवर्षाभिनन्दम् ! अनेनाङ्केन 'अर्वाचीनसंस्कृतम्' षष्ठं वर्षं प्रविशति । अस्मिन् काव्यमयेऽङ्के श्रीसुन्दरराज-डा० कृष्णकान्तशुक्ल-डा० उमाकान्त शुक्ल-रमाकान्तशुक्लानां रचनाः, देववाणी-परिषद्वार्ता पुस्तक-परिचयश्च प्रकाश्यन्ते ।

तञ्जावूरजनपदान्तर्गतदेवनाथविलासग्रामे १२-९-१९३६ ई० तारिकायां श्रीमहाकविसार्वभौमविल्लूरनडादूर - श्रीनरसिंहराघवाचार्यस्वामिनः (जनकात्) श्रीमत्यां वञ्जुलवल्ल्यां (जनन्यां) समुत्पन्नेन, 'जगन्नाथसुप्रभातम्', इत्याद्यनेक-काव्यप्रणेत्रा, रसायनशास्त्रे [एम० एससी०-उपाधिधारिणा, आ०इ०ए०एस०-पदाधिकारित्वेन भारतसर्वकारस्य योजनायोगे संयुक्तसचिवपदमधितिष्ठता, सुरभारतीसपर्यापरेण, लब्धसारस्वतप्रसादेन श्रीसुन्दरराजमहाभागेन १९८३ तमेशवीयेऽब्दे रचितं 'श्रीबदरीशतरङ्गिणी' इति 'सुरश्मिकाश्मीरम्' इति च काव्यद्वयं भारतस्य प्राकृतिकं सांस्कृतिकं च गौरवं सरसतया समुन्मीलयति ।

श्रीबदरीशतरङ्गिण्यां कविवरेण श्रीसुन्दरराजमहाभागेन स्वयं साक्षात्कृतस्य श्रीबदरीशक्षेत्रस्य काव्यमयं वर्णनमुपन्यस्तम् । अनुष्टुभ्-उपेन्द्रवज्रा-उपजाति-शिखरिणी-वसन्ततिलका-शार्दूलविक्रीडित-स्रग्धरा-स्वागता -द्रुतविलम्बित-मालिनी-वियोगिनीवृत्तेषु श्रीबदरीनाथ-केदारनाथ-क्षेत्रस्थितानां नदीनां, मन्दिराणां पुराणप्रसिद्धानां स्थानानां च तेन मनोरमं वर्णनं विहितम् । एतद्वर्णनं भौगोलिकदृशा पूर्णमुपयुक्तं वर्तते । मनोग्राम (माना)-तप्तकुण्ड-अलकनन्दा-उर्वशीपीठ हनुमानचट्टी-हरद्वार-ऋषीकेश-देवप्रयाग-रुद्रप्रयाग -मन्दाकिन्यलकनन्दासंगम-अगस्त्यकुटी-ऊखीमठ-गौरीकुण्ड - त्रियुगीनारायण- नारद-कुण्ड-केदारधाम-नरनारायणकुबेरपर्वत-कर्णप्रयाग-नन्दप्रयाग-नन्दाकिनी-विरही-गङ्गा-गरुडगङ्गा-पातालगङ्गा-लक्ष्मणगङ्गा -ज्योतिर्मठ (जोशीमठ)-नृसिंह - मन्दिर-दण्डधारा-वासुदेवमन्दिर-केदारनाथ-विष्णुप्रयाग - धवलीगङ्गा -पाण्डु - केश्वर-घण्टाकर्ण-नीलकण्ठ - पञ्चबदर्यादीनां वर्णने कविरयं क्वचिदपि भूगोलविरुद्धतां न श्रयते । तत्तत्स्थानसम्बधिनीनामनुश्रुतीनामपि सः सङ्केतं विदधाति । एतदर्थं २७, ३१, ३२, ३३, ३५, ३७, ३८, ४०, ४१,

४४, ४७, ५५, ५७, ५८, ६५, ६८ प्रभृतीनि पद्यान्यवलोकनीयानि सन्ति। श्लेष (प० ४६, १११)-निरुक्ति (१७)-उत्प्रेक्षा (२०, २५, २८, ४६)-यमक (११०, ११२)-प्रभृत्यलङ्काराणां प्रयोगः कवेरलङ्कारसिद्धिं द्योतयति। अस्मिन् काव्ये यात्रावृत्तान्तस्य शतककाव्यस्य, स्तोत्रकाव्यस्य च सङ्गमश्चकास्ति येनेदं पर्यटकानां, रसिकानां भक्तानाञ्च कृते समानरूपेण उपयोगित्वं प्रियत्वञ्च बिभर्ति। कविर्भणति—

'जिगमिषन् बदरीं शतरङ्गिणीं श्रयति यो बदरीशतरङ्गिणीम्।
पठति वा बदरीशतरङ्गिणीं स लभते बदरीं शतरङ्गिणीम्॥" (२०)

बदरीशदर्शनावसरे स्फुरितः कवेर्भक्तिभावः (७६-१०८) कं सचेतसमानन्दाम्बुधौ न निमज्जयति?

भारतस्य तत्तत्स्थान-परम्परानुश्रुति-संस्कृतिवर्णनपरेऽस्मिन् काव्ये यथा सहृदया राष्ट्रभक्तिभावनां द्रष्टुं शक्नुवन्ति तथैव अखिलं विश्वमेकं परिवारं मन्यमानाः मानवाः मानवतायाः कृतेऽमृतशान्तिसन्देशमपि साक्षात्कर्तुं शक्नुवन्ति। यथा कविस्तथा कोऽपि जनो बदरीशमेवं प्रार्थयितुं स्वतन्त्रः—

'अखिलभुवनसृष्टिस्ते तु लीलाविभूतिः
अपि च विविधयोनौ क्षेपणं तत्र पुंसाम्।
अविरतभवतान्तं मां तया लीलया त्वम्
अलमिति बदरीश! क्षिप्रमेवोद्धरस्व॥ (९३)

अष्टोत्तरशतपद्यात्मके 'सुरभिमकाश्मीरम्' इति काव्ये श्रीसुन्दरराजमहाभागेन काश्मीरप्रदेशस्य शोभा उपवर्णिता। काश्मीरस्य प्राकृतिकं रामणीयकं, सांस्कृतिकं गौरवं, प्राक्तनं श्रुतं वैभवम्, इदानीन्तनं च दृष्टं सौन्दर्यं कवेर्लेखन्याः प्रसूतं सत् सचेतसां चेतांसि रञ्जयति। कविः काश्मीर कविकोकिलानां वसन्तं मनुते—

कान्तारशान्तः कुलशैलकान्तः कासारकूलैः करणानुकूलः।
कालो वसन्तः कविकोकिलानां काश्मीरसंज्ञो विषयो मनोज्ञः॥ (६)

कविः 'गुल्मर्ग'-शालीमार'-'हज़रतबल'-'चार चिनार'-'डल झील'-'रामसरोवर'-'लिड्डरनदी'-'चन्दनवाडी' 'पिशु'-'अमरनाथ' - प्रभृतीनां सलोकोत्तरं किन्तु लोकसम्मतं भूगोलसम्मतं च वर्णनमुपन्यस्यति। सः खीष्ट-मुहम्मद-जहाँगीर-कल्हण-विल्हण - जगद्गुरुशंकराचार्य- श्रीरामानुजाचार्य-प्रभृतीनामपि काश्मीरसम्बन्धिनमुल्लेखं करोति। आधुनिकपर्यटकानां वेशभूषां प्रवृत्तिं तथा

'केशर'-'कांगडी'-'सेवफलोद्यान' प्रभृति चापि स वर्णयति। इत्थं कवेः सूक्ष्म-निरीक्षणशक्तिरत्र काव्ये विलोकनीया। कविना विज्ञानिन: किमर्थमाहूता इति पश्यन्तु रसिकाः—

विज्ञानिभिस्तत्र विचारणीयं विवस्वता विस्फुरता विनैव।
विकासमायान्ति विचित्रमत्र विलासिनीनां वदनाम्बुजानि॥

(२६)

कवेरुत्प्रेक्षाः पदे-पदे सहृदयानां मनांसि नन्दयन्ति; यथा—

काश्मीरनाम्नी तरुणी किमेषा हेमन्तशीतौ किमृतू निशीथः।
किं कम्बलोऽयं धवलस्तुषारः शेते यमावृत्य नतोन्नताङ्गी॥

(३३)

अमरनाथ वर्णने कवेः दार्शनिकत्वमपि व्यज्यते। इत्थं कविः काश्मीरलावण्य-गुणैराकर्षितः सन् काव्यमिदं चकार—

काश्मीरलावण्यगुणैः कवीन्द्रः कान्तैरयं सुन्दरराजनामा।
आकर्षितस्तर्षहरं ववर्ष हर्षेण वर्षं कविताघटायाः॥

(१०८)

काव्यद्वयमिद देववाणी-परिषदा पृथक् पुस्तकाकारेण १९८३ वर्षे साङ्ग्लभाषानुवादं प्रकाशितम्। अस्मत्पाठका अल्पमूल्येनैव मूलं काव्यद्वयमिदं लभन्तामिति कृत्वेदमस्मिन्नङ्केऽपि प्रकाश्यते।

'कामयेऽहम' इत्यस्यां कवितायां डा० कृष्णकान्तशुक्लमहाभागस्य स्वदेशभक्तिभावोऽभिव्यक्तः। कविः भारते सद्गुणानां प्रसारमभिलषति न तु दुष्प्रवृत्तीनाम्। तस्य कामनास्ति—

सतां मानदे सर्वथोत्कोचशून्ये बलात्कारहीने, सुवृत्तप्रधाने।
निसर्गाजिरे सर्वदा मोदमाने, ललामे स्वदेशे जनिं कामयेऽहम्॥

सदा न्यायरक्षाविधानैकदक्षे परार्तिप्रणाशाय वै बद्धकक्षे।
स्ववीर्येण गुप्ते, प्रकर्षेण मुक्ते, प्रखण्डे स्वदेशे जनिं कामयेऽहम्॥

(पद्यसंख्या २७-२८)

'अष्टकद्वयम्' इत्येतच्छीर्षकान्तर्गतं डा० उमाकान्तशुक्लप्रणीतं 'श्रीश्रद्धाष्टकं' 'श्रीस्वतन्त्रताष्टकं' च प्रकाश्येते यत्र कविना श्रद्धा-स्वतन्त्रतयोः व्यापकं रूप-मुपश्लोकितम्। विना श्रद्धां विना च स्वतन्त्रतां जीवनं निरर्थकं भवति;

अत एव कविर्भणति—

'सुधा वा विषं वा ध्रुवं वाध्रुवं वा विरागोऽथ रागो निवृत्तिः प्रवृत्तिः ।
अणुर्वा महद्वा वनं वा पुरं वा समग्रं ततं श्रद्धया तां भजेऽहम् ॥
(श्रीश्रद्धाष्टकम्/८)

विलिख्यतां मनःपटे प्रगीयतां नवैर्लयैः ।
प्रगृह्यतां वितीर्यतां विभूतिभिः स्वतन्त्रता ॥
(श्रीस्वतन्त्रताष्टकम्)

'उज्जयिनीयं जयति' इत्येतस्यां कवितायामेतत्पंक्तिलेखकेन उज्जयिन्याः शोभा उपवर्णिता। वारत्रयं तत्र प्रयातेनानेन जनेन यथानुभूत तदत्र समुपस्थापितम्।

'देववाणी-परिषद्वार्तायां' विगतमासत्रये जातानां परिषत्कार्यकलापानां संक्षिप्तं विवरणं दीयते श्रीमत्या रमाशुक्लया परित्कोषाध्यक्षया सूचनाधिकारिण्या च।

'पुस्तक-परिचय'-शीर्षकेऽर्वाचीनसंस्कृतरचनायाः संक्षिप्तः परिचयो दीयते।

कृपालवः पाठकाः यत्र क्वचिज्जातान् मुद्रणप्रमादान् संशोधयितुं सादरं प्रार्थ्यन्ते।

विदुषामाश्रवः

(डा० रमाकान्तशुक्लः)
प्रधानसम्पादकः

१५ जनवरी १९८४
आर ६, वाणी-विहारः
नयी दिल्ली-११००५९

श्रीसुन्दरराजविरचिता

।। श्रीबदरीशतरंगिणी ।।

(१)

प्रपद्ये बदरीधाम हिमधामसमावृतम् ।
यत्र संनिहितौ नित्यं नरनारायणावृषी ।।

(२)

नारायणमृषिं वन्दे निर्दिशन्तं नरर्षये ।
कर्मज्ञानगतिं पुंसां कृत्याकृत्यमतिं तथा ।।

(३)

पूर्वजातं नराणां नो नरर्षिमहमाश्रये ।
यस्य नारायणो देवः साक्षाद्गुरुरिह स्वयम् ।।

(४)

नरनारायणाम्बां तां वन्दे नः प्रपितामहीम् ।
या पूज्यते मनोग्रामे मन्दिरे पार्श्ववर्तिनि ।।

(५)

बदरीं निकषा स्तब्धं शयानं शेषमाश्रये ।
तत्त्वं शृण्वानमक्षिभ्यां नारायणमुखेरितम् ।।

(६)

यत्र तार्क्ष्यस्तपस्तप्त्वा वर्षाणामयुतं त्रयम् ।
लेभे नारायणप्रीत्या वैकुण्ठे नित्यसूरिताम् ।।

(७)

नारदो यत्र देवर्षिः दक्षशापमलक्षयन् ।
तत्त्वं नारायणाख्यातं नित्यमाकर्ण्य नन्दति ।।

(८)

तप्तकुण्डमहं वन्दे नारायणदयास्रुतम् ।
यत्र स्नातो जनो मार्ष्टि युगपत्कलमकल्मषौ ।।

(९)

यत्र पर्वतयोर्मध्ये नरनारायणाह्वयोः ।
वहत्यलकनन्दाख्या विष्णुगंगाऽलकापुरात् ।।

(१०)

वसुधारामुखीभिस्सा पथिधाराभिरेधिता ।
मनोग्रामे सरस्वत्या बृंहिता वहते यतः ।।

(११)

सा लोकविश्रुता देवी बदरीशतरंगिणी ।
या तनोति प्रवाहेण बदरीं शतरंगिणीम् ।।

(१२)

अतीव शीतामलकाप्रसूतामनेकपातां बदरीशपूताम् ।
अमन्दवातामतिवेगयाताममर्त्यगीतामनिशं भजे ताम् ।।

(१३)

श्री भैरवीचक्रपुटे बदर्यां तत्रोर्वशीपीठमधिष्ठितं तम् ।
वृतं सुपर्णोद्धवनारदाद्यैः नारायणर्षिं गुरुमाद्यमीडे ॥

(१४)

षण्मासकालं ससुखं नरेभ्यः षण्मासकालं निभृतं सुरेभ्यः ।
विभज्य पूजां भजमानमेवं भजे सुशीलं बदरीविशालम् ॥

(१५)

न कामकारेण न वा बलेन न वेदशास्त्रादिषु कौशलेन ।
उपेत्य यं शक्यमुपासितुं नः ऋते तदिच्छां बदरीशमीडे ॥

(१६)

नारायणं कारणमादिदेवं नरोपदेशाय कृतावतारम् ।
यतो निधीनामधिपः कुबेरो निषेवते किंकरतामुपेतः ॥

(१७)

नृणामियं भूः किल भोगभूमिः ततो निधीन्वाहय मानवेभ्यः ।
नारायणाज्ञामिति पालयन्यः लेभे कुबेरो नरवाहनत्वम् ॥

[कुबेरस्य नरवाहनत्वं न तु नरः तस्य वाहनमिति हेतोः
परन्तु नरेभ्यः वाहयतीति हेतोरिति कविहृदयम्]

(१८)

मुनिर्मनोग्रामसमीपवर्तिगिरेर्गुहायां हिमशीतलायाम् ।
तपश्चरंस्तत्र चकार पूर्वं व्यासः पुराणानि च भारतञ्च ॥

(१९)

अधिष्ठितो व्यासगुहासमीपे गुहां गजास्यस्स गुहाग्रजन्मा ।
उत्पाट्य दन्तं व्यलिखत्खलु स्वं ग्रन्थान्पुरा व्यासकृतानशेषान्

(२०)

श्रीमान्हनूमान्धृतशैलरूपः विधाय साष्टांगमथ प्रणामम् ।
विनीतवेषः पथि यत्र भाति नारायणात्तत्त्वमिवाददानः ।।

(२१)

न किंनरा नापि सुरा न दैत्याः न राक्षसा नापि पिशाचयक्षाः
सुखेन शक्ता बदरीमवाप्तुं कथं मनुष्याः प्रभवन्तु नाम ?।।

(२२)

हिमाद्रिमारुह्य सिसेविषन्ते कथञ्चिदेत्यालकनन्दयोर्ध्वम् ।
मार्गे प्रयागांश्च बहूनतीत्य नारायणं केचन पुण्यभाजः ।।

(२३)

हरद्वारे गंगा हरचरणविन्याससुभगे
हृषीकेशे भूयो भुवमवतरन्तीं हिमगिरेः ।
प्रणम्य प्रस्थेयं प्रणिपतितुकामेन समये
वृतौ पूर्वाचार्यैरथ बदरिकानाथचरणौ ।।

(२४)

स पन्था गन्तव्यश्शिखरिकटिसंश्लेषकुटिलः
क्वचिद्गच्छन्नुच्चैरचलशिखरं चुम्बितुमिव ।
क्वचिद्गच्छन्नीचैरवटगतनद्यास्तटभुवि
नराणां यो दीर्घं तुलयितुमलं संसृतिपथम् ।।

(२५)

वनश्यामाः कूटाः कतिपय इमे कम्बलयुताः
शिलाप्राया एते तृणविलयतोऽनावृतियुताः ।
तृणानीता अन्ये ननु पथि तथा संनिदधते
यथा योगं सिद्धेरनुगुणमनूनं विदधते ॥

(२६)

ततो मध्येमार्गं सलिलवलिताभोगललितः
प्रयागो देवानामपि नयनसात्कर्तुमुचितः ।
सुदूरादायान्ती मिलति कलयन्त्यट्टहसितं
यतो भागीरथ्या सममलकनन्दा सुरधुनी ॥

(२७)

प्रयागे देवानां जयति सुभगं मारुतिगुरोः
ससीतासौमित्रेः रघुकुलपतेर्मन्दिरमपि ।
श्रुता त्रेताकाले किल बदरिका रामकलिता
प्रयागे देवानामभवदिति सा काचन कथा ॥

(२८)

श्रुता गंगा विष्णोः पदकमलतः पूर्वमुदिता
कथं गंगा यस्मादिह पतति कस्मादपि गिरेः ।
इमे मूर्धा सर्वे खलु शिखरिणो विष्णुपदगाः
प्रसङ्गान्नूनं ते स्वयमुपगता विष्णुपदताम् ॥

[विष्णुपदमिति विष्णोः पदमाकाशश्च]

(२९)

रुद्रप्रयाग इति कश्चन रुद्रनाथ-
देवालयेन रुचिरस्तदनु प्रदेशः ।
केदारनाथहिमकूटतलप्रसूता
मन्दाकिनी मिलति साऽलकनन्दयाऽत्र ॥

(३०)

मन्दाकिनीतीरगते सुशीले कान्ते प्रशान्ते विमले प्रदेशे ।
मुनेरगस्त्यस्य तपोऽनुरूपं तपोवनं दीव्यति तत्र सेव्यम् ॥

(३१)

अभ्यर्थितो देवगणैः प्रणम्य तपोबलेन प्रतपन्नगस्त्यः ।
सूर्योपरोधाय समेधमानं विन्ध्याचलं यो विनतं वितेने ॥

(३२)

यादोगणानां शरणं प्रदाय वेलामतीत्योपरि वर्धमानम् ।
पुरा सुरैर्याचित एष भीतैः पयोधिमाचम्य लयं निनाय ॥

(३३)

अयं महर्षिस्स्वयमैन्द्रचापं प्रदाय रामाय रणे जयाय ।
उपादिशत्तं तपनञ्जपेति दशां दशास्यं दशमीं निनीषुः ॥

(३४)

एवं प्रभावं प्रणता अगस्त्यमनन्तरं ये बदरीविशालम् ।
भजन्ति ते प्राप्नुवते प्रसादं तुष्टस्य तस्य द्विगुणं ध्रुवं तत् ॥

(३५)

ऊखीमठो देश उषाभिधायाः बाणस्य पुत्र्याः अनिरुद्धरत्याः ।
केदारनाथस्य विधीयतेऽत्र षण्मासपूजा किल शीतकाले ॥

(३६)

ऊखीमठस्यास्य समीपदेशे चकास्ति काल्या अपि सिद्धिपीठम्
यत्र प्रतीत्या प्रणताः प्रभूतं प्रसादमासाद्य जयन्ति देव्याः ॥

(३७)

मन्दाकिनीतटपथेन गतेन गौरी-
कुण्डोऽथ निर्गलितसप्तजलोऽपि सेव्यः ।
गौरी यतः किल चचार महत्तपः प्राक्
कामान्तकं पतिमवाप्तुमनन्यकामा ॥

(३८)

तस्या विवाहमथ धूर्जटिना विधातुं
नारायणोऽप्युपगतस्त्रियुगी विभाति ।
संज्वालितः परिणयाय स वेदिवह्नि-
रद्यापि दीप्यति शुभे सविधे यदीये ॥

(३९)

केदारनाथनिलयं यत एष गन्ता
मार्गश्शिलोपरि हिमोपरि च प्रणीतः ।
कान्तो नितान्तमुपशान्तवनान्तरम्यः
मन्दाकिनीतटगतो जलपातशीतः ॥

(४०)

नारायणं तमथ नारदकुण्डमग्नम्
उद्धृत्य पूर्वमिव पूजितवान् बदर्याम् ।
स ह्यादिशंकरजगद्गुरुरन्तकाले
केदारनाथमभिगम्य समाधिमास्थात् ।।

(४१)

यो दक्षिणापथभवो गुरुरात्तदण्डः
रेवातटेऽप्यटितभारतभूमिरन्ते ।
केदारनाथनिलये कलयन्समाधिम्
ऐक्यं निरूपयति भारतसभ्यतायाः ।।

(४२)

जातो दक्षिणभारते शिशुवयस्यभ्यस्तविद्यः परम्
अद्वैतं स्वमतं स्वयं समभितो व्यापय्य संस्थाप्य च ।
चत्वारि प्रथितानि दिक्षु चतसृष्वाम्नायपीठान्यपि
द्वात्रिंशद्वयसा स शंकरगुरुर्लीनः परब्रह्मणि ।।

(४३)

नीतं क्वापि रसातलं कुमतिभिस्त्रातुं स वेदत्रयं
भीतान्पापविजृम्भणेन विबुधान्पातुं स्वमेवाश्रितान् ।
गीतार्थं जगते कलिप्रशमनं दातुं स विष्णुर्यथा
पूते कालडिधाम्नि केरलगते जातो गुरुश्शंकरः ।।

(अस्मिन् श्लोके भगवता श्रीमन्महाविष्णुना रसातलनीतवेदत्रयत्राणाय कृतं मीनावतारं तस्य पापिष्ठदैत्यकुलाभ्युदयसंत्रस्त-

समाश्रितदेववृन्दपरिपालनसंकल्पं सर्वविदितं तथा कलिकल्मषघ्न-
गीतोपदेशाय कृतं कृष्णावतारं चोल्लिख्य तादृशावतारप्रयोजनं पुनः
जगद्गुरुणा श्रीमदादिशंकराचार्येण निर्वर्तितमिति श्लेषेण वर्णयति
कविः यतः अधोगतवेदत्रयोद्धारणमाश्रितपण्डितजनपरिपालनं
कलिकल्मषघ्नगीतार्थबोधकगीताभाष्यरचनं च जगद्गुरुणाऽपि
कृतम्)

(४४)

निर्मथ्य मन्मथमथाद्रिसुतासमक्षं
सद्यस्तदीयमवभज्य मनोरथञ्च ।
केदारधाम समुपेत्य शिवस्तपोऽधात्
वैराग्यपीठमिति तेन तदामनन्ति ॥

(४५)

जीवः केदारनाथस्स च भुवनपिताऽम्बा च केदारभूता
ताभ्यामुत्पाद्यमानो नर इति विदितो जीवराशिस्समस्तः ।
देवो नारायणाख्यो गुरुरखिलतनुः प्रापकप्राप्यभूतः
तत्त्वं केदारनाथः किमिदमुपदिशत्यद्रिकूटेऽत्र तिष्ठन् ?

(४६)

दाक्षायण्या दहन्त्या मखशिखिनि मृदु स्वं वपुर्धर्मपत्न्या
निर्वृत्ता निष्क्रियाऽऽसीन्निजपतिवचनानादराघानुरूपम् ।
क्वे दारास्तादृशाः क्वेत्युपयमविमुखो दग्धकामो विरागः
भूत्वा केदारनाथस्तपसि हिमवतो व्यग्र उग्रे किमग्रे ? ॥

(४७)

इन्द्रोपेन्द्रौ कुबेरो नर ऋषिरुपदेष्टा स नारायणर्षि-
र्देवास्त्रिशत्त्रिकोट्यो ध्रुवमित उपगम्याशु केदारनाथम् ।

साक्षाद्दाक्षायणी सा हिमगिरितनया तामुपेक्षस्व मा भोः
भूयस्तामेव शम्भो परिणय जगतां मंगलायेत्यवोचन् ॥

(४८)

अर्वाचामवबोधाय सर्वे ते त्रिदिवौकसः ।
पर्वतीभूय तिष्ठन्ति शर्वस्य पुरतो ध्रुवम् ॥

(४९)

इन्द्रो वाहनमास्थितो वितनुते भस्माभिषेकोपमं
नूनं श्वेतहिमाभिषेकमभितः केदारनाथं पुनः ।
आदायाथ तदेव लिम्पति हिमं शम्भोर्विभूतिं यथा
शीर्षेष्वत्र समेयुषां दिविषदामीशप्रसादैषिणाम् ॥

(५०)

लोकेभ्यश्च हरप्रसादमथ तं विश्राणयन्वृत्रहा
मन्दाकिन्यभिधां प्रवाहयति किं दूतीमिव स्वर्णदीम् ।
आप्लुत्य त्वरितं प्रधाव्य चलिता भर्तुर्निदेशेन सा
गंगासंगवती पुनाति सलिलैस्त्रैलोक्यमेवाखिलम् ॥

(५१)

भूतानि पञ्चेति स भूतनाथः केदारधामान्यपि पञ्च चक्रे ।
भूतानि सर्वाण्युपयान्ति शान्तिं पञ्चापि ये वा प्रणमन्ति
तेषाम् ॥

(५२)

रुद्रप्रयागत उपालकनन्दमूर्ध्वं
स्थानं स कर्णतपसस्समुपेत्य सेव्यः ।

कर्णप्रयाग इति साऽलकनन्दयाऽत्र
पिण्डारिभूर्मिलति दूरत एत्य गंगा ॥

(कर्णप्रयागे पूर्वजन्मनि तपसा लब्धबहुकवचस्य राक्षसरूपस्य कर्णस्य केवलमेकं हित्वा अन्यान् सर्वान् कवचान् स्वतपोबलेन श्रीबदरीनारायणः पाटयामास; कर्णश्च एकेन कवचेन सहितः कुत्राप्यपलायतेति काचन कथा श्रूयते)

(५३)

कर्णप्रयागत उपर्युपगम्य दृश्यः
नन्दप्रयाग इति कोऽप्यपरः प्रयागः ।
श्रीनन्दगुण्टिहिमकूटतलप्रसूता
नन्दाकिनीति मिलतेऽलकनन्दयाऽत्र ॥

(५४)

सेव्यास्तथा विरहिगारुडबालखिल्य-
पाताललक्ष्मणविशेषणशालि गंगा ।
संगस्य साधु सरिताऽलकनन्दया याः
पुष्यन्ति पुण्यसलिलाः भुवनं पुनानाः ॥

(५५)

ज्योतिर्मठस्सुविदितः पथि सेवनीयः
यत्रादिशंकरगुरुस्तपसा प्रसाद्य ।
आद्यं नृणां गुरुवरं बदरीशमेव
ज्योतिस्स्वरूपमतिलोकमवालुलोके ॥

(५६)

यत्रादिशंकरजगद्गुरुणा तदानीं
संरोपितो निजतपोवनभूमिभागे ।
अद्यापि रोहतितितमामविनश्य वृक्षो
ज्योतिर्मठे बुधजनैरुपसेव्यमानः ॥

(५७)

कापालिकान्गुरुमुपेत्य निहन्तुकामान्
तेनार्थितस्समुदितो भगवान्नृसिंहः ।
सर्वान्निहत्य गुरुणा प्रतिपूजितोऽत्र
ज्योतिर्मठे जयति सुन्दरमन्दिरान्तः ॥

(५८)

तत्पूजनाय गुरुणा पयसामभावः
दूरीकृतोऽत्र सृजता सलिलस्य धाराम् ।
ज्योतिर्मठे प्रसरितामधुनाऽपि दण्ड-
धारेति यां सविनयं विबुधा भजन्ति ॥

(५९)

ज्योतिर्मठे विजयते बदरीविशालः
संभूय मोहनवपुः किल वासुदेवः ।
आराधयन्ति भगवन्तमितस्तमेव
ये शक्नुवन्ति बदरीं न तु गन्तुमूर्ध्वम् ॥

(६०)

आनीय मन्दिरमिदं निकषा शिवेन
सत्या अभूद्विनिहितोऽस्थिचयावशेषः ।

लिप्तं घृतं यदुपरि द्रवतां न याति
क्लृप्ता जयन्ति यदधो नव चापि दुर्गाः ॥

[श्रीसत्याः अस्थिलयावशेषे अद्य शिलीभूते लिप्तं घृतं तस्य नित्यशैत्यहेतोः कदाऽपि द्रवतां नोपेति]

(६१)

ज्योतिर्मठे तत्र समुज्जिहानः केदारनाथः कथितो भविष्यः ।
शनैश्शनैर्यं परिवर्धमानं विलोकयन्विस्मयमेति लोकः ॥

(६२)

श्रादिशंकरजगद्गुरुशिष्यः तोटकार्य इति तेन निदिष्टः ।
ज्योतिराख्यविदितोत्तरपीठे स्थापयां मठममुत्र चकार ॥

(६३)

तोटकार्यतपसा परिपूतां शीतलां गिरिगुहां रमणीयाम् ।
अत्र शंकरमठः परिपाति शिष्यवृन्दपरिपूजनहेतोः ॥

(६४)

ज्योतिर्मठाद्बदरिकाध्वनि वीक्षणीयः
विष्णुप्रयाग इति कश्चन पुण्यदेशः ।
अद्रेस्तुषारधवलाद्धवली स्रवन्ती
गंगा समेति सरिताऽलकनन्दयाऽत्र ॥

(६५)

विष्णुप्रयागमतिलङ्घ्य विलोकनीयः
श्रीपाण्डुकेश्वर इति प्रथितः प्रदेशः ।

पाञ्चालराजसुतया सह पाण्डुपुत्राः
पञ्चात्र पूर्वमवसन्वनवासकाले ।।

(६६)

देवालयो जयति यत्र भृशं पुराणः
ध्यानाकृतेर्भगवतो बदरीश्वरस्य ।
यः पाण्डुसूनुभिरिह प्रथमं प्रणीत-
स्तेनादिशंकरजगद्गुरुणोद्धृतश्च ।।

(६७)

श्रीपाण्डुकेश्वरत ऊर्ध्वमिहाद्रिशृंगे
उद्यानमस्ति समभूमिगतं सुमानाम् ।
पुष्पाणि यत्र सुरभीणि च नैकवर्ण-
वैचित्र्यवन्ति विकसन्ति वसन्तकाले ।।

(६८)

पुष्पं सुगन्धि वहता पवनेन मन्दम्
आनीतमेकमवलोक्य हि तादृशानि ।
कृष्णा बहूनि कुसुमानि समानयेति
संमोहिता पतिमयाचत भीमसेनम् ।।

(६९)

अन्वेषयन् स कुसुमं विचरन् हि भीमः
भीमं ददर्श पुरतो निजमग्रजं प्राक् ।
अद्यापि यं किल विलोकयते हनूमां-
श्चट्टीति शैलवपुषा स्थितमत्र लोकः ।।

[उपरि विरचितैः त्रिभिः श्लोकैः श्रीमन्महाभारतवर्णितं सौगन्धिकपुष्पोपाख्यानं सूचितम्]

(७०)

निर्माय मन्दिरमितः प्रणमन्ति घण्टा
कर्णं[1] पुरा यदुपतिं परिचर्य मुक्तम् ।
प्रेतः प्रदत्त उपहारतया हि भक्त्या
येनादरेण जगृहे मधुसूदनेन ॥

(७१)

ध्यानीश्वरस्य निलये बदरीविशालं
मासान्षडत्र मनुजाः परिपूजयन्ति ।
येष्वेव सा बदरिका हिमपातहेतोः
दुष्प्रापतां भजति दुःखहरी नराणाम् ॥

(७२)

नीलकण्ठशिखरं निकषाऽधो देवदर्शनमहो मम जातम् ।
दूरदुर्गमपदंतुदमार्गक्लेश आशु नवतां मम धत्ते ॥

(७३)

किमवनी बदरीतरुमण्डिताऽभवदियं बदरीति कृताभिधा ।
बहुदरीभिरुतावृतहेतुना बहुदरी बदरीविकृतिं गता ॥

(७४)

समिन्धते पञ्च पुनर्बदर्यः हिमाद्रिशृंगेष्विह पावनेषु ।
पञ्चापि यः कश्चन सेवमानः न पञ्चतामेति नरः कदाऽपि ॥

---

१ श्रीहरिवंशे घण्टाकर्णोपाख्यानं द्रष्टव्यम् ।

(७५)

पाञ्चाल्या सह पञ्चपाण्डुतनयास्संत्यज्य राज्यं पुरा
स्वर्गारोहणकाम्यया बदरिकानारायणस्याश्रमम् ।
आगत्य प्रणिपत्य पर्वतपथेनैवोत्तराशां गताः
ततुं यत्र सरस्वतीं पथि पुनर्भीमश्शिलां न्यस्तवान् ॥

(७६)

इति तव बदरीश प्राप्तवन्तं समीपं
गहनमलकनन्दामार्गमालम्ब्य दीर्घम् ।
बहुभिरिममहोभिस्सानुकम्पैरुदारै-
रनुगमनुगृहाण श्रीपते त्वं कटाक्षैः ॥

(७७)

कथमपि यममर्त्याः द्रष्टुमीशाः कदापि
तमहमिह बदर्यां नाथ नारायणं त्वाम् ।
निहतनिरयगन्धं निर्निमेषं निशाम्यन्
अनिमिष इव जातस्त्वत्प्रसादेन सद्यः ॥

[निर्निमेषत्वादनिमिषः अर्थात् देव एव संजात इति यावत् ।]

(७८)

अहमिह भुवि नृणां नायको विश्वनाथो
कलयितुमुपदेशं को नरायागतोऽयम् ।
इषुभिरिति सरोषं प्राक्पिनाकावमुक्तैः
त्वयि किल बदरीश श्रीश शूलो ववर्ष ॥

(७९)

अथ रणकरणार्थं तं महादेवमेवं
कृतमतिमुपगम्य प्राह स ब्रह्मदेवः ।
प्रशमय रुषमेष ह्यावयोर्देवदेवः
जनक इति नमस्यस्सोऽपि शान्तो बभूव ॥

(८०)

त्रिपुरहरशराणां संशितानां शतानां
विषमिव वमतां त्वं लक्ष्यभूतस्तदानीम् ।
रुजमिह सहमानस्तेजसा स्वेन शान्तो
हिमगिरिबदरीशाजायथा मुञ्जकेशः ॥

(८१)

कथमपि तपसस्ते कातरीभूय भंगं
कलयितुमिह शक्रः कामिनीः प्राहिणोद्याः ।
करिकरकमनीयात् कान्तकाया तवोरोः
कदति मदममूषां काप्युदित्योर्वशीति ॥

(८२)

अथ परमवधार्य त्वामजं देवदेवं
अवनतशिरसस्ता अस्तुवन् देवकन्याः ।
प्रसदनसुमुखात्त्वत्प्रीयमाणात्प्रकामं
प्रतिनिववृतिरेऽथ प्राप्य तामुर्वशीञ्च ॥

(८३)

उपदिशसि नराय त्वं ततो विस्मिताय
निजपदपतनं ते नित्यमाशङ्कमानाः ।

दिविषद इतरेषां विघ्नकारास्समाधे-
रहमिव भव तस्मादप्रकम्प्यस्स्थिरश्च ।।

(८४)

पुनरुपदिशसि त्वं पुण्यमार्गं नराय
पुरहरशरविद्धः पूर्वमक्रुद्ध आसम् ।
पुर इह सुरवध्वः पुष्पबाणेन नो मां
पुलकितमदधुर्वा पापदौ क्रोधकामौ ।।

(८५)

ज्वलति तव किरीटे द्वारकाधीशरत्नं
इति कथयति लोकस्तत्र किं वा विचित्रम् ।
नरमृषिमभिगोप्तुं पार्थवेषं त्वयैव
धृत इह बदरीश द्वारकाधीशवेषः ।।

(८६)

कलिसमुदयकाले द्वारकाधीशदेहं
त्वमिह भवसि यावत् द्वापरे त्यक्तुकामः ।
विरहमसहमानं तावदात्थोद्धवं तं
उपसर बदरीं मे लप्स्यसे मामिति त्वम् ।।

(८७)

त्वयि विनिहितचेता उद्धवो भावयंस्त्वां
अनवरतमुपास्य प्राप नारायणत्वम् ।
यदि न कथमनर्घां शीतमासेषु षट्सु
भजतु बदरिकेश त्वत्सपर्यां स्वयं सः ।।

(८८)

नव उषसि विगाह्य प्रत्यहं तप्तकुण्डे
नवनवमभिषेकं नाथ निध्यायतां ते ।
नरगुरुबदरीश त्वत्कटाक्षादृतानां
न हि भवति विशेषो नाकिनां वा नराणाम् ।।

(८९)

कलयितुमुपदेशं कल्मषघ्नं नराय
हिमशिखरिणि शीते नित्यवासं दधान ।
अचरमगुरुदेव प्रार्थनामप्यमूं मे
निशमय बदरीश श्रीश हे मुञ्जकेश ।।

(९०)

उपदिश भगवन्मे त्वं नरायैव पूर्व-
मयमपि नर इत्येवात्र जातानुकम्पः ।
न च गुरुमहमन्यं कामये त्वामवेतुं
नरगुरुबदरीश श्रीश भूया गुरुर्मे ।।

(९१)

भुवनमसि समस्तं वासयन्वासुदेवः
मम मनसि निवासो न त्वयोपेक्षणीयः ।
अभिलषसि यदि त्वं सत्यतामात्मनाम्नः
प्रविश बदरिकेशावासयन्नाशयं मे ।।

["वासनाद्वासुदेवस्य वासितं भुवनत्रयम्" इति श्लोकोऽत्रानु-
सन्धेयः]

(९२)

मुनिसमुचितवेषं त्वां जटाजूटमौलिं
स्फुटकमलवदंके कल्पितोत्तानपाणिम् ।
नरमृषिमुपदेष्टुं बद्धपद्मासनस्थं
कलयतु बदरीश स्वान्तमन्तर्नितान्तम् ।।

(९३)

अखिलभुवनसृष्टिस्ते तु लीलाविभूतिः
अपि च विविधयोनौ क्षेपणं तत्र पुंसाम् ।
अविरतभवतान्तं मां तया लीलया त्वं
अलमिति बदरीश क्षिप्रमेवोद्धरस्व ।।

(९४)

गुरुजनवचनेन त्वं दयालुः प्रतीतः
परमहमिह मग्नः पश्यतस्ते भवाब्धौ ।
अपि यदि मम तस्मिन् कर्म हेतुस्तथाऽपि
प्रथमपदि भवाब्धौ पातयामास को माम् ।।

(९५)

मुनिवरगुरुवर्याः मुक्तिकामास्ससत्त्व-
स्तव खलु कृपया ते तीर्णवन्तो भवाब्धिम् ।
लघुमगतिमसत्त्वं क्षुद्रमुत्तारयेर्मां
न यदि बदरिकेश त्वद्यशः कीदृशं तत् ?

(९६)

अविदितनिगमं मामात्मविद्याविहीनं
अनवगतपुराणं मूढमाचारहीनम् ।

अवगमयितुमर्थं त्वत्समीपं च नेतुं
क्षम इह बदरीश त्वत्कटाक्षादृते कः ?

(९७)

किमु हितमहितं किं किं नु कृत्यं त्वकृत्यं
किमिह क इह धर्मः कथ्यते को न्वधर्मः ।
इति न हि विदितं मे मन्दबुद्धेरतस्त्वं
उपदिश बदरीश श्रीश मे मुञ्जकेश ॥

(९८)

निपतितमगतिं मां नाथ संसारसिन्धौ
तिमिभिरिव च नक्रैरिन्द्रियैः कृष्यमाणम् ।
सकरुणमभिरक्षँस्तारकोपायमेकं
उपदिश बदरीश श्रीश मे मुञ्जकेश ॥

(९९)

त्वदुदितमतियोगं ध्यानराजादियोगं
त्वदविरहितयोगं ज्ञानकर्मादियोगम् ।
इतरमपि च योगं नाथ योगेश्वर त्वं
उपदिश बदरीश श्रीश मे मुञ्जकेश ॥

(१००)

कथयति गुरुरेको ज्ञानलाभेन मुक्तिं
अथ कथयति भक्तिं कोऽपि मुक्त्येकहेतुम् ।
अवगमनसमर्थो नाहमर्थस्य तेन
दिश मम बदरीश ज्ञानभक्त्योः प्रवृद्धिम् ॥

(१०१)

पितृदुहितृसुतानां देहसंबन्धबन्धं
क्षणविलयिसुखानां भोगनिर्बन्धबन्धम् ।
जननमरणचक्रभ्रान्तिदुःखानुबन्धं
शिथिलय बदरीश श्रीश संसारबन्धम् ॥

(१०२)

इह मम जनिहेतुं मृत्युहेतुं तथैव
पुनरपि जनिहेतुं मृत्युहेतुं पुनश्च ।
सततमपि च हेतुं त्वत्पदस्यानवाप्तेः
प्रशमय बदरीश श्रीश मे कर्मबन्धम् ॥

(१०३)

महत इति महीयांस्त्वं मृषा श्लाघितोऽसि
त्वदपि किल महीयानस्ति मे किल्बिषौघः ।
यदि निगमवचस्त्वं सत्यमिच्छेर्विधातुं
क्षपय बदरिकेश श्रीश मे किल्बिषौघम् ॥

[महतो महीयानिति श्रुतिवाक्यमुदाहृतम्]

(१०४)

अहमतिदयनीयः त्वं दयालुः प्रकामं
अहमतिकृपणस्त्वं सत्त्ववान् सर्वशक्तः ।
अयमहमतिदीनस्त्वं प्रभुः श्रीनिवासः
कुरु मयि बदरीश व्याजहीनानुकम्पाम् ॥

(१०५)

शुभसुभगविभूषं शोभिशृंगारवेषं
सुषममपि किरीटं शीर्षदेशे जुषाणम् ।
सुरनरगणबन्धुं सुन्दरं वन्दनीयं
हिमगिरिबदरीशं श्रीशमीशं प्रपद्ये ॥

(१०६)

निधिपतिमपसव्ये नारदं चोद्धवं च
विनतमपि दधानं वैनतेयं पुरस्तात् ।
नरमृषिमथ सव्ये नम्रमन्तेवसन्तं
हिमगिरिबदरीशं श्रीशमीशं प्रपद्ये ॥

(१०७)

विकसितमुखपद्मं पादचिह्नं भृगोस्तं
असितमुरसि च श्रीवत्सचिह्नं दधानम् ।
जटिलकुटिलकेशं जैत्रपद्मासनस्थं
हिमगिरिबदरीशं श्रीशमीशं प्रपद्ये ॥

(१०८)

चलितमुपरि नीचैः कर्मणा जन्मचक्रे
कृपणमनुशयार्तं श्रीपते दीनदीनम् ।
अनितरमनुकूलं नाथ विश्वासवन्तं
हिमगिरिबदरीश त्राहि मां त्वां प्रपन्नम् ॥

(१०९)

हिमगिरिबदरीशं जन्तुरेवं प्रपन्नः
सदयमनुगृहीतस्तेन कैंकर्यकृत्ये ।

अभुपदविनियुक्तो नित्यमुक्तो यथैव
विजयति गरुडो वा नारदो वोद्धवो वा ।।

(११०)

जिगमिषन् बदरीं शतरंगिणीं श्रयति यो बदरीशतरंगिणीम्
पठति वा बदरीशतरंगिणीं स लभते बदरीं शतरंगिणीम् ।।

(१११)

बदरीशतरंगिणीस्तुतिः भवतात्सुन्दरराजनिर्मिता ।
बदरीशतरंगिणी यथा विबुधानां प्रियवाहिनी सदा ।।

[बदरीशतरंगिणीनाम्नी इयं स्तुतिः यथा बदरीशस्य तरंगिणी अर्थात् अलकनन्दा नदी विबुधानां देवानां प्रियवाहिनी प्रियनदी तथा विबुधानां पण्डितानां प्रियवाहिनी प्रियं वहन्ती भवत्विति कवेरभिलाषः ।]

(११२)

अहन्यहन्यधीयानाः बदरीशतरंगिणीम् ।
दयां तवाप्नुयुर्नूनं बदरीश ! तरंगिणीम् ।।

इति श्री महाकविसार्वभौमविल्लूर्नडादूर श्रीनिधिराघवाचार्यस्वामितनूजेन श्रीसुन्दरराजेन विरचिता 'श्रीबदरीशतरङ्गिणी' सम्पूर्णा ।



श्रीसुन्दरराजविरचितम्

॥ सुरश्मिकाश्मीरम् ॥

(१)

सख्येन विख्यातिमुपागतेषु देशेषु मुख्ये किल भारताख्ये ।
प्रदिक्षु काश्मीर इति प्रसिद्धः प्रभाति कौबेरदिशि प्रदेशः ।

(२)

स पीरपञ्जालहिमाचलाभ्यां सदा तुषारावृतशेखराभ्याम् ।
समावृतस्संततशीतलोऽपि हिमप्रपातैश्शिशिरेऽतिशीतः ॥

(३)

क्वचिन्नतश्च क्वचिदुन्नतश्च क्वचिज्झरीणां मुखरो रवैश्च ।
क्वचित्प्रशान्तैर्भरितो वनान्तैः क्वचित्तुषारावृतपर्वतैश्च ॥

(४)

शीतैः प्रवातैस्तरुरेष धूतः घातैश्शिलानाञ्च मृदां हिमानाम् ।
पातैरपि स्वामृजुतामभुञ्चन् ख्यातः स्वनाम्ना भुवि देवदारुः॥

(५)

आसेव्यमानाः हिमशीतवातैः यत्राचलाः श्यामवनान्तरम्याः ।
उत्तिष्ठदभ्युन्नतदेवदारु - स्तोमेन रोमाञ्चमुदञ्चयन्ति ॥

(६)

कान्तारशान्तः कुलशैलकान्तः कासारकूलैः करणानुकूलः ।
कालो वसन्तः कविकोकिलानां काश्मीरसंज्ञो विषयो मनोज्ञः ।

(७)

आमोदवाही रसिकाननानमयं रसानां रुचिरः प्रवाहैः ।
सुवर्णपूर्णस्सुमनोऽमनोज्ञः कवेर्नवः कश्चिदिव प्रबन्धः ।।

(८)

अयं सुमोद्यानवनाभिरामः तथा फलोद्यानवनोपभोग्यः ।
नगैर्नदीभिर्विपिनैश्च सेव्यः निवेशितो नन्दननिर्विशेषः ।।

(९)

काश्मीरलावण्यहृतान्तरंगः स वृत्रहाऽपि त्रिदिवं विहाय ।
अत्रैव नित्यं तनुते निवासं येनैष नाकी भवति प्रदेशः ।।

(१०)

प्रभोर्मघोनः किल लोभनीयः निवास इत्यस्य नवीकृतेः किम् ।
प्रत्यब्दमब्दास्स्वयमादधन्ति सुधाविलेपं तुहिनच्छलेन ।।

(११)

अयं हि लोकस्स पुराणविद्भिराशंसितो गानविचक्षणानाम् ।
गन्धर्वनाम्नां गगनेचराणां सुवर्गतुल्यः सुरयोनिजानाम् ।।

(१२)

क्रीष्टस्स जेसुः स्वपदानुगेभ्यः प्रतिश्रुतं प्राह यमेव देशम् ।
भुवि च्युतो नाक इवातिकान्तः प्रान्तस्स काश्मीर इति प्रतीमः ।।

(१३)

काश्मीरनाम्नीमवगुण्ठनेन कान्तां तुषाराकृतिना किमर्कः ।
प्रसूनमूर्द्धीं स्पृशतीह मुग्धां कामीव नित्यं मृदुभिः कराग्रैः ।।

(१४)

किमेष कान्तावलितोपमानं सदोपभोगं भजतां ददानः ।
परां तथा निर्वृतिमादधानः काश्मीरनामा नवकाव्यबन्धः ।।

(१५)

सुजातमुद्यानवनैस्सुमानां वसन्तकाले मिषतां जनोऽमुम् ।
अनेकवर्णेषु विलोकनीयैः दिदृक्षुरायाति दिगन्ततोऽपि ।।

(१६)

अदभ्रशष्पासु तृणस्थलीषु चरन्ति मेषाः मृदुरोमशेषाः ।
वासांसि रोमाणि निकृत्त्य येषां वितन्वते शीतनिवारणाय ।।

(१७)

वसन्तकाले स्फुरितांकुरेषु श्यामेषु शय्योपमशाद्वलेषु ।
गुल्मार्गधाम्नि प्रसभं नराणां समेयुषां श्राव्य इहारवारः ।।

(१८)

करापचेयं वहतां फलौघं विराजतां सेवफलद्रुमाणाम् ।
प्रपूर्णमुद्यानवनैः प्रकामं प्रकाशतेऽसौ शरदि प्रदेशः ।।

(१९)

कैदारिकाभिश्शरदि प्रफुल्लकाश्मीरपुष्पोद्भवसौरभीभिः ।
सुगन्धिरन्ध्रे कलितांगरागाः काश्मीरनाम्नी तरुणी मनोज्ञा ।।

(२०)

स चन्द्र इन्दुप्रतिमाननाभिः सरोवरै र्निर्मलनीलकान्तिः ।
सशारदाभ्रो हिमशुभ्रशैलैः शरन्निशाकाश इवैष देशः ।।

(२१)

उपत्यकां नित्यहिमां हिमाद्रेः कथञ्चिदारुह्य विहर्तुकामः ।
चक्रं विना स्लेढ्जति वाहनेन नीचैर्वहत्यत्र जनस्सवेगम् ॥

(२२)

अदभ्रशुभ्रं हिमपातहेतोः अवेक्षितुं शान्तजनप्रचारम् ।
अहो समायाति कुतूहलीमतीव शीतं शिशिरेऽपि लोकः ॥

(२३)

घनानि रोम्णां वसनानि धृत्वा क्रीडन्ति कृत्वाऽसितकाचमक्ष्णोः।
केचित्पुनः कृत्रिमदारुपादाः गुल्मार्गधाम्नि प्रथिते हिमेषु ॥

(२४)

बर्हिर्मुखानामपि तत्र नृणामेको हि नूनं शिशिरे प्रभेदः ।
अंगारवत्काँगडिकुक्षिहेतोः भवन्ति वर्हिर्जठरा यतोऽमी ॥

(२५)

ऋतुष्वशेषेषु निषेवणीयं ऋच्छन्ति काश्मीरमिमं प्रदेशम् ।
ऋते जना देशविदेशभेदात् ऋतं सदा भोगकृते कृतार्थाः ॥

(२६)

काश्मीरसौन्दर्यनिरीक्षणाय मनोविनोदाय दिने दिनेऽत्र ।
आकाशयानैरुपयान्त्यनेके पाश्चात्यदेश्या अपि भारतीयाः ॥

(२७)

विमानयानं गमनाय नित्यं विशालनीलं सुरवर्त्म सेव्यम् ।
वसुन्धराऽभ्युन्नतभूषु वासः काश्मीरमेनं त्रिदिवं तदाहुः ॥

(२८)

आरोढुकामाः शिखरं हिमाद्रेः प्रालेयगूढं पथिकाः पदाभ्याम् ।
आयान्ति पाथेयवहा अनेके एकाकिनो वृन्दश एव वाऽत्र ।।

(२९)

विज्ञानिभिस्तत्र विचारणीयं विवस्वता विस्फुरता विनैव ।
विकासमायान्ति विचित्रमत्र विलासिनीनां वदनाम्बुजानि ।।

(३०)

कम्रस्य काश्मीरवधूजनस्य नम्रस्य किंचित्कुचयोर्भरेण ।
ताम्रायमानद्युति गण्डयुग्ममाम्रस्य साम्यं वहते फलस्य ।।

(३१)

कपोलकान्तेः कमलेक्षणानां यत्रानुकृत्या कृतया भवन्ति ।
शनैः शनैः पाटलिमानमेत्य सेव्यानि नस्सेवफलानि नूनम् ।।

(३२)

उत्साहना उत्सवदा उदाराः उत्कैरुपेताः उपलब्धतर्षैः ।
उर्व्याः उदित्योदकमुद्भ्रमन्तः उद्वेलयन्त्युत्सुकभावमुत्साः ।।

(३३)

काश्मीरनाम्नी तरुणी किमेषा हेमन्तशीतौ किमृतू निशीथः ।
किं कम्बलोऽयं धवलस्तुषारः शेते यमावृत्य नतोन्नतांगी ।।

(३४)

प्रभातकालो नु वसन्तकालः स्नानावलेपादि यदा समाप्य ।
विभूषितांगीव विभाति पुष्पैरनेकवर्णैरतिलोभनीयैः ।।

(३५)

निदाघवर्षासमये पुनस्सा फलैरनेकैः फलिता रसाढ्यैः ।
विभाति पुष्टा विविधैरभीष्टैः स्वादिष्ठमिष्टैः कृतभोजनेव ॥

(३६)

शरत्तदीया शयनीयवेला शय्यां महार्हां स्वयमेव यस्याम् ।
अनोकहानां पतयालुपर्णैः तनोति मृद्वीं मृदितैर्हिमेन ॥

(३७)

काश्मीरराज्येऽन्यतमः प्रशान्तः सीमन्तितस्सुन्दरसिन्धुनद्या ।
ललामभूतः किल भारतस्य लदाकनामा लसति प्रदेशः ॥

(३८)

किं मण्डलं चन्द्रमसो नराणां नतोन्नतं दर्शयितुं सुशीतम् ।
महीतले वीततृणो विशालो लदाकदेशो रचितो विधात्रा ॥

(३९)

समुच्चयो यत्र शिलोच्चयानां विना द्रुमैर्वल्लिकुलैश्च फुल्लैः ।
अनेकवर्णानवलोकनीयान् शिलाभिरेव प्रकटीकरोति ॥

(४०)

किमश्मवेश्मान इमे पुराणाः जीर्णा विशीर्णाः परितो विकीर्णाः ।
इतीव संदेहमितो दुहानाः समिन्धते सानुमतां समूहाः ॥

(४१)

यत्र स्रवन्निर्झरतीररूढैः श्यामैर्द्रुमैर्वल्लिकुलैरनेकैः ।
वहन्त्युरोभिर्विपुलैर्महीध्राः हरिन्मणीनामिव हारिहारान् ॥

(४२)

काश्मीरनाम्नः कवनीयभूम्नः राज्यस्य सा राजति राजधानी
आलिंगिता शीतलझीलनद्या श्रिया युता श्रीनगराभिधाना ।।

(४३)

झीलापगायास्सलिलैस्समृद्धः आवासनौकानिवहावरुद्धः ।
यतश्शिकाराख्यतरण्युदीर्णः सरोवरो भाति दलाभिधानः ।।

(४४)

जलाशये तत्र दलाभिधाने जनश्शिकाराप्लवनीयमानः ।
युवा युवत्या च नवोढया वा न वा कुटुम्बी रमते विरामे ।।

(४५)

पश्यन्ति पान्थाः प्लवमानमप्सु मनोज्ञमुद्यानमनेकमत्र ।
इदं हि लोके नितरां प्रसिद्धं जलप्लुतोद्यानवनाभिधानम् ।।

(४६)

चत्वार एते किमु पूरुषार्थाः मूर्ता विराजन्ति तटाकमध्ये ।
चत्वार इत्थं भ्रममादधन्ति चिनारसंज्ञास्तरवो विशालाः ।।

(४७)

तटे तटाकस्य दलाभिधस्य विभाति शीतामलतोय उत्सः ।
उत्सेषु राजेव विराजमानः यश्चश्मशाहीति यथार्थनामा ।।

(४८)

निशातनामोपवनं जनानां निर्विश्य निश्शेषतया निषेव्यम् ।
विनिद्रपुष्पद्रुमवल्लिपूर्णं निषिक्तमुत्सैर्निकटे निरीक्ष्यम् ।।

(४९)

काश्मीरभूम्याः कमनीयतायां उन्मादयन्त्यां हृदयंगमायाम् ।
सम्राट्स शृंगारपरो जहांगिर् किमत्र चित्रं विवशो यदासीत् ॥

(५०)

स शालिमार्संज्ञमभिज्ञ एतत् मनोज्ञमुद्यानवनं वितेने ।
पुष्पद्रुमैः पुष्पितवल्लरीभिः प्रपूर्णमुत्सैर्मृदुशाद्वलैश्च ॥

(५१)

शृंगारकामेन जहांगिरेन संगीतमाध्वीकरसोन्मदाभिः ।
संगस्य सौम्याभिरिह व्यधायि रंगो रसोत्तुंगरतोत्सवस्य ॥

(५२)

भूषा जुषाणा अवरोधयोषाः वेषेण पुष्पद्रुमनिर्विशेषाः ।
दोषा न पश्यन्निह विभ्रमार्थी तोषाय नूनं भ्रममाप भूपः ॥

(५३)

उत्साम्बुना पूरितमुत्तरंगं उद्यानमध्ये सर उल्ललास ।
विलासिनीभिर्विलसन्मुखीभिर्विडम्बयद्नम्बरमम्बुजिन्याः ॥

(५४)

कथं जहांगीरिह चक्रवर्ती रेमे पुरा यौवतचक्रवर्ती ।
कथामिमां बोधयितुं जनानां भाभारतीभ्यां क्रियते प्रयत्नः ॥

(५५)

वनेषु चोत्सेषु वधूजनेषु नदीषु वृक्षेषु नगावलीषु ।
यथाऽस्य लावण्यगुणस्तथैव विशिष्यते शिष्टगुणो नरेषु ॥

(५६)

सहस्रसंवत्सरपूर्वमत्र सरस्वतीसत्सुतवर्णनार्हाः ।
गीर्वाणवाणीकवयः प्रसिद्धाः चकाशिरे कल्हणबिल्हणाद्याः ॥

(५७)

अलंचकारात्र सभां नृपाणां क्षेमेन्द्रनामा स महाकविश्च ।
येन प्रबन्धाश्शतशः प्रशस्ताः प्रणिन्यिरे प्राञ्जलसंस्कृतेन ॥

(५८)

जगद्गुरुश्शंकर आदिमोऽपि वेदान्ततत्त्वावगमाय पूर्वम् ।
तेपे तपस्तीव्रमिहाभ्युपेत्य श्रीशंकराचार्यगिरौ प्रसिद्धे ॥

(५९)

व्यासेन संगृह्य वचः श्रुतीनां श्रीब्रह्मसूत्रस्य पुरा कृतस्य ।
अन्विष्य बोधायनभाष्यमायुः रामानुजाचार्यवरा अपीह ॥

(६०)

काष्ठे द्विषद्भिः दृढकीलितोऽपि क्रीष्टो विमुक्तो वयसः परार्धम् ।
काश्मीरमेत्यानयदित्युदन्तः आकर्ण्यते कश्चन भित्तिहीनः ॥

(६१)

गुरोर्मताद्यस्य महम्मदस्य महम्मदीया इह केशलेशम् ।
निक्षिप्य पूज्यं किल पेटिकायां हस्रत्बले मस्जिदि पूजयन्ति ॥

(६२)

क्षीराब्धिकन्या किल संबभूव दुर्गा पुरा दुर्गतिनाशनाय ।
मत्वेति किं मातरमत्र दुर्गां क्षीरेण सर्वे परिपूजयन्ति ॥

(६३)

काश्मीरराज्ये हिमशैलमध्ये प्राच्यां दिशि श्रीनगरस्य तस्य ।
गिरेर्गुहायाममरेश्वरस्य देवालयो भात्युमया युतस्य ॥

(६४)

दिवौकसां तारकपीडितानां स ईप्सतां तारकजित्कुमारम् ।
भद्राय पुत्रोद्भवमत्र कुर्वन् उपासितस्तैरमरेश्वरोऽभूत् ॥

(६५)

तदर्थमद्रेस्सुतया शिवस्य विवाहमैच्छंस्त्रिदिवौकसः प्राक् ।
परं तु कामं दहता शिवेन कामस्सुराणामभवन्स दग्धः ॥

(६६)

स्वयं ततश्शैलसुता कठोरं तप्वा तपस्तोषयति स्म शम्भुम् ।
व्युवाह गौरीं गिरिशोऽथ तेन बृन्दारकाणां च ननन्द बृन्दः ॥

(६७)

उमासमेतस्स पुरा पुरारिः चिरं परिभ्रम्य हिमाद्रिमौलौ ।
विश्रान्तिकामोऽमरनाथभूभृद्गुहामिमां प्रापदितीरयन्ति ॥

(६८)

श्रमापनोदाय शिवोऽप्युमायाः सुखेन सुप्तेति स तामजानन् ।
कपोतयोर्हदधतोस्स्वरेण शृणोति सैवेति कथाश्चकार ॥

(६९)

कान्ता परिश्रान्तिहृदां कथानामन्ते कृतान्तेन कृतेऽन्तकस्य ।
संतापिपापप्रभवस्य मृत्योरन्तं कपोतद्वयमप्यवाप ॥

(७०)

अद्यापि तावात्तकपोतरूपावमर्त्यभूतावमरेश्वरस्य ।
अनुग्रहं प्राप्तुमनन्यकामावत्रानुसंवत्सरमभ्युपेतः ।।

(७१)

भक्ताग्रगण्यौ परमेश्वरस्य शक्तो न तौ वीक्षितुमत्र सर्वः ।
सक्तश्शिवे शक्तियुते सदैव भक्तः परं पश्यति जातु कश्चित् ।।

(७२)

शैलस्य मौलावमरेश्वरस्य सरोवरो राजति रामनामा ।
यद्वारि नीचैः प्रसृतं हिमत्वं संप्राप्य धत्ते शिवलिंगरूपम् ।।

(७३)

रामश्शिवोऽयं शिव एव रामः भेदो न कश्चिच्छिवराममध्ये ।
आख्याति किं तत्त्वमिदं शिवत्वमालम्बितं रामसरोवराम्भः ।।

(७४)

प्रसन्नतोया धवलोपलेषु प्रवाहिता नद्यमरावतीति ।
प्रकामशीता शिवपादपूता प्रशान्तपापप्रभवा विभाति ।।

(७५)

प्रणन्तुकामाः अमरेशपादं भवन्ति तस्यामवगाह्य पूताः ।
शीतेन तस्यास्सलिलेन तेषां तापत्रयं दूरमपैति सद्यः ।।

(७६)

पुरो सुराणाममरावती किं पुरन्दरं नाकमितो निनीषुः ।
पुरो गिरेर्निर्झरिणी भवन्ती पुरारिमाराधयतीह पुण्या ?

(७७)

प्रभुं प्रणम्यामरनाथमत्र प्रसादरूपेण विभूतिकल्पम् ।
प्रपद्य चूर्णं पतदश्मनोऽधः प्रमोदते भक्तजनः प्रकामम् ॥

(७८)

यं सर्वलोकाः अमरावतंसं संसिद्धिदं श्रावणपूर्णिमायाम् ।
संसेव्य तां मांसलपांसुजातां संसारहिंसामवसाययन्ति ॥

(७९)

तं सेवितुं श्रावणपूर्णियामायान्ति दूरादमरेशशैलम् ।
भक्ता अनेके परिवारयुक्ताः एकाकिनो वा युवबालवृद्धाः ॥

(८०)

प्रस्थाय ते श्रीनगरात्समस्ते पुरारिदण्डं पुरतो विधाय ।
त्वंगन्ति संगम्य शनैश्शिवानि शिवस्य नामानि च शीलयन्तः ॥

(८१)

गत्वा पहल्गामिति नाम धाम सुखेन सर्वे शिवचिन्तनेन ।
तत्रोषिता ईषदथोषसैव प्रबुध्य यात्रां पुनरारभन्ते ॥

(८२)

लिड्डर्नदी यत्र गिरेस्स्रवन्ती शिलासु विच्योतति शीतलासु।
निनादिनी फेनिलपाण्डुतोया संघट्टयन्ती बृहदट्टहासा ॥

(८३)

श्रीशेषनागस्र्तुतनिर्झरिण्या समेत्य लिड्डर्तटिनी प्रसिद्धा ।
इमं वनश्यामगिरिप्रदेशं सीमन्तयन्ती वहतेऽत्र नित्यम् ॥

(८४)

तस्याः पुनर्दक्षिणतीरगेण मार्गेण गच्छन्त्यमरेशशैलम् ।
नीत्वा निशां चन्दनवाडिनाम्नि मध्येपथं चन्दनशीतधाम्नि ।।

(८५)

प्रस्थापिताश्चन्दनवाडितोऽथ प्रत्यूषकाले मिलिताः प्रदेशम् ।
प्रकामशीतासहवायुजन्यं प्रयान्ति ते वायुजनाभिधानम् ।।

(८६)

अत्युन्नतो दुर्गमशैलमार्गस्तत्रातिलङ्घ्यः पिशुनामधेयः ।
पादौ शिलीभूतहिमावृतासु शिलासु विन्यस्य पदन्तुदासु ।।

(८७)

अतीत्य तं गन्तुमशक्नुवद्भ्यः ततः परस्तादमरेशशैलम् ।
पैशुन्यतः किं पिशुनस्तदाख्यः कालेन जातः पिशुनाममार्गः ।।

(८८)

ये मार्गमेनं कठिनं कथंचित् तीर्त्वा क्षमन्तेऽमरनाथमाप्तुम् ।
भाग्यस्य तेषां पिशुनोऽथवा किं कालेन जातः पिशुसंज्ञमार्गः ।।

(८९)

आशेषनागस्त्रुतनिम्नगायाः शीतोदकायास्तरणाय कश्चित् ।
विनिर्मितो देवगणैरिवात्र विभाति सेव्यो हिमखण्डसेतुः ।।

(९०)

आशेषनागे नगशीर्षदेशे तदाह्वयः श्वेतजलस्तटाकः ।
आभाति तीरे शिशिरे यदीये आस्थीयते यात्रिजनेन रात्रौ ।।

(९१)

यदीयतोयोपरि वायुघातैः उद्भूतशब्दो भ्रममातनोति ।
शेषः किमाशीविष एष धत्ते रोषेण फूत्कारमिषेण घोषम् ॥

(९२)

प्रातः प्रबुद्धैरवलोकनीयस्तत्रातपो बालदिवाकरस्य ।
वने तुषारे पतितोऽवदाते तटाकतोये तरले तरंगैः ॥

(९३)

ततः परं वर्त्मनि वीक्षणीयः पुष्पावृतः कश्चन शैलशृंगः ।
घ्राणं सुमानां न हि तत्र कार्यं प्राणं निजं रक्षितुमिच्छुकेन ॥

(९४)

दिनावसाने तु समापयन्ति यात्रां पदे पञ्चतरिण्यभिख्ये ।
पदे यतः पञ्च झराः स्रवन्त्यः समेत्य तास्सिन्धुनदीभवन्ति ॥

(९५)

अन्येद्युरुत्थाय नवोषसाऽथ गच्छन्ति पुण्यामरनाथशैलम् ।
तीरेऽपसव्ये ह्यमरावतीये तीर्थं तिथौ तीर्णसुदुर्गमार्गाः ॥

(९६)

अस्त्यन्यदध्वामरनाथतीर्थमवाप्तुमस्योत्तरपार्श्वतोऽपि ।
मार्गस्स घण्टापथतोऽभ्युदेति ग्रामात्पुनर्बालतलाभिधानात् ॥

(९७)

पथा त्वनेनामरनाथमेत्य संसेव्य लिंगं विनिर्वर्तितुञ्च ।
एकेन शक्यं दिवसेन नूनं परं न तं यात्रिण आद्रियन्ते ॥

(९८)

हिमाद्रिकन्यां परिणीय शम्भुः तया रतिं यत्र चकार पूर्वम् ।
सेयं गुहैवामरनाथसंज्ञा यां वर्णयामास स कालिदासः ।।

(९९)

शिवः पिता शक्तिरियं च माता चराचराणां जगतां समेषाम् ।
परस्परं यत्र रते रतौ तौ असौ गुहा सेति समस्तसेव्या ।।

(१००)

शिवं हि वेदाः पुरुषं वदन्ति गुणात्मिकां तां प्रकृतिञ्च शक्तिम्
रतेन सृष्टिं प्रणयेन पुष्टिं रुषा विनष्टिं तनुतो हि तौ नः ।।

(१०१)

पीठं प्रकृत्यात्मकमातृयोनिः लिंगं च शम्भोः पुरुषात्मकस्य ।
तयोर्द्वयोस्संगतिरेव सृष्टिः इदं पुराणोदितलिंगतत्त्वम् ।।

(१०२)

हेमन्तशीतर्तुमिषे निशीथे सुदीर्घकालं प्रकृतिश्शयाना ।
सिसृक्षया पूर्ववदातनोति रतिं सकामा पुरुषेण साकम् ।।

(१०३)

विवर्धमानं तुहिनेन शीते लिंगं प्रकृत्यां वपतीव बीजम् ।
प्रसूयते येन वसन्तकाले प्ररोहभूयिष्ठमिह प्रकृत्या ।।

(१०४)

वर्षर्तुकाले चरितार्थमेतत् प्रणम्य लिंगं कवयोऽवयन्ति ।
सृष्टिः प्रकृत्याः पुरुषेण नित्यं संयोगतस्संभवतीति तत्त्वम् ।।

(१०५)

संक्षीय लिंगं तदनु क्रमेण तिरोभवत्येव शरद्व्यपाये।
हेमन्तशीतावसरे हिमेन प्रवर्धते पूर्ववदेव भूयः॥

(१०६)

प्रसूयमाना च पुनर्वसन्ते प्रसूनगुम्फैः परितः प्रवालैः।
प्रदर्शयन्ती प्रतिवर्षमित्थं दयामयी दीव्यति लोकमाता॥

(१०७)

एवं सनाथोऽमरनाथधाम्ना प्रान्तः प्रशान्तोऽमरराजहृद्यः।
काश्मीरनामा कविकामसीमा विद्योतते द्युद्युतिरद्वितीयः॥

(१०८)

काश्मीरलावण्यगुणैः कवीन्द्रः कान्तैरयं सुन्दरराजनामा।
आकर्षितस्तर्षहरं ववर्ष हर्षेण वर्षं कवितावघटायाः॥

इति श्रीमदाशुकविसार्वभौमविल्लूर्नडादूर्श्रीनिधिराघवाचार्यस्वामितनूजेन श्रीसुन्दरराजेन विरचितं 'सुरश्मिकाश्मीरं' समाप्तम्।



कामयेऽहम्

[रचयिता—डा० कृष्णकान्त शुक्लः, बरेली कालेजे
संस्कृतविभागाध्यक्षः]

(१)

न याचे पदं नापि वित्तं मनोज्ञं, न वा स्वर्गमेवाश्रये रम्यरम्यम् ।
परं सर्ववन्द्ये सुधासारभूते, पवित्रे स्वदेशे जनिं कामयेऽहम् ।।

(२)

सदा यच्च संशोभितं भव्यमर्त्यैरमर्त्यैश्चरित्रैस्तथा पुण्यकृत्यैः ।
विवेकप्रदीपैः सदा शोभमाने, सुरम्ये स्वदेशे जनिं कामयेऽहम् ।।

(३)

सुधामूर्तिभिर्वारिवेगैः पवित्रैर्युताभिर्नदीभिश्चिरं रक्ष्यमाणे ।
सुतीर्थैरनेकैर्विपन्नाशकेऽस्मिन् सुमेध्ये स्वदेशे जनिं कामयेऽहम् ।।

(४)

अहो ! यत्र देवाः स्वकीयं निवासं परित्यज्य नूनं जनिं कामयन्ते ।
शिवाराधनैकाग्रचित्ते प्रहृष्टे प्रफुल्ले स्वदेशे जनिं कामयेऽहम् ।।

(५)

दयाशीलशोभासदाचारयुक्ते, घृणाद्वेषमात्सर्यपारुष्यमुक्ते ।
प्रभोः केलिलीलाविहारे मनोज्ञे, विशिष्टे स्वदेशे जनिं कामयेऽहम् ।।

(६)

अपारं सुखं वैभवं चैव हित्वा, नृपा यत्र सम्यग् विरागं भजन्ते ।
प्रजापालकैर्नित्यलोकानुरक्तैः समृद्धे स्वदेशे जनिं कामयेऽहम् ।।

(७)

अहिंसापरे सत्यमार्गाधिरूढे दयाधर्मनिष्ठे गरिष्ठे वरिष्ठे ।
शिवे सुन्दरे दैवतैः प्रार्थ्यमाने वरेण्ये स्वदेशे जनिं कामयेऽहम् ।।

(८)

अनाचारमाला यदीयं प्रकृष्टं मनःसम्बलं भङ्क्तुमर्हन्ति नैव।
सदा स्वाभिमानैकरक्षापरेऽस्मिन् विमुक्ते स्वदेशे जनिं कामयेऽहम्॥

(९)

अजं निर्गुणं निर्विकल्पं निरीहं, परं ब्रह्म गोपीजने यत्र रक्तम्।
अपारे कृपापुण्यपीयूषपूर्णेऽभिरामे स्वदेशे जनिं कामयेऽहम्॥

(१०)

न वा यत्र शोको न मोहो न दर्पो न वाकाण्डरोषो न दोषप्रसर्पः।
सदा शान्तिदे हर्षदे मोददेऽस्मिन्नखण्डे स्वदेशे जनिं कामयेऽहम्॥

(११)

जडे नश्वरे व्याधिकेन्द्रे शरीरे रुचिं यत्र विज्ञा न कुर्वन्ति नित्यम्।
सदा चेतनोपासनापण्डिते वै विशोके स्वदेशे जनिं कामयेऽहम्॥

(१२)

अभेद्येऽविनाश्येऽविशोष्ये ह्यदाह्ये तथाचिन्तनीयेऽमले चात्मतत्त्वे।
सदा कृष्णदेवस्य वाणीविबुद्धे विशुद्धे स्वदेशे जनिं कामयेऽहम्॥

(१३)

परानिर्वृतिर्यत्र काव्ये कवीनां मुदा प्राप्यते भावकैर्भावुकैश्च।
सदा भारतीवल्लकीघोषयुक्ते कलाभे स्वदेशे जनिं कामयेऽहम्॥

(१४)

महाधैर्ययुक्ता जना यत्र नित्यं स्वकीयेषु धर्मेषु सक्ताः सतोषम्।
प्रियैर्भावितभावैः समुद्वेलितेऽस्मिन्नुदारे स्वदेशे जनिं कामयेऽहम्॥

(१५)

क्वचिद्धास्ययुक्ते, क्वचिल्लास्यसक्ते, क्वचित्काव्यरक्ते, क्वचिच्छास्त्रभक्ते।
क्वचिद्दर्शने वन्दने दत्तचित्ते सुविद्ये स्वदशे जनिं कामयेऽहम्॥

(१६)

क्वचिद्रामचन्द्रे, क्वचित्कृष्णचन्द्रे, क्वचिच्छक्तिपादे, क्वचिच्छक्ति-
नाथे ।
क्वचित्कर्मकाण्डे, क्वचिज्ज्ञानकाण्डे, विनम्रे स्वदेशे जनिं कामयेऽहम् ।

(१७)

विभिन्नेऽप्यभिन्ने, कृतघ्नेऽप्युदारे, करालेऽपि नम्रे, हताशेऽपि साशे ।
अधन्येऽपि धन्ये, विनिन्द्येऽप्यनिन्द्ये प्रशस्ते स्वदेशे जनिं कामयेऽहम् ॥

(१८)

चले वित्तजाते वितृष्णां दधाने स्थिरे कीर्तिपुञ्जे चिरं श्रद्धधाने ।
सदाचारगम्ये गिराग्रामरम्ये गभीरे स्वदेशे जनिं कामयेऽहम् ॥

(१९)

मृषाभाषिणां स्वार्थसंसाधकानामहङ्कारभारैरलं तुन्दिलानाम् ।
विचारा न यं मूढतां प्रापयन्ति स्वतन्त्रे स्वदेशे जनिं कामयेऽहम् ॥

(२०)

प्रजातन्त्रभक्ता जना जागरूकाः स्वकीयैर्मतैः क्रान्तिमाहूय मौनम् ।
चमत्कृत्य विश्वं स्थिता यत्र तस्मिन् विदग्धे स्वदेशे जनिं कामयेहम् ॥

(२१)

प्रकृत्याः नवैर्वैभवैः शोभमाने तथा मातृभूभक्तकृत्यैः स-माने ।
त्रिरङ्गध्वजेनाखिलं मण्यड्माने तटस्थे स्वदेशे जनिं कामयेऽहम् ॥

(२२)

हृदा प्रेमभावैः सहिष्णुत्वपूर्णैरशेषेषु देशेषु कान्तिं दधाने ।
प्रमोदैः प्रभावैः सदा सेव्यमाने प्रबुद्धे स्वदेशे जनिं कामयेऽहम् ॥

(२३)

विकासैरशून्ये, विलासैस्तु शून्ये, वदान्यैरलुप्ते, स्ववीर्येण गुप्ते ।
सदा दोषमोषे, भरद्राष्ट्रकोषेऽविपन्ने स्वदेशे जनिं कामयेऽहम् ॥

(२४)

स्वरूपस्थिते, ध्वस्तनिद्राप्रपञ्चे, समर्थे, स्थिरे,राजनीतिप्रवीणे।
अपारे, ससारे, सुरूपे, सुशोभे नयज्ञे स्वदेशे जनिं कामयेऽहम्॥

(२५)

गिरं संस्कृतां भाषमाणेऽनवद्ये विचारेषु रम्येष्वथो राजमाने।
सहिष्णुत्वशोभे समे धर्मभावे कृतज्ञे स्वदेशे जनिं कामयेऽहम्॥

(२६)

उदारैर्गुरूणां गणैः शासितेऽस्मिन् विनेयप्रभाद्योतिते कर्मजाले।
अमेयां स्थितिं सर्वतो धार्यमाणे सुविद्ये स्वदेशे जनिं कामयेऽहम्॥

(२७)

सतां मानदे, सर्वथोत्कोचशून्ये, बलात्कारहीने, सुवृत्तप्रधाने।
निसर्गाजिरे सर्वदा मोदमाने ललामे स्वदेशे जनिं कामयेऽहम्॥

(२८)

सदा न्यायरक्षाविधानैकदक्षे परार्तिप्रणाशाय वै बद्धकक्षे।
स्ववीर्येण गुप्ते, प्रकर्षेण युक्ते, प्रचण्डे स्वदेशे जनिं कामयेऽहम्॥

(२९)

विकासं निजैः साधनैर्गाहमाने विशिष्टां स्थितिं विश्वमञ्चे दधाने।
जगन्मङ्गले चानिशं चेष्टमाने बलिष्ठे स्वदेशे जनिं कामयेऽहम्॥

(३०)

विवेकप्रियैः साधुवृत्तैरमात्यैश्चिरं शासकैः शासितेऽभीष्टवृत्ते।
वकैर्वञ्चकैश्चाटुकारैर्विमुक्ते प्रकृष्टे स्वदेशे जनिं कामयेऽहम्॥

(३१)

गुणानां गणा यत्र पूजां भजेयुर्धनं पक्षपातादयोऽस्तं व्रजेयुः।
समाना च प्रीतिर्भवेत्तादृशेऽस्मिन् गुणज्ञे स्वदेशे जनिं कामयेऽहम्॥



अष्टकद्वयम्

[डा० उमाकान्त शुक्लः, मुजफ्फरनगरम् (उ०प्र०)]

।। श्रीश्रद्धाष्टकम् ।।

हृदां स्पन्दनं नन्दनं चेतनानां गतिः पादयोर्हस्तयोर्मौनिबन्धः ।
प्रगे वन्दनं चन्दनं माल्यमीड्यं समग्रं ततं श्रद्धया तां भजेऽहम् ।।१।।
वियोगे यदश्रुप्रवाहो विबाधं यदाशाप्रतानं प्रियप्रीतिरद्धा ।
स्मितं कोप ईर्ष्या चटुर्वावियोगे समग्रं ततं श्रद्धया तां भजेऽहम् ।।२।।
श्रुतीनां प्रमाणं निधीनां निधानं नदीनां निनादो मतीनां प्रसादः ।
मधूनां मदो वैभवं वा विभूनां समग्रं ततं श्रद्धया तां भजेऽहम् ।।३।।
धराया ध्रुवत्वं जलानां जडत्वं दृढा दीप्तिरग्नेर्गतिर्वानिलस्य ।
अनन्तस्य वानन्तता व्याप्तिमत्त्वं समग्रं ततं श्रद्धया तां भजेऽहम् ।।४।।
मधौ कोकिलः सान्ध्यगीतिर्निदाघे घनानां घटा प्रावृषि प्रोतधारा ।
सरोजच्छटा काशकेलिः शरत्सु समग्रं ततं श्रद्धया तां भजेऽहम् ।।५।।
कवित्वं कवेः शिल्पकारस्य शिल्पं स्वराणां क्रमो गीतिकारस्य रम्यः
ऋषीणां दृशो मौनमुद्रा मुनीनां समग्रं ततं श्रद्धया तां भजेऽहम् ।।६।।
पृथिव्यां च यन्मातृभावप्रतिष्ठा प्रथा प्रस्तराद्येषु या देवतायाः ।
स्तुतिर्वा नुतिर्वाऽथवा मन्त्रतन्त्रं समग्रं ततं श्रद्धया तां भजेऽहम् ।।७।।
सुधा वा विषं वा ध्रुवं वाध्रुवं वा विरागोऽथ रागो निवृत्तिः प्रवृत्तिः।
अणुर्वा महद्वा वनं वा पुरं वा समग्रं ततं श्रद्धया तां भजेऽहम् ।।८।

(यां विना न क्रिया काचिद् यां विना न स्थितिः क्वचित् ।
यां विना जीवनं फल्गु तां श्रद्धामास्थया भजे ।
इत्युमाकान्तशुक्लेन कृतं श्रद्धाष्टकं मुदा ।
यः पठेज्जीवनं तस्य मङ्क्षु सौहित्यमाप्नुयात् ।।)

।। श्रीस्वतन्त्रताष्टकम् ।।

तरङ्गरङ्गरिङ्गणैर्मिलिन्दमन्द्रगुञ्जनैः ।
त्वया नुता मया नुता समैर्नुता स्वतन्त्रता ।।१।।

प्रसार्य पक्षतिद्वयं खगेन गायता दिवि ।
अहो प्रमोदपूरिता विलोकिता स्वतन्त्रता ।।२।।

हिमालयेन लेखनीविडम्बनैः स्वसानुभिः ।
नभःप्रपत्रके मुदा नु टीकिता स्वतन्त्रता ।।३।।

स्वयं वृतेन सिन्धुभिः प्रमोदिना ह्युदन्वता ।
स्ववीचिवल्लकीस्वरैः प्रकीर्तिता स्वतन्त्रता ।।४।।

गृहे गृहे त्रिवर्णकैर्ध्वजैः समुच्छ्रतैः सदा ।
सुरम्यरागपट्टकैरलङ्कृता स्वतन्त्रता ।।५।।

मनस्वितैकगायकैर्मनुष्यताभिमानिभिः ।
स्वरक्तबिन्दुविद्रुमैः प्रसाधिता स्वतन्त्रता ।।६।।

प्रभूतभाग्यशालिनस्त एव कीर्तिवल्लभाः ।
सदैव यैरवेक्षिता समेधिता स्वतन्त्रता ।।७।।

इयं सुधावधीरणी श्रुतिप्रपूरणी प्रपा ।
प्रमोदतां प्रवर्धतां प्रमाणिका स्वतन्त्रता ।।८।।

विलिख्यतां मनःपटे प्रगीयतां नवैर्लयैः ।
प्रगृह्यतां वितीर्यतां विभूतिभिः स्वतन्त्रता ।।९।।

उज्जयिनीयं जयति

[डा० रमाकान्तशुक्लः]

क्षणमपि दृष्टा यालोकयितुर्नातु जहाति न चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥
उज्जयिनीयं जयति विशाला कविगणवन्द्या नित्यम्॥

उद्घाटयति निजं हृदयं ब्रूते निजकथा अतीताः
श्याममृत्तिका पृष्टा प्रेम्णा यस्या लोकातीता।
कालिदास - शूद्रक - विक्रमवेताल- त्रिलक्षणघटनाः
कविकुलवर्णितविविधदेशवस्तूच्चयरीतिविरचनाः॥
प्रत्यक्षं तनुते मानसमोदाय समेषां सततम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥१॥

उदयनवादसवदत्ता - 'सेना'चारुदत्त-कल-गाथाः
केकीत्रासककबरीभाराः सुरभिलधूपसनाथाः।
लोलापाङ्गैर्लसितास्तन्व्यः श्यामा मध्ये क्षामाः
श्रोणीभारादलसितगमनाः तन्त्रीवादनकामाः॥
पदे पदे साक्षात्क्रियन्ते यत्र सहृदयैर्नित्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥२॥

हारास्तारास्तरला गुटिका भाण्डसमूहा भव्याः
पुष्पस्तवकाः शेखरहारा माला नव्या नव्याः।
शिप्रावाताः कविसंघाता महाकालशिवभक्ताः
शास्त्रकाव्यनाटकसंगीतानां गोष्ठीष्वनुरक्ताः॥
यत्राद्याप्यविरतं हरन्ति प्रेक्षावतां सुचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥३॥

अत्रैवाभिरूपभूयिष्ठा विक्रमपरिषत् शुशुभे
या कविकालिदासकृतनाटकवीक्षणाय खलु लुलुभे।
अत्रैवापरितोषाद्विदुषां कविना यत्नोऽकारि
बाणो विजहारात्र निश्चितं सहृदयहृदयविहारी॥
अत्रागत्य जायते चित्तं शिवं सुन्दरं सत्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥४॥

शिप्रास्नानं यत्र धर्मिणः कलिमलदारणनिपुणम्
अर्थकामिनो विपणिविभागं नानापण्यसुपूर्णम्।
कामकामिनोऽभिमतं स्थानं नवलविलासोल्लसितम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गैः प्रथितम्॥
क्षीरसागरं यान्ति च रसिका नद्यो यथा समुद्रम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥५॥

'चल चल भामिनि चल सिंहस्थं द्वादशवर्षैर्लब्धम्'
'चल गजगामिनि कार्तिकमेलाक्षेत्रं कौतुकलुब्धम्'।
'चल मूढे क्रीणामि सुमाल्यं मालीपुरे त्वदर्थम्'
'अहो श्रूयते कार्तिकमासे शृणु शृणु कोकिलविरुतम्'॥
यत्रेत्थं चाटूयति रमणो दयितानिर्दयचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥६॥

प्रतिवर्षं खलु यस्याः शिप्रातीरे विचलितधीरे
'माच'दर्शनोत्सुकैर्मालवैः मेलाशीतसमीरे।
अविदितगतयामा रजनी नीयतेतरां निश्चिन्तम्
झंझावाते घनघनवर्षे वापि शीतले नीरे॥
अहो मधुरिमा, अहो प्रमोदो यस्या अतुलो नित्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥७॥

रविकरचुम्बितकमलविकासैः मदकलसारसनादैः
मालविकानां सुमधुरहासैः विबुधशिरोमणिवादैः।
देवोत्थानवह्निखेलाभिनवनवदीपविलासैः
भैरवगढमुद्रितवस्त्राणां चेतोहरैः सुहासैः॥
बालवृद्धयूनां परिहासैर्या जयति जगच्चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥८॥

चमरपुच्छिका'खण्डितकन्दुक'कुसुममनोहरवर्षैः
कविकविताप्रस्तुतिवेलायां सहृदयसुहृदां हर्षैः।
अतिथीनां विदषां सचेतसां सुमनोरथचंक्रमणैः
व्याससमासरीतिवक्तव्यैः भावानां संक्रमणैः॥
कीर्तिमन्दिरं भाति हि यस्याः कालिदासमहमहितम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥९॥

पक्षप्रहारैश्चञ्चुश्लेषैः गुटरगुटरगूँकारैः
मानैरनुधावनैरथो मदनाज्ञापालनचारैः।
द्वाभ्यां तथा तृतीयस्योत्सारणैर्यत्र निःशुल्कं
अश्मभ्योऽपि हि प्रेमकलामुपदिशति कपोतसमूहः॥
विक्रमकीर्तिमन्दिरं तद्यस्या अक्षय्यं वित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥१०॥

हरसिद्धि योगेश्वरसदनं मङ्गलनाथं रम्यं
भर्तृहरेर्गह्वरं, चाश्रमं सान्दीपनेः पवित्रम्।
ज्येष्ठगणेशं, पञ्चमुखं हनुमन्तं भवभयहरणम्
दर्शनीयमथ नानातत्त्वं यस्यां विस्मयकरणम्॥
वीक्ष्य भवति नहि कस्य मनो वद श्रद्धा-विस्मयभरितम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥११॥

---

१. 'गिलहरी' इति हिन्द्याम्। २. 'गेंदा' इति हिन्द्याम्।

यत्रागत्य निर्वर्तितुमिच्छति नैत्रागन्तुकलोकः

श्रावं श्रावं यस्या गाथां तृप्तिं याति न लोकः।
स्मारं स्मारं यस्या विभवं भवति विस्मितो लोकः
पायं पेयं यस्या शोभां माद्यति सर्वो लोकः॥
यस्या विरहो जनयति मोहं, व्यथयति दृढमपि चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥१२॥

विहरति विहसति विलसति नृत्यति
या मानसे न केषाम्?
सुखयति मदयति रमयति रसयति
या मानसं न केषाम्?
सरला सरसा मुग्धोदारा
या न कृते वत केषाम्?
शुभदा सुखदा वरदादरदा
या राजते समेषाम्।
सर्वशुक्लया वाग्देव्या खलु
यत्र समोदं हसितम्॥
उज्जयिनीयं जयति विशाला
बुधजनवन्द्या नित्यम्॥१३॥

(इयं कविता लेखकेन उज्जयिन्यां ३०.११.१९८२ तारिकायां विरच्य तस्मिन्नेव दिने कालिदासजयन्ती-रजतसमारोहावसरे उज्जयिनीस्थे 'कालिदास-अकादमी'-भवने समायोजितायां कविगोष्ठ्यां पठितासीत्)



देववाणी-परिषद्वार्ता

(१) अर्वाचीनसंस्कृतस्य पञ्चमवर्षपूर्तिः

१५-१०-१९८३ ई० तारिकायां देववाणी-परिषदस्त्रैमासिकपत्रस्य 'अर्वाचीनसंस्कृतस्य' पञ्चमवर्षपूर्तिः सञ्जाता। अस्मिन्नवसरे परिषदोऽध्यक्षैराचार्यरमेशचन्द्रशुक्लमहाभागैः पञ्चमवर्षे चतुर्थोऽङ्कः समुन्मीलितः, अर्वाचीनसंस्कृतरचनानां सर्वेक्षणस्यावश्यकता च सविशेष प्रतिपादिता।

(२) श्रीपादसप्ततेः श्रीपादपरागव्याख्यायाः समुन्मीलनम् अक्षरश्लोकं च

२१-१०-१९८३ ई० तारिकायां देववाणी-परिषदस्तत्त्वावधाने नयीदिल्लीस्थे भारतीयविद्याभवने समायोजिते भव्यसमारोहे भारतीयसर्वोच्चन्यायालयस्य न्यायाधीशैः न्यायमूर्ति श्री वी०बालकृष्ण एराडि-महाभागैः परिषत्प्रकाशितायाः डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथ-प्रणीतायाः 'श्रीपादपरागा'ख्यायाः 'श्रीपादसप्तति'-व्याख्यायाः समुन्मीलनं कृतम्। अस्मिन्नवसरे, मुक्तिस्थले विराजमानायाः महिषासुरमर्दिन्याः मन्दिरे श्रीपादसप्तर्ति रचितवतो नारायणभट्टपादस्य सविशेषं परिचयं प्रस्तुवन्तो राष्ट्रीय-बीजनिगमाध्यक्षाः श्री के०पी० अच्युतमेननमहाभागाः श्रीपादसप्तर्ति श्रीपादपरागं चावलम्ब्य स्वविचारान् प्रकटोचक्रुः। समारोहस्याध्यक्ष्यं काशीहिन्दूविश्व-विद्यालयस्य प्राक्तन-कुलपतिभिः डा० वेणीशंकरझा-महाभागैः कृतम्।

ग्रन्थोन्मीलनानन्तरम् 'अक्षरश्लोकं' समायोजितमभूत् यत्र न्यायमूर्ति-श्री वी० बालकृष्णएराडि - पण्डितविष्णुकान्त शुक्ल-डा० स्वामिनाथ—श्री के०पी० अच्युतमेनन-पं० पद्मनाभशास्त्रि - श्री विश्वनाथशर्म-रमाकान्त शुक्लैश्च सहभागित्वं निर्व्यूढम्।

(३) 'मौरिशस' देशवासिनां संस्कृतानुरागिणामभिनन्दनम् 'आन्ताराष्ट्रिक-संस्कृतसम्मेलनेभ्योऽपेक्षा'-इति विषये विचारगोष्ठी, 'सुरश्मिकाश्मीर'स्य पाठश्च।

२०-११-१९८३ ई० तारिकायाम् 'आर ६ वाणी-विहार, नयी दिल्ली-५९' इति स्थाने देववाणी-परिषदस्तत्त्वावधाने 'मौरिशसः'-देशवासिनां संस्कृतानुरागिणामभिनन्दनं समनुष्ठीयत। अस्मिन्नवसरे समारोहाध्यक्षेण डा० मण्डन मिश्र-महाभागेन देववाणी-परिषत्प्रकाशितग्रन्थार्पणेन मौरिशसदेश-वासिनः श्रीसुरेश रामवर्ण—श्री परमानन्द रामलखन—श्रीदामोदर तुलसी-महाभागाः समभिनन्दिताः। परिषन्महासचिवेन डा० रमाकान्तशुक्लेन

परिषत्कार्यकलापानां परिचयः प्रदत्तः। अभिनन्दितैर्विद्वद्भिरुक्तं यत् संस्कृतं संस्कृतिश्च तेषां प्रतिष्ठे स्तः।

अस्मिन्नवसरे '**आन्ताराष्ट्रिकसंस्कृत-सम्मेलनेभ्योऽपेक्षा**' इति विषयमवलम्ब्य समायोजितां विचारगोष्ठीं समुद्घाटयन् केन्द्रीयशिक्षामन्त्रालये संयुक्तपरामर्शदाता डा० रामकरणशर्ममहाभागः प्रत्यपीपदत् यद् विश्वसंस्कृतसम्मेलनेषु '**संस्कृतं लोकजीवनं चे**'ति विषयमवलम्ब्य विचारो यदि क्रियते तदा नून संस्कृताध्ययनस्य नूतन आयामः समुद्घाटितः स्यात्। शिक्षामन्त्रालये उपपरामर्शदात्रा डा० सी०आर० स्वामिनाथ-महाभागेन सूचना दत्ता यत्संस्कृतपाठानाम् अथ च वेदपाठानां ध्वन्यंकितटेपकैसेटाः भारते निर्मिताः। तेषामुपयोगोऽपि संस्कृतप्रचारार्थं हितकरः स्यात्। डा० रमाकान्तशुक्लेन 'षोडश संस्काराः' 'संस्कृतं संस्कृतिश्चे'त्यादिषु कतिपयेषु विषयेषु वीडियोफिल्मनिर्माणस्याप्यावश्यकता रेखाङ्किता।

गोष्ठ्यनन्तरं भारतसर्वकारस्य योजनायोगे संयुक्तसचिवेन श्रीसुन्दरराजमहाभागेन '**सुरश्मिकाश्मीरम्**' इत्येतस्य स्व काव्यस्य पाठः कृतः यस्य प्रकाशनं परिषदाङ्गीकृतम्। परिषदा श्रीसुन्दरराजकृता 'श्रीबदरीशतरङ्गिणी'ति काव्यरचनापि प्रकाशिता।

अस्मिन्नवसरे डा० रमाकान्तशुक्लस्य प्रस्तावे '**भारत-मौरिशस-सांस्कृतिक-मैत्री-परिषद्**' इत्येतन्नाम्नी संस्थापि स्थापिता जाता यस्या गठनं कर्तुं डा० मण्डनमिश्रमहाभागोऽधिक्रियत।

परिषदध्यक्षैः डा० रमेशचन्द्रशुक्लमहाभागैः धन्यवादज्ञापनं कृतम्।

(४) **देववाणी-परिषदोऽध्यक्षस्याभिनन्दनम्** ११-१२-१९९३ तारिकायाम् अलीगढ़नगरे देववाणी-परिषदोऽध्यक्षवर्याणामाचार्यश्रीरमेशचन्द्रशुक्लमहाभागानामभिनन्दनं संवृत्तम् यत्र 'आचार्यश्रीरमेशचन्द्रशुक्लाभिनन्दनसमारोहसमित्या' प्रकाशितः '**आम्भृणीयम्**' इत्याख्योऽभिनन्दनग्रन्थः केन्द्रीयशिक्षामन्त्रालये उपपरामर्शदातृभिः डा० सी० आर० स्वामिनाथमहाभागैराचार्यशुक्लेभ्यः समर्पितः। समारोहस्याध्यक्ष्यं भारतसर्वकारस्य शिक्षामन्त्रालये संयुक्तपरामर्शदातृभिः डा० रामकरणशर्ममहाभागैः कृतम्। डा०परमानन्दशर्म-डा० हरवंशलालशर्म—डा० मनोहरलाल गौड—डा० श्रीनिवास मिश्रप्रभृतिभिरनेकैर्विद्वद्भिराचार्यशुक्लमहाभागानां व्यक्तित्वमुपश्लोकितम्। अभिनन्दन-समितेः संयोजकेन डा० सत्यप्रकाशशर्मणा आभारः प्रकटीकृतः।

(५) **देववाणी-परिषदः संस्कृताशुलिपेर्विकासस्य स्वप्नः साकारतां गतः**

देववाणी-परिषदः सत्प्रेरणया श्रीगोपालदत्तबिष्टमहाभागेन संस्कृते आशुलिपिर्विकासिता। देववाणी-परिषदोऽष्टमस्थापनादिवसे १३-१२-१९८३ ई० तारिकायाम् श्री बिष्टमहाभागेन राजस्थानविश्वविद्यालय-संस्कृत-विभागाध्यक्षस्य डा० रामचन्द्रद्विवेदि-महाभागस्य आध्यक्ष्ये समायोजिते संस्कृताशुलिपि-प्रदर्शने भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये संयुक्तपरामर्शदातुः डा० रामकरणशर्मण उपपरामर्शदातुः डा०सी०आर० स्वामिनाथस्य, देववाणी-परिषदो महासचिवस्य डा० रमाकान्त शुक्लस्य डा० द्विवेदिमहाभागस्य च संस्कृतवक्तव्यानि आशुलिप्यां निबद्ध्य देवनागरीलिप्यां प्रत्यंकितानि।

स्मरणीयं विद्यते यत् २१-३-१९८० ई० तारिकायां परिषदस्तृतीय-वार्षिकाधिवेशनावसरे परिषन्महासचिवेन डा० रमाकान्तशुक्लेन संस्कृताशुलिपेर्विकासार्थं पञ्चसहस्ररूप्यकात्मकः पुरस्कारः समुद्घोषित आसीत्। तदनु नैकवारं नैकत्र तेन संस्कृते भाषमाणानां विदुषां विचाराणां द्रुतगत्या लेखनार्थं संस्कृताशुलिपेर्विकासाय श्रीबिष्टप्रमुखा आशुलिपिज्ञाः प्रचोदिताः। परिषदश्चतुर्थपञ्चमसंयुक्त-वार्षिकाधिवेशनावसरे 'संस्कृताशुलिपेर्विकासस्य सम्भावना' इति विषयमवलम्ब्य एका विचारगोष्ठी अभ्यायोजिता बभूव यत्र अनेकैर्विद्वद्भिस्साकं हिन्द्याशुलिप्यां विश्वकीर्तिमानधारिणा श्रीगोपालदत्त-बिष्टमहाभागेनापि विचाराः प्रकटिताः। विद्वद्भिर्गोष्ठ्यामनुभूत यदाशुलिलिपिज्ञानां संस्कृतविदुषां च समवेतैः प्रयासैः संस्कृताशुलिपेर्विकासः सम्भवः।

अथ परिषदा संस्कृताशुलिपेर्विकासयोजना अनुदानार्थं विचाराय केन्द्रीय-शिक्षामन्त्रालये प्रेषिता। तत्र केवलं पुरस्कारराशिरेव (पञ्चसहस्ररूप्यकात्मकः) मन्त्रालयेन स्वीकृतः। परिषदा १५-१०-१९८३ तारिकायां अर्वाचीनसंस्कृते अन्यासु च सर्वगन्धा-पारिजातादिषु पत्रिकासु १३-१२-१९८३ तारिकायां ११-०० वादनकाले समायोज्यमानायाः संस्कृताशुलिपि-प्रतियोगितायाः सूचना प्रकाशिता। तदनुसारं केवलं श्रीबिष्टमहाभाग एवैतत्कार्यार्थं परिषत्कार्यालये १३-१२-१९८३ तारिकायां यथासमयं सम्प्राप्तः। ततश्च शिक्षामन्त्रालये तेन संस्कृताशुलिपेः प्रदर्शनं कृतम्।

संस्कृताशुलिपिविकासार्थं श्रीबिष्टमहाभागाय पञ्चसहस्ररूप्यकात्मकः 'श्रीगणेश-पुरस्कारः' परिषदः सप्तमवार्षिकाधिवेशने समर्पयिष्यते। पुरस्कार-

राशिदानार्थं भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालयो धन्यवादार्हः ।

इत्थं परिषदः संस्कृताशुलिपेर्विकासस्य स्वप्नः साकारतां गतः । इदानीं संस्कृतसंस्थानानि विश्वविद्यालयाश्च पारस्परिकं पत्रव्यवहारम् द्रुतगत्या संस्कृते कर्तुं समर्थाः भवेयुः ।

(६) देववाणी-परिषदस्त्रिदिवसीयः संस्कृत-संगीत-नाट्यसमारोहः सम्पन्नः

देववाणी-परिषदा १९८३ तमेशवीयेऽब्दे दिसम्बरमासस्य २८, २९, ३० तारिकासु नवदिल्ल्याः श्रीराम सेण्टर फॉर आर्ट एण्ड कल्चर इत्येतत्प्रेक्षागृहे संस्कृतसंगीतकस्य संस्कृतनाट्यसमारोहस्य चायोजनं कृतम् ।

आयोजनस्योद्घाटनं भारतसर्वकारस्य शिक्षामन्त्रालये उपपरामर्शदातृभिः डा० सी० आर० स्वामिनाथमहाभागैः कृतम् । तैरस्मिन्नवसरे प्रकाशिता 'विवरणिका' (Brochure) अपि समुन्मीलिता । उद्घाटनसमारोहस्याध्यक्षं परिषदः प्राक्तनाध्यक्षैः डा० कृष्णकान्तशुक्लैः सम्पादितम् ।

२८-१२-१९८३ तारिकायां 'संस्कृतसङ्गीतकम्' सम्पन्नम् । अस्मिन् भरतनाट्यविशारदया सुश्रीकमलिनीदत्तमहाभागया श्रीमुत्तुस्वामिदीक्षितरसंस्कृतरचनामवलम्ब्य 'गणपतिस्तुतिः' 'अन्नपूर्णास्तुति'श्च भरतनाट्य-शैल्या प्रस्तुते । तदनन्तरं 'तिलाना'-क्रमेऽनया डा० रमाकान्त शुक्ल-प्रणीता 'सुरभारती विजयते'-इतीयं रचना नृत्येन संयोजिता । अग्रिमप्रस्तुत्यामनया 'अङ्गुल्याः कः कपाटं प्रहरति'इत्यादि राधामाधवसंवादमनुसृत्य 'संवादनृत्यम्' प्रस्तुतम् ।

श्रीगोदादेवी-संघसदस्याभिः कमलिनीदत्तमहाभागाया निर्देशने रागमालिकाधारेण 'भाति मे भारतम्' नाम नृत्यं डा० रमाकान्तशुक्लस्यैतन्नाम्नीं संस्कृतरचनामवलम्ब्य प्रस्तुतम् । तदनु चेमाभिः श्रीवल्लभाचार्यकृतं 'मधुराष्टकम्' जयदेवकृतं दशावतारं (गीतगोविन्दान्तर्गतं) चावलम्ब्य 'गोफगुन्थन'-रास-शैल्यां निबद्धं नृत्यं प्रस्तुतम् ।

संस्कृतसंगीतकस्य द्वितीये भागे मुजफ्फरनगरस्थ-'श्रीरामदरबार'-संस्थायाः सर्व श्री पं० गोपाल-शुकदेव-कौशलेन्द्र-राघवेन्द्रशर्मबन्धुभिः संस्कृते रामकथायाः गायनं कृतम् । शर्मबन्धुभिः वाल्मीकि-व्यास-कालिदास- वेंकटाध्वरि-तुलसीदास-उमाकान्तशुक्लानां रचनाभ्यः केचन अंशा उद्धृत्य पौरस्त्य-पाश्चात्य-सङ्गीत सामञ्जस्य कारिण्या मनोज्ञया अनितरसाधारण्या स्वसमूहगानपद्धत्या प्रस्तुताः ।

२९-१२-१९८३ तारिकायां सुश्रीकमलिनीदत्तनिर्देशने, शाहजहान-नृपतिना पण्डितराजोपाधिना सम्मानितस्य रसगंगाधर-गंगालहरी-चित्रमीमांसा-खण्डन-भामिनीविलासादि-ग्रन्थैः संस्कृतसाहित्यमलंकुर्वतो नैकभाषासु कृत-परिश्रमस्य, प्रौढविदुषः कवेश्च जगन्नाथस्य विषये प्रवर्तितां किम्वदन्तीमव-लम्ब्य डा० रमाकान्तशुक्लप्रणीत 'पण्डितराजीयं' नाम संस्कृतनाटकं प्रयुक्तम्। अस्मिन्नाटके पण्डितराजस्य श्रीवलदेवानन्दसागरः, शाहजहानस्य श्रीविश्वनाथ-शर्मा, लवङ्ग्या हेमलता, सम्राज्ञाः कु० शशिवाला गुप्ता, असूयकपण्डितस्य च भूमिकां श्री प्रमोद दुआ ससाफल्यं निरवहन्। सर्वश्रीरमणकुमारशर्म-गणेशप्रसाद-तनूजा-शशिपालशर्म-मालती गुप्ता-जयशंकर-रमाकान्त शुक्लै-श्चापि विविधा भूमिकाः निर्व्यूढाः। संगीतनिर्देशनं श्री छोटेलालः, प्रकाश-योजनां श्री नरेन्द्रकुमारः सूरी, रङ्गसज्जां श्री एच०एस० रावतः, प्रसाधनं श्री नरेश खरे वेशभूषारचनां च श्री ए० बिन्दलः समनुतिष्ठत्।

२५-१-१९८३ तारिकायां देववाणी-परिषदः षष्ठवार्षिकाधिवेशनावसरे कमलिनीदत्त-महाभागाया निर्देशने प्रथमं प्रयुक्तस्य 'पण्डितराजीयस्य' अयं द्वितीयः प्रयोग आसीद्यत्र तया निर्देशने किञ्चिन्नावीन्यं संयोजितम्। तया पुरातनपरम्परानूतनप्रयोगयोः सामञ्जस्येन संस्कृतनाट्यजगति काचिद्विशिष्टा स्फूर्तिः सञ्चारिता।

३०-१२-१९८३ तारिकायां सुश्रीकमलिनीदत्त-निर्देशन एव 'पुरश्चरण-कमलम्' इतीदं संस्कृतनाटकं प्रयुक्तमजायत। नाटकमिदं पं० सूर्यकान्तत्रिपाठि 'निराला'-कृतां 'राम की शक्ति पूजा'-इति हिन्दी कवितामाधारीकृत्य डा० रमाकान्तशुक्लेन प्रणीतम्। नाटकेऽस्मिन् सर्वश्री-वलदेवानन्दसागर-मालती गुप्ता-कु० शशिवाला गुप्ता-शशिपालशर्म-विश्वनाथशर्म-रमणकुमारशर्म-गणेशप्रसाद-केदारदत्तशास्त्रि-चन्द्रमौलिशुक्ल-जयशंकर-गोवर्धन सेमवाल-राकेश आहूजा-रतनकुमार-भूपेन्द्रपुरोहित-रमाकान्तशुक्लैश्च विविधा भूमिका अनु-ष्ठिताः। संगीतादिनिर्देशनं यथापूर्वमेवासीत्। संगीतकारेषु सर्वश्रीवर्मन-मतलूब हुसैन-पवननायडू प्रभृतयः कलाकारा आसन्।

३०-१२-१९८३ तारिकायामेव परिषत्प्रकाशितस्य 'पुरश्चरणकमलम्' इत्येतन्नामकस्य ग्रन्थस्य 'समुन्मीलनोत्सवोऽप्यायोजयत यत्र राष्ट्रियसंस्कृत-संस्थान-निदेशकस्य डा० मण्डन मिश्र महाभागस्य अध्यक्षतायां सुख्यातसमा-लोचकेन डा० नगेन्द्रमहाभागेन डा० रमाकान्तशुक्लप्रणीतं 'पुरश्चरणकमलम्' नाम संस्कृतनाटकं समुन्मीलितम् (विमोचितम्)। ग्रन्थस्य प्रथमं प्रतिरूपं

दिल्लीविश्वविद्यालयस्य हिन्दी-विभागाध्यक्षायै डा० निर्मला-जैनमहाभागायै समर्पितमभूत् । अस्मिन्नवसरे अभिभाषमाणेन डा० नगेन्द्रमहाभागेन निगदितं यत् 'पुरश्चरणकमलं' हि निरालाकृतकवितायाः नाटकीय तत्त्वं सफलतया समुन्मीलयति ।

नाट्यसमारोह-समापनवेलायां मुख्यातिथिना डा० नगेन्द्रमहाभागेन संस्कृतसंगीतकस्य नाट्यसमारोहस्य च निर्देशिका सुश्रीकमलिनीदत्तमहाभागा देववाणी-परिषत्पक्षतः समभिनन्दिता ।

(६) उत्तरप्रदेशसंस्कृताकादमी देववाणी-परिषत्प्रकाशितग्रन्थार्थं पुरस्कार-मुद्घोषितवती

देववाणी-परिषदा प्रकाशिता डा० शिवदत्तशर्मचतुर्वेदप्रणीता 'स्फूर्ति-सप्तशती' त्रिसहस्ररूप्यकात्मक-(३०००.००) विशिष्टपुरस्कारेण, पण्डित-विष्णुकान्त-शुक्लप्रणीतश्च 'पूर्णकुम्भः' (ललितनिबन्धसंग्रहः) आचार्य रमेशचन्द्र शुक्लप्रणीतम् 'अभिनवहनुमन्नाटकं' च एकसहस्ररूप्यकात्मकपुरस्कारेण (१०००-००) सत्करिष्यन्ते उत्तरप्रदेशसंस्कृताकादम्या ।

पुस्तक-परिचयः

हरियाणा-संस्कृत-वृत्तम् । लेखकः श्री रामेश्वरदत्त शास्त्री । प्रकाशकः हरियाणासंस्कृतसम्मेलनम्. भिवानी (हरियाणा) । संस्करणम् प्रथमम्, १९८२, ई० । मूल्यम् १६.०० रूप्यकाणि ।

अस्मिन् ग्रन्थे विदुषा लेखकेन १३३ मन्दाक्रान्तावृत्तेषु हरियाणाप्रदेशोद्भूतानां संस्कृतविदुषां, कवीनां, संस्कृतज्ञानां, संस्कृतसंस्थानां संस्कृत-विद्यालयानां च परिचयो दत्तः । नेतॄणां प्रशंसायुगे विदुषां प्रशंसा नूनं लेखकस्य सारस्वतसाधनां द्योतयति । अस्य ग्रन्थस्य ऐतिहासिकं महत्त्वं विद्यते । दिङ्मात्रमुदाह्रियते पद्यमेकं यत्र म०म० पं० छज्जूरामविद्यासागरस्य परिचयो दीयते—

'छज्जूरामः' सहृदयसुधीर्यो 'रिटोली'-निवासी
सत्साहित्यं प्रचुरमलिखत् काव्यनाट्ये सुरम्यम् ।
प्राचार्यत्वात्परममभजद् गौरवं शिक्षकेषु
पाण्डित्यं किं श्रयति विबुधं पण्डितो वा दधाति ।

(पृ० ४६/पद्य० २२)

लेखकेन पद्यानां हिन्दीव्याख्यापि कृता । श्री रामेश्वरदत्तशास्त्रिमहाभागः ग्रन्थप्रणयनार्थमभिनन्द्यते । (र०का०शु०)

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

❋

१. प्रकाशन का स्थान	नयी दिल्ली
२. प्रकाशन की आवधिकता	त्रैमासिक
३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
४. सम्पादक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूंजी के एक प्रतिशत से अधिक के हिस्सेदार हैं।	देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद् दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१. कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्) रु० ५.००
२. श्रीबदरीशसुप्रभातम् (,, ,,) रु० १०.००
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (,,) रु० ४०.००
४. श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः) रु० ३०.००
५. सुगमरामायणम् (,, ,,) रु० ३५.००
६. श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायण दीक्षितः) रु० २०.००
७. भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः) रु० ३५.००
८. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.००
९. आभाणकमञ्जरी (,, ,,) रु० १५.००
१०. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.००
११. रघुवंश : एक विश्लेषण (,, ,,) रु० २०.००
१२. अभिज्ञानशाकुन्तल : एक विश्लेषण (,,) रु० २०.००
१३. कालिदास की कला और संस्कृति (भाग २) (,,) रु० ६०.००
१४. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.००
१५. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्डः) (,,) रु० ३० ००
१६. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरिपादः) रु० ४०.००
१७. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः) रु० २०.००
१८. भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
१९. अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण-विमर्श (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
२०. साधारणीकरण : प्राच्य और प्रतीच्य चिन्तन : (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
२१. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.००
२२. संस्कृत साहित्य में राष्ट्रिय भावना (भाग १) (डा० हरिनारायण दीक्षित) रु० ५०.००
२३. संस्कृत साहित्य में राष्ट्रिय भावना (भाग २) रु० ७०.००
२४. ,, ,, ,, (भाग ३) रु० ५०.००
२५ (सम्पूर्णग्रन्थः एकस्मिन् पुटबन्धे) रु० १५०.००
२६. साहित्यकौतुकम् (काव्यम्) (पं० टी०वी० परमेश्वर अय्यरः) रु० ४०.००
२७. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २० ००
२८. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.००
२९. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.००
३०. श्रीबदरीशतरङ्गिणी (काव्यम्) श्रीसुन्दरराजः रु० २०.००
३१. सुरश्मिकाश्मीरम् (,,) (,,) रु० ५.००
३२. पुरश्चरणकमलम् (नाटकम्) (डा०रमाकान्त शुक्लः) रु० ६.००
३३. श्रीउच्छिष्टमहागणपतिकल्पः (डा०सी०आर० स्वामिनाथन्) रु० ८.००

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

षष्ठवर्षे द्वितीयोऽङ्कः
१५ अप्रेल १९८४

प्रधानसम्पादकः
डा० रमाकान्तशुक्लः
एम० ए०, पीएच० डी०, साहित्याचार्यः,
सांख्ययोगाचार्यः



प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

परामर्शदातृमण्डलम्

विषय-सूची

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20.00 (भारते)
पौण्डद्वयं डालरपञ्चक वा (विदेशेषु

Annual Subscription
Rs. 20.00 (In India)
5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्त शुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली - ११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (६/२)। प्रधान सम्पादकः—डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-४-१९८४।

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य षष्ठवर्षीये द्वितीयेऽङ्के लेखपञ्चकम्, द्वे कविते, देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता नवप्रकाशनचर्चा च दीयन्ते।

'जय भारतभूमे'-काव्यस्य मूल्याङ्कनम्-इत्ययं शोधलेखः कुमायूँविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण डा० हरिनारायणदीक्षितमहाभागेन मयराष्ट्रविश्वविद्यालयस्य संस्कृतप्राध्यापक - परिषदो दशमाधिवेशने २५-३-१९८४ ई० तारिकायां पठितः। अस्मिन् १९८१ ईशवीये प्रकाशितस्य 'जय भारतभूमे'-इत्येतस्य काव्यस्य विषये भावपक्ष-कलापक्ष-दृशा विदुषा लेखकेन विचारो विहितः।

'गन्धदूतस्य समीक्षा' इत्यस्मिन् लेखे आचार्यरमेशचन्द्रशुक्लमहाभागैरद्यत्वे अलीगढ़ -विश्वविद्यालयस्य संस्कृतविभागे 'प्रोफेसर'-पदमलङ्कुर्वद्भिः डा० परमानन्दशास्त्रिभिः कतिपयवर्षपूर्वं रचितं दूतकाव्यं-'गन्धदूतं' समधिकृत्य समीक्षा प्रस्तुता। सुरापानदोषान् उद्घाटयता कविना यद्यद्रचनाकौशलं प्रदर्शितम् तत्सर्वं समीक्षकस्य सूक्ष्मेक्षिकया साक्षात्कृत्यालोचितम्। आचार्य शुक्ल-महाभागैरुद्धरणदानपुरस्सरं काव्यस्य वस्तुनः, दिल्ली-वाराणसी-मार्गस्थनगरादिवर्णनानां, काव्यगतसूक्तीनां भाषाशैल्याश्च गद्य-पद्यमयी समीक्षा झटित्यर्थसमर्पण-शीलायां भाषायां प्रस्तुता।

'विंशशताब्दीयसंस्कृतवाङ्मयाय पञ्चाम्बुप्रदेशस्य योगदानम्' इत्यस्मिन् विस्तृते निबन्धे होशियारपुरस्थे विश्वेश्वरानन्द-शोधसंस्थाने प्राध्यापकेन डा० शिवप्रसाद भारद्वाज-महाभागेन महता परिश्रमेण पञ्चाम्बुप्रदेशस्य विदुषां विंशशताब्दीय - संस्कृतवाङ्मयाय योगदानमुपवर्णितम्। लेखकेन निबन्धोऽयं वर्षत्रयपूर्वं लिखित आसीत्। अतोऽद्यास्मिन् लेखे परिवर्धनमपि सम्भाव्यते। लेखकेन अविभाजित-पञ्चाम्बुप्रदेशं दृशि निधाय लेखोऽयं निर्मितः। विदुषा लेखकेन सर्वेक्षणात्मकेऽस्मिन् निबन्धे पञ्चाशत्प्रायविदुषां रचना ग्रन्थाश्च संक्षेपत आलोचिताः। तेन स्पष्टं स्वीकृतमस्ति यन्निबन्धे प्रदत्ताभ्यः सूचनाभ्य इतरा अपि सूचनाः सम्भवन्ति किन्तु तत्सकाशे निबन्धलेखनकालं यावत्तासां ज्ञानं नासीत्। अतः, अतिरिक्तसूचनादानार्थं पाठकाः सविशेषमनुरुद्ध्यन्ते। अद्य तत्तत्क्षेत्रेषु पञ्चाम्बुप्रदेशस्य यद्यद् योगदानमस्ति तत्कस्य लोचनगोचरं नास्ति? किन्त्वेतेन प्रदेशेन संस्कृतक्षेत्रेऽपि बहु योगदानं कृतमिति परिज्ञानार्थमयं निबन्धो नितरामुपयोगी अस्ति।

विंशशताब्दीयरामकाव्यपरम्परायां 'श्रीरामविलाप:' - इत्येतस्मिन्निबन्ध एतत्पंक्तिलेखकेन विंशशताब्दीयरामकाव्यपरम्परायाः संस्कृत-रचनानां किञ्च श्रीकृष्णप्रसादधिमिरे-रचितस्य 'श्रीरामविलापम्' इत्येतत्काव्यस्य संक्षिप्तः परिचयो दत्तः। लेखस्यास्य पूर्वभागः अखिलभारतीय प्राच्यविद्या-सम्मेलनस्य विगतेऽधिवशने जयपुरस्थ-राजस्थानविश्वविद्यालये पठितः आसीत्। इमं विषयं पल्लवयितुं शोधार्थिनः सादरं समाहूयन्ते।

'महाकविमुनिश्रीज्ञानसागरस्य संस्कृतकाव्येषु गीतानि'-इत्यस्मिन् शोधपत्रे कुमायूँ-विश्वविद्यालयस्य संस्कृत-विभागे प्राध्यापिकया डा० किरण टण्डन-महाभागया विंशशताब्दीयस्य जैनमुनेः श्रीज्ञानसागरस्य संस्कृतरचनासु गीतयोजना समीक्षिता। विविधोदाहरणैस्तयेदं प्रतिपादितं यद्-ज्ञानसागरेण स्व काव्येषु गीतानां रचना रागनिर्देशपुरस्सरं कृता। रागाणां यः समयो संगीतशास्त्रानुसारं गानार्थं निर्दिष्टस्तस्मिन्नेव काले कवयितुः पात्राणि तानि गीतानि गायन्ति।

'ईहे' शीर्षकेण या श्रीसुन्दरराजविरचिता कवितात्र दीयते तस्या अवदाता पृष्ठभूमिस्तु तत्प्रारम्भ एव पाठकैः विलोकनीयास्ति।

'भाति मौरीशसम्' - इत्यस्यां रचनायामेतत्पंक्तिलेखकेन 'मौरीशस' देशस्य प्राकृतिकं सांस्कृतिकं च रामणीयकं संकेतितम्। इयं रचना मौरीशसस्य 'मोका'स्थे-महात्मा गांधी - संस्थाने १७-३-१९८४ तारिकायां रात्रौ पादोन-दशवादनवेलायां सर्वप्रथमं मया पठितासीत्। अयं ह्यवसरः स आसीत् यदा १४—१७-३-१९८४ तारिकासु तत्र समायोजितं संस्कृत-सम्मेलनं समापनं याति स्म। मौरीशसस्य गवर्नरजनरलो महामहिम डा० सर शिवसागर रामगुलाम-महाभागः समापनोत्सवस्य मुख्यातिथिरासीत्। अहं तत्पार्श्वं एव स्थित आसम्। मया यदा मौरीशसमवलम्ब्य रचितायाः कवितायाः विषये असौ महानुभावः सूचितस्तदा तेन कवितां श्रोतुं स्वौत्सुक्यं प्रकटितम्। तेन सार्धनववादनकाले ततो गन्तव्यमासीत्। यदा तत्सचिवस्तमानेतुमायातस्तदा तेन भोजपुर्यां स उक्तः "पहले इनकी कविता सुनब तो चलब' (अर्थात् प्रथममस्य कवितां शृणुयाम् तर्हि चलेयम्)। तदनन्तरं मया पठितायाः अस्याः कवितायाः साक्षात् 'टेलीविजन'-प्रसारणमभूत्। श्रोतृभिरस्या कवितायाः करतल-ध्वनिभिरतीवाभिनन्दनं कृतम्। डा० सर शिवसागररामगुलाम महाभागैरस्या अनुवादस्याप्यावश्यकतानुभूता। अनेकैः सज्जनैरस्याः प्रतिकृतिराकांक्षिता। तस्मिन्नेव दिने होलिकाप्यासीत्। समापनोत्सवानन्तरं महात्म-गान्धि-संस्थान-परिसर एव होलिकादहनमभूत्। अग्रिमे दिने च 'स्वस्तिका'-मन्दिर परिसरे-होलिका - क्रीडा राष्ट्रीयस्तरेण समायोजियाभूत्। तत्राप्यनेकैर्महानुभावैरस्याः कवितायाः प्रतिलिपिर्वाञ्छिता। मया शीघ्रमेव

अस्याः प्रकाशनं तत्र प्रतिश्रुतम्। तत्र आकाशवाणीतोऽप्यस्याः प्रसारणमभूत्। तच्छ्रुत्वा अनेकाभिर्व्यक्तिभिरस्याः प्रतिलिपिर्लब्धुं समीहिता। अर्वाचीनसंस्कृते प्रकाशनानन्तरमियंकविता सर्वसुलभा भविष्यतीति विश्वस्यते।

अस्याः कवितायाः अधिकांशः १७.३.१९८४ तारिकायामेव मया व्यरच्यत। पद्यद्वयं स्वस्तिकायां होलिका-क्रीडानन्तरं रचितमासीत्। अस्यां कवितायां पञ्चषानि पद्यानि मम 'भाति मे भारतम्' इतिशीर्षक-रचनातो यथावत् किञ्चित्परिवर्तनसहितानि वा समाविष्टानि। मया मौरीशसदेशेऽवलोकितं यत्प्रवासिनां भारतीयानां समाजे भारतीयसंस्कृतिस्तथैव विलोक्यते यथा भारतवर्षे। अतः पञ्चषानि पद्यानि उभयोर्देशयो विषये प्रासङ्गिकानि सन्ति। मौरीशस-दृश्यावलोकनं मया श्री दामोदर तुलसी-श्री परमानन्द रामलखन-श्री प्रेम हरिनाग-श्री सुरश रामवर्ण-श्री त्रिभुवन जी - आचार्य रवीन्द्र नागर-महाभागैस्साकं कृतम्। तैः परिमितेऽपि काले मौरीशसस्याधिकतमः परिचयो मह्यं प्रदत्तः। दृश्यावलोकनवेलायां डा० सी०आर० स्वामिनाथ-महाभागानां सान्निध्यमपि सुखकरमासीत्। दृश्यावलोकनानन्तरमेव मया पद्यानि रचितान्यासन्।

वार्तालापप्रसङ्गे मौरीशसदेशे भारतीयोच्चायुक्त श्री प्रेमसिंह-महाभागेन, तत्रैव प्रथमसचिवेन श्री चन्द्रदेव सहाय-महाभागेन श्रीमदनमोहन वडेरा-श्री गोयल-श्री टण्डन-प्रभृतिभिस्तत्रत्याधिकारिभिः पत्रकारप्रवर श्री राजेन्द्र-अरुणेन, चि० अनुरागनागरेण, वयोवृद्धसाहित्यकारैः श्रीवासुदेव बिष्णुदयाल-महाभागैरन्यैश्चाप्यनेकैः सुहृद्भिः तत्रत्यः सांस्कृतिकः परिचयः महत्या आत्मीयतया दत्तः इत्येते सर्वे महानुभावा अपि एतद्रचनायां कारणीभूताः सन्ति। एतान् प्रति स्वकृतज्ञतां निवेदयामि। एतानि पद्यानि भारत-मौरीशस-साहित्यिक-सांस्कृतिक-मैत्रीभावाय समर्प्यन्ते।

देववाणी-परिषद्वार्तायां विगत मासत्रये समायोजितानां परिषत्कार्यकलापानां संक्षिप्तं विवरणं दीयते।

कृपालवः पाठकाः अङ्कमवलम्ब्य स्वविचारान् प्रेषयितुं सादरं प्रार्थ्यन्ते। विदुषां वशंवदः

रमाकान्त शुक्लः

१५.४.१९८४ ई०   (रमाकान्त शुक्लः)
प्रधान सम्पादकः

'ईहे'

श्री श्रीसुन्दरराजः
आइ०ए०एस०, एम०एस सी० (रसायनशास्त्रं)

(ऐषमः फर्वरीमासे एकविंशदिनांके (२१-२-१९८४) नवदिल्लीनगरस्थित-भारतीयविद्याभवने देववाणी-परिषदा समायोजिते (स्वकीयकाव्य) ग्रन्थोन्मीलनोत्सवे कविना श्रीसुन्दरराजेन प्रणीय पठितानि पद्यानि)

इन्धे सिन्धुरवदनो बन्धुर्वन्धं हरन्प्रणन्तृणाम् ।
गन्धापोहितविघ्नः सन्धत्ताज्ञानमन्धसमसं नः ॥

खण्डिताखिलपाखण्डैः पण्डिताखण्डलैरिमाम् ।
मण्डितां मण्डलीं वन्दे[1] दण्डवत्पतितो भुवि ॥

इदं मम महानन्दप्रदं सुदिनमागतम् ।
यदहं विदुषां मेऽद्य निदध्यां पुरतः कृतिम् ।:

उदरे कलयन्लोकान् स दरीभूति सादरः ।
बदरीशतरङ्गिण्या बदरीशः प्रसीदतु ॥

गाढमप्यविगाढानां गूढेतररसं मम ।
वाढं सुरश्मिकाश्मीरं वोढाऽस्ति महती मुदम् ॥

काव्यं नव्यमिदं भाव्यं नाभव्यमिति भावुकैः ।
श्राव्यं बहुश्रुतैश्चापि सेव्यं सहृदयैर्बुधैः ॥

शैल्या शीलनशालिन्या शैलः पालितभारतः ।
कालिदासेन योऽवर्णि बालिशेन मया पुनः ॥

लेशं गुणानामप्यस्यामाशंसेयुर्बुधा इति ।
आशया कविता सेयं क्लेशदा कलिता मया ॥

नाहं धनं वा स्वर्णं वा गेहं वा देहिनां[2] प्रियम् ।
ईहे कवितया जेतुं स्नेहं हि विदुषां परम् ॥

जयति वियति वाणी वीणया शोभमानः
जयति जगति तस्याः जीवितं देववाणी ।
जयति भणितुमीशः कोऽपि यो देववाण्या
जयति परिषदेषा सेवया देववाण्याः ॥

---

१. "कुण्डलीकृत्य मे वपुः" इति पाठान्तरम् ।
२. "मतम्" इति पाठान्तरम् ।

'जय भारतभूमे' काव्यस्य मूल्याङ्कनम्

(डा० हरिनारायण दीक्षितः, संस्कृतविभागाध्यक्षः
कुमायूँ विश्वविद्यालयः, नैनीतालः (उ०प्र०)

(क) रचनापरिचयः

'जय भारतभूमे' नामकमेकं पद्यकाव्यं ईशवीये भू-वसु-ग्रह-भूमिते (१९८१) अब्दे 'देववाणी-परिषद्, दिल्ली' तः प्राकाश्यमायातमस्तीति नव-नवरचनास्वाध्यायशीलानां प्रगतिशीलानां सुरगवीसमुपासकानां विदितचरमत्र भवेदिति मन्ये। काव्यस्यास्य प्रणेता रससिद्धः कविवरो डॉ० रमाकान्तशुक्लो वर्तते; यो हि भारतराष्ट्रराजधान्यां नवदिल्ल्यां वाणीविहारे आर-षष्ठे स्वीये आवासे विहितवासो संस्कृतभाषायाः सत्क्रियात्मकौ तीव्रतमौ प्रचार-प्रसारौ विदधानो महासचिवत्वेन च देववाणीपरिषद सेवमानोऽनारतं संस्कृतसाहित्यश्रीवृद्धये भव्यभाषाभावभरितं काव्यसम्पदं विरचयन् संस्कृतसाहित्य-संसारे लभ्यमानसम्मानो वरीवृत्यते।

अस्मिन् काव्ये समानभावानां सप्तानां कवितानां समावेशो वर्तते। तासां क्रमेण नामानि सन्ति-१-जय भारतभूमे, २-भजे भारतम्, ३-मम भारतं विजयते, ४-भारतभूतिर्विलसति, ५-जय भारतमेदिनि विश्वनुते, ६-भारताख्यः स्वदेशः, ७-दिव्यं मम भारतं चेति। एतासु 'जय भारतभूमे' कवितायामष्टाविंशतिः, 'भजे भारतम्' कवितायां चापि अष्टाविंशतिः, 'मम भारतं विजयते' कवितायामेकादश, 'भारतभूमिर्विलसति' कवितायां द्वादश, 'जय भारतमेदिनि विश्वनुते' कवितायां नव, 'भारताख्यः स्वदेशः' कवितायां द्वादश, तथा 'दिव्यं मम भारतम्' कवितायामष्टौ पद्यानि सन्ति। सर्वाणि चेमानि समवेतानि भूत्वा अष्टोत्तरशतसंख्यकानि भवन्ति। यद्यपि पुस्तकेऽस्मिन् 'जय भारतभूमे' वर्जं स्थाने-स्थाने निर्धारितानि 'भजे भारतम्'—'मम भारतं विजयते'—'भारतभूमिविलसति'—'जय भारतमेदिनि विश्वनुते'—'भारताख्यः स्वदेश.'—

'दिव्यं मम भारतम्' चेति स्वरूपाणि शीर्षकाणि अस्याः कृतेः संग्रहात्मकत्वं प्रकटयन्ति; किन्तु सर्वेषु एषु शीर्षकेषु प्रतिपाद्य-विषयस्य ऐक्यमालोक्य मामको मतिः अस्यां कृतौ शतककाव्य-त्वच्छविमनुभवति; न तु तथा आपातमनुभूतं संग्रहात्मकत्वरूपम्। मन्ये यत्कविवरेण डाक्टरशुक्लमहाभागेन स्वविरचित—'भाति मे भारतम्' इत्याख्यशतकाव्यवदेव (यन्मम दृष्टौ 'मालाकाव्य' संज्ञाधारणेऽपि समर्थम्) एतद् 'जय भारतभूमे' नामकमपि काव्यं शतककाव्यरूपेणैव (मम मतेन मालाकाव्यरूपेणैव वा) प्रणीतमस्ति।

(ख) भावपक्षः

एतत्काव्यमधीत्य पाठकस्य मनसि कविनिष्ठायाः स्वदेशभक्ति-भावनायाः समुदयो भवतीति निश्चप्रचमेव। यतो हि अस्मिन् काव्ये प्रारम्भादवसानपर्यन्तं भारतभूमेरेव गरिमा महिमा वा पाठकस्य अनुभूतिविषयो वोभवीति नान्यत्ततः परं किमपि। कवेः दृष्टौ भारतभूमिः जन्मभूमित्वात्स्वर्गादपि गरीयसी विद्यते (पृ० सं० ३)। इदमेव कारणमस्ति यत्तेनास्या रचनायाः आरम्भिकेषु अष्टा-विंशतिपद्येषु विविधविशेषणैः भारतभूमिं सम्बोध्य तस्या भूरिशो जयकारः कृतोऽस्ति। सः स्वदेशं भारतं प्रियं मन्यते; स्वीयां वा मातृभूमिं पवित्रां मन्यते; भारतस्य भारतभूमेर्वा इयं प्रियता पवित्रता वा सर्वेषामेव मनःपटले विहितास्पदा वर्तते। अत एव सः प्रसन्नेन मनसा स्वदेशं दिव्यभूतं भारतं भजते—

मदीयः स्वदेशः प्रिय भारतं मे
मदीया प्रिया मातृभूमिः पवित्रा।
इतीत्थं त्रिलिङ्ग्यां जनैर्गीयते यो
भजेऽहं मुदा भारतं तं स्वदेशम्।
भजे तं मुदा भारतं दिव्यदेशम्॥

(पृष्ठ संख्या, ४५)

कविवरो डा० शुक्लमहाभागो निजदेशस्य प्रणमनीयता—कीर्त्तनीयता—वन्दनीयतादिरूपाः विशेषताः समनुभूय स्वदेशं प्रण-

मति; कीर्त्तयते; वन्दते च; सहैव च कामयते यत्स्वदेशोऽनारतं वृद्धि, मुदं शोभां च प्राप्नोतु—

प्रणम्यः प्रणम्यो मया यः स्वदेशः
सदा कीर्त्तनीयः सदा वन्दनीयः।
सदा वर्धतां मोदतां राजतां यो
भजेऽहं मुदा भारतं तं स्वदेशम्।
भजे तं मुदा भारतं दिव्यदेशम्॥

(पृष्ठसंख्या, ४८)

एवं प्रतिभाति यदेष कविवरो निजदेशे भारते भृशं स्निह्यति; अत्यधिकं समादरं धारयति; महतीं च श्रद्धां करोति। अनेनैव हेतुना अयमभिलषति यद् भारते कमपि जनं क्षुधा नैव पीडयेत्; निवासाभावो न बाधेत; वस्त्रहीनता च न संस्पृशेत्; कुत्रापि चात्र कस्यापि केनापि शोषणं नैव क्रियेत; विदुषामुपेक्षा नैव भवेत्; दरिद्रता नैव जायेत; दुर्बलता च नैव सम्पीडिता स्यात्—

उपेक्ष्येत नो यत्र वैदुष्यपुञ्जो
न वै वर्धतां यत्र दारिद्र्यपुञ्जः।
तथा दुर्बलाघात आस्तां न यत्र
भजेऽहं मुदा भारतं तं स्वदेशम्।
भजे तं मुदा भारतं दिव्यदेशम्॥

(पृष्ठसंख्या ४७-४८)

काव्येऽस्मिन् कवेरियमपि हार्दिकीच्छा समभिव्यज्यते तदत्र भारते देशद्रुहां, दस्यूनां, कामकीटानां, वञ्चकानां, तस्कराणां कर्त्तव्यभ्रष्टानां च सुतरामभावो भवेत्। एवमेव सः बलात्कार-हत्या-अपहार-प्रहार-अशिक्षा - वधूदाह - भिक्षाचारादीनां निन्द्यानां जघन्यानां देशापकीर्त्ति-कराणाम अकृत्यानां कर्मणां पूर्णरूपेण लोपं कामयते। तस्य च विश्वासोऽपि वर्त्तते यदेषामपकृत्यानामवश्यमेव लोपो भविष्यति—

(क) नितान्तं विहीनः कदाचित्तु यः स्याद्
गृहस्फोटकैर्दस्युभिः षिड्गसङ्घैः ।
तथा वञ्चकैस्तस्करैर्भ्रष्टकृत्यैः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(ख) बलात्कारहत्यापहारप्रहाराः
अशिक्षावधूदाहभिक्षाप्रजाराः ।
कदाचित्तु लुप्ता भविष्यन्ति यस्मात्
(अवश्यं विलुप्ता भविष्यन्ति यस्मात्)
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥ (पृ० ४४-४५)

कविवरोऽयं स्वदेशस्य भारतदेशस्य तांस्तानपि दुर्लभान् सद्गुणान् अभिव्यनक्ति यैरयं स्वदेशो विश्वबन्धुतामापद्यमानः सर्वत्रैव सततं धवलं यशो विन्दते । एतैरेव च सद्गुणैर्भारतदेशोऽन्ताराष्ट्रिये प्राच्ये विश्वक्षितिजे भास्करायमाणो विद्यते—

(क) कुटुम्बं धरित्री दया यस्य मित्रं
मनुष्यत्वसेवा यदीयोऽस्ति धर्मः ।
असत्यं च शत्रुः समस्तेऽपि लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥ (पृ० ३५)

(ख) स्वकीयां बुभुक्षां पिपासां नियम्य
सदा रक्षिता येन भीताः प्रपन्नाः ।
यमाहुर्विदग्धास्तथा शान्तिदूतं
भजेऽहं मुदा भारतं तं स्वदेशम् ॥
भजे तं मुदा भारतं दिव्यदेशम् ॥ (पृ० ३६)

(ग) विश्वस्य बान्धवं यन्मोक्षस्य साधकं यत् ।
गायच्च पञ्चशीलं मम भारतं विजयते ॥ (पृ० ५०)

(घ) आशावादरताया आदर्शोद्घोषणासुनिपुणायाः ।
यस्या निखिलापीयं वसुधैव कुटुम्बकं भवति ॥ (पृ० ५२)

सहृदयहृदयधुरीणस्य कविवरस्यास्य मान्यतास्ति यदेषास्माकीना भारतभूमि: जागृतिशीला, क्रान्तिविलासा, कान्तियुता, सम्मानयुता, विद्वत्तोषिणी, मानसपोषिणी, समरविराविणी, शान्तियुता, सत्य-अहिंसा-परहित-करुणा-सर्वंसहता-प्रीतिधरा च वर्त्तते। एवमेव हरिनामामृततृप्ता, प्रेय:श्रेय:साधनिका, ब्राह्मक्षात्रप्रभापूरा सती व्यापारयुता, अमितकर्मयुता, जनगणमनोजयगानयुता भूत्वा त्याग-भोगभूमिरपि विद्यते (पृष्ठ संख्या, २६-२७)। अत्रत्या भारतीया: जना: राष्ट्रभक्तिं भगवत्पूजामिव मन्यन्ते तथा अत्रत्यां दुरवस्थां समूलमुन्मूलयितुं कृतसंकल्पा अनारतं यतमाना: सन्ति (पृष्ठसंख्या, ३१)। आध्यात्मिकतारूपिणी परमस्पृहणीया सम्पत्ति: भारतस्यैव सविधे वरीवर्त्ति; यया समस्तसंसारस्य दु:खसंघातसंक्षयो विधातुं शक्यते। मनोऽभिरामा विविधा कला अपि भारते एव लोचनातिथी-भवन्तीत्यत्रापि कवेरस्य न संशय: (पृष्ठसंख्या, ४०-४१)। अत्रत्या एव जना आत्मवीरतामादधाना: क्रोधमक्रोधेन, असाधुतां साधुतया, कदर्यतां दानवीरतया, हिंसा चाहिंसया जेतुं प्रभवन्तीति विलक्षण-मेवास्ति वैलक्षण्यं 'भा'रतस्य स्वीयस्य भारतस्य (पृष्ठसंख्या ५३)। अत्रत्यायां संस्कृतौ लोकसंस्कृतौ चापि महदुपयोगित्वमाकर्षकत्वं च विद्येते। विविधविध-लोकनृत्य-मेला-महोत्सव-सस्कार-व्रत-पर्वणां यादृशानि मनोऽभिरामाणि समायोजनानि स्वीये भारतदेशे भवन्ति, तादृशानि अन्यत्र सुदुर्लभान्येव सन्ति। एभिरपि भारतभूमेर्महिमा सुतरां संवर्धते एव (पृष्ठसंख्या, १७-१८, ३३, ४२, ५०)। प्रकृतिजन्या च यावती शोभा भारते भाति, तावती अन्यत्र क्वापि न लोचनगोचरीभवति। भारते एव षण्णामृतूनामसीमं नयनमनोहारि च वैभवं लोकै: समनुभूयते; येन भारतं सदैव 'भा'रतं सन्तिष्ठते (पृष्ठसंख्या, २२-२३, ५१, ५५, ५८-६०)।

स्वीये भारते देशे विभिन्नभाषा-धर्म-सम्प्रदायानां सत्त्वेऽपि भारतीयेषु जनेषु ऐक्यभावमालोक्य कविवरो डा० शुक्लमहाभागो

मोदमापद्यते। सूत्रे मणिगणानिव राष्ट्रियभावे परस्परं सङ्गुम्फितानशेषान् भारतीयान् जनानालोकमालोकं कविवरोऽयममन्दमानन्दसन्दोहमनुभवति। तदीयोऽयमानन्दः पाठकानपि राष्ट्रभक्तिभरितान् संविधाय समानन्दयतीत्यत्र न मे संशीतिलेशः (पृष्ठसंख्या, १०, १६, ५१)। कविनामुना स्वीयस्य भारतदेशस्य शान्तिप्रियतायाः तदाघाते च शक्तिशालितायाः अपि सम्प्रयोगे अमोघं सामर्थ्यं समुपवर्णितमस्ति; येन भारतीयेषु जनेषु स्वीयरक्षासुरक्षाभावनापि सुदृढं पदं निदधातितराम्। अहं मन्ये यदत्रापि स्वराष्ट्रहितसाधने कवेः कौशलं विजृम्भतेतराम्।

भारते विधीयमानां सर्वतोमुखीं वैज्ञानिकीं प्रगतिमपि कविवरो डा० शुक्ल महाभागः एतस्य गरिम्णो महिम्नश्च परिवर्धने उल्लेखनीयं हेतुं मन्यते। एनेनापि हेतुना च भारतं विश्वमञ्चे महत्त्वपूर्णां भूमिकां बिभ्रदस्तीति स्वीये काव्ये साधु साधयन् कविवरोऽयं भारतीयेषु भारतीयां प्रति स्पृहणीयं भावं जनयतीति मम विश्वासः।

(ग) कलापक्षः—

भव्येऽस्मिन् काव्ये कविवरेण काव्यकलापक्षोऽपि चारुतया संनिवेशितोऽस्ति। छन्दोऽलङ्कारगुणरीतिप्रभृतीनि सर्वाण्येव काव्यकलापक्षीयाणि अङ्गानि लघुन्यपि अस्मिन् काव्ये अवलोचकलोचनातिथीभवन्ति। संक्षेपेणात्र तेषां विवरणं प्रस्तूयते—

छन्दांसि

ताटङ्क - भुजङ्गप्रयात - दिक्पाल - आर्या - तोटक - मालिनी - द्रुतविलम्बित-शार्दूलविक्रीडिताख्यानि प्रसिद्धान्यप्रसिद्धानि च छन्दांसि काव्येऽस्मिन् अनुभूतिविषयतामायान्ति। यथा प्रतिपादं त्रिंशन्मात्रस्य, क्रमेण षोडश्यां तदनन्तरं पुनश्चतुर्दश्यां च मात्रायां यतियुतस्य ताटङ्कनामकस्य छन्दसोऽनुभूतिरधोलिखितपद्यसदृशेषु अष्टाविंशतिपद्येषु बोभूयते—

काशीमथुरापुरीद्वारका (१६) हरिद्वारमाहात्म्ययुते (१४),

सेतुबन्धकन्याकुमारिका (१६) गङ्गासागरकीर्तियुते (१४)।
बदरीनाथवैष्णवीज्वाला (१६) हेमकुण्डशुभयशोधरे (१४),
जय जय जय हे भारतभूमे (१६) जय जय जय भारतभूमे (१४)॥
(पृ० १२)

प्रसंगेऽस्मिन्नुल्लेखनीयमस्ति यदस्य छन्दसः प्रयोगे कविवरेण डा० शुक्लमहाभागेन यतिविधाने यत्र-कुत्रचित् वैपरीत्यमपि अवलम्बितमस्ति। येन प्रतिपादं षोडशी मात्रा तदनन्तरं पुनश्चतुर्दशी मात्रा यतियुता स्यादित्यस्य नियमस्य वैपरीत्याद् यत्र-कुत्रचित् पद्ये प्रथमं चतुर्दश्यां मात्रायां तदनन्तरं पुनः षोडश्यां मात्रायां यतिरायातास्ति। कस्मिंश्चित्पद्ये तु उभयवारं पञ्चदशी एव मात्रा यतिमतो दृश्यते। किन्तु छन्दसः प्रवाहप्राबल्याद् भावपक्षस्य च सामर्थ्यादिदं सर्वं कविकृतं परिवर्त्तनं काव्यसौष्ठवं व्याहन्तुं कथमपि नैव समर्थमस्ति; अपितु प्रकृतछन्दोभेदविधाने कविकौशलस्यैव द्योतकं प्रतिभाति।

सर्वत्रैव प्रतिवारं द्वादश्यां मात्रया यतियुते दिक्पालनामके मात्रिके छन्दसि कविनामुना एकादश पद्यानि विरचितानि सन्ति। निदर्शनत्रयं प्रस्तूयते-

लोकप्रबोधशीलं शोकप्रणाशशीलम्।
चेतोविकासकुशलं मम भारतं विजयते॥
सह्याद्रिविन्ध्यहिमवत्सप्ताद्रिकीर्तितश्रि।
गङ्गाजलैः पवित्रं मम भारतं विजयते॥
क्वापि श्रमेण सहितं क्वापि प्रमोदभरितम्।
नानाक्रियाकलापं मम भारतं विजयते॥ (पृ० ४६)

प्रतिपादं सगणचतुष्टययुक्तं तोटकाख्यं छन्दोऽनुसृत्य कविवरोऽयं सुललितानि नव पद्यानि विरचितवानस्ति। यथा—

(कः) हिमवत्कलहासमरीचिसिते, यमुनाजलनीलविभामहिते।
रविचुम्बितकोकनदारुणिते, जय भारतमेदिनि विश्वनते॥
नवसर्षपपीतदुकूलयुते, बहुशस्यसमूहविभाहरिते।
मलयानिलमोदकलाकलिते, जय भारतमेदिनि विश्वनुते॥ (पृ० ५५)

उपरि वर्णितवृत्तत्रयातिरिक्तानि आर्या-मालिनी-भुजङ्गप्रयात-द्रुतविलम्बित-शार्दूलविक्रीडिताख्यानि छन्दांसि सुतरां प्रसिद्धानि सन्तीति विचार्य एतेषामुदाहरणानि पाठकप्रवरेभ्यो नोपाह्रियन्ते। एतद्ददृक्षा-परवशास्तु मूलकृतिमेवावलोकयितुं कृपा कुर्युः।

अलङ्काराः

अस्यां कृतौ स्थाने-स्थाने स्वीयभावपक्षपोषकाणामलङ्काराणापि प्रयोगे कवेः पाटवं प्रस्फुटति। अनुप्रास-यमक-उदात्त-यथासंख्य-प्रभृतयोऽलङ्काराः कवेः भावसम्प्रेषणीयतां परिवर्धयन्तः काव्यचारुतामापादयन्ति। स्थानाभावादत्रैषामुदाहरणाभावो मर्षणीय एव तत्त्वविद्भिः।

गुणरीतयः

शब्दशय्यायाः सुकुमारतया, समासानां सुबोधतया, अत एव भाषाया भव्यतया, छन्दसां धाराप्रवाहशीलतया, अलङ्काराणां सहजतया चास्यां कविताकृतौ सर्वत्रैव वैदर्भी रीतिः प्रसाद-माधुर्य-संज्ञकौ च गुणौ पाठकानां मनोमयूरनर्तने श्रावणमेघायन्ते। अस्मिन्नेव लेखे 'छन्दांसि' इति शीर्षकमादाय समुदाहृतेषु पद्येषु कवेरिदं काव्यवैशिष्ट्यं पाठकेन नेत्रमनोविषयीविधातुं शक्यते।

(घ) अन्त्यम्

एवं रीत्या संक्षेपेणात्र विहितेन विचारेण मामकीनायां मतौ तथ्यमिदं सुतरां समाविशति यत्कविवरस्यास्य डा० शुक्लमहाभागस्य कृतिरियं काव्यशास्त्रीयतत्त्वनिचयनिचिता वरीवर्त्ति। अत एव कविवरोऽयं मया मुदा समभिनन्द्यते, आशास्यते चास्य संवेदनशीला समभिव्यक्तिकुशला निरलसा च लेखिनी अनारतं संस्कृतसाहित्यस्य सामयिकीं श्रीसमृद्धिं विधास्यति।

गन्धदूतस्य समीक्षा

(ले० : आचार्य डा० रमेशचन्द्र शुक्ल:)

महाकवि-कालिदासकृतस्य अमरयश:समुल्लसितस्य मेघदूतसंज्ञकस्य सन्देशकाव्यस्य संस्कृतवाङ्मयान्ववायेऽवतारणायां सत्यां सन्देशकाव्यपरकपरम्परायां यानि काव्यान्यद्यपर्य्यन्तमवतीर्णानि सन्ति तेषु अलीगढ़ विश्वविद्यालय-संस्कृतविभागे 'प्रोफेसर' पदासीनेन श्री डा० परमानन्दशास्त्रिणा विरचितं 'गन्धदूतम्' नाम सन्देशकाव्यमाधुनिकेषु मनोदूत-पदाङ्कदूतोद्धवदूतादिषु अनन्यगां श्लाघनीयतां विन्दमानं सन्देशकाव्य-ससारे देदीप्यते ।

गन्धदूतं सुरानिपातितचरितस्य सुरापानसंसक्तचित्तस्य जनस्य मनोव्यथाया हृन्मर्म्मस्थलस्पर्शकारि चित्रमालिखति। यथा मेघदूतं मानवप्रकृतेर्बाह्यप्रकृतेश्च प्रियं मधुरिमाणं दृग्गोचरतां नयद् भावुकानां हृदय परिप्रीणाति तथैवेदमपि तद् विनोदयितु सफलं यत्नं विदधत् समुपलभ्यते ।

अस्मिन् आधुनिकेऽनेहसि अस्मद्देशे सुरापाननिवारणाय शासनमपि प्रयतमानं लक्ष्यते; तन्निरोधाय बहुविधानि साधनान्याह्नियन्ते । कवि: काव्यमिदं विरचय्य प्रवर्तमानानि तानि तानि साधनान्युद्दिश्य परमसहायक भवद विद्योतते। कविर्यस्य प्रियाविरहव्यथाव्यथितस्य नरस्य सन्देशमिहोपन्यस्यति स जनोऽस्ति सुरासेवी । सुरापानात् तस्य चरित्रं बहूनां निन्दनीयानां दोषाणामास्पदं सञ्जातमस्ति ।

सुरासेविनः स्वपत्युः शोचनीयं भ्रष्टं चरित्रं तत्पत्नीं भृशं दुनोत्यतः सा तं परित्यज्य स्वपितृसदनं गतास्ति । तस्या वियोगेन नितान्तमेव निपीड्यमानं भूत्वा तत्कान्तः कमलसौरभं दूतं कृत्वा तदद्वारेण स्वसन्देशं स्वां कान्तां, या पितृसदनभूतां वाराणसीमधिवसति, प्रति प्रहिणोति ।

कवेः कालिदासस्य मेघदूतमिव काव्यस्यास्यापि पूर्वार्द्धभागो भरतभुवः प्रकृतेः पेशलानि प्रेक्षणीयान्यनेकानि च हृदयहारीणि पुराणि चित्रितानि विदधाति । काव्यमेतदाधुनिकविज्ञानश्रीमुद्रितानि च बहूनि दृश्याण्यप्यालिखति । इदमस्ति काव्यस्यास्य नैजं वैशिष्ट्यम् । प्रथमं प्रौद्योगीयाः यन्त्रशालाः एव प्रेक्ष्यन्ताम् —

गव्यूतीनां प्रथमदशकं वर्त्म तीर्त्वा सुकर्मन्
आबादाख्यं व्रजसि नगरं त्वं फरोदेतिपूर्वम् ।
प्रौद्योगीया विविधविषया यत्र संयन्त्रशालाः
नित्योद्ग्रीवा अजगरनिभं धूमजालं वमन्ति ।।१२।।

विपुलसुखप्रदा एते वैज्ञानिकोद्योगा अहर्निशं प्राणवायुं हरन्तीति कविरभिधत्ते—

नित्यं पर्यावरणममितं दूषयन्तः समन्तात् ।
भूयो भूयः श्वसनपवनात् प्राणवायुं हरन्ति ।।१३।।

साम्प्रतिक्या औद्योगिक्या वस्तुविभाजनस्य निन्दनीयतां कियत्या विच्छित्त्याभिव्यनक्ति कविः—

जग्ध्वेङ्गालान् वमति सततं यद् विषं च श्रियं च
प्रौद्योगिक्या भवति समदृक् ! कीदृशस्तद्विभागः ।
क्ष्वेडं याति प्रसभमुदरे यत्कृशानां श्रमेण
गेहे लक्ष्मीः पतति च बलादाहृता तुन्दिलानाम् ।।१५।।

तदेवमेकतः कवेः काव्येऽस्मिन् विज्ञानजनितं सौन्दर्यन्तु दृष्टं भवत्येव परमेकतस्तत्र प्राकृतिकी श्रीरपि समुद्दीप्यते—

वाप्यो यत्र स्फटिकविमलाश्चन्द्रनिष्यन्दपूर्णा-
स्तासां मध्ये मरकतनिभाः पद्मिनीपङ्क्तयश्च ।
पुष्पर्द्धिर्या ललितवनिताहस्तनेत्राननानाम्
लीलौपम्या दधति विधिनाभ्याससृष्टा विसृष्टाः ॥१७॥

व्रजक्षेत्रस्य दुग्धकुल्यत्वमपि कविः प्रियेणैव प्रकारेण निरूपयति—

प्रान्तर्मन्थाहतदधिरवाद् गुञ्जिताद्यन्तघोषम्
सायं रम्भारुतिमुखरितं श्रान्तगोधूलिवेलम् ।
गोदोहानां तदनु विसरत्क्षीरधाराविरावं
क्षेत्रं तत्र व्रजमनुपमं दुग्धकुल्यं व्रज त्वम् ॥१८॥

व्रजक्षेत्रस्य दुग्धकुल्यतामभिव्यक्तीकृत्य कविः स्वदेशस्यातीतस्य समृद्धिशालितामपि निर्दिशति :—

लोकेद्वेषिप्रहणनपरैः कृष्णलीलाप्रसङ्गै-
र्वृद्धाः सायं विदधति मुदं बालगोष्ठीषु यत्र ॥१९॥

इत्येतदादिपङ्क्तयः कालिदासस्य मेघदूते स्थितां 'प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्' इत्येतां पङ्क्ति स्मारयन्ति ।

यत्र ग्लानिं सुरतरभसामर्दमुग्धाङ्गनानां
कालिन्द्यूर्मिप्लवननिपुणा रात्रिवाता हरन्ति ॥२०॥

इत्येतदादिकाः पङ्क्तयो मेघदूतस्य पङ्क्तिमेतां स्मृतिस्मृतिस्थां कुर्वते—

यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥२१॥

कविर्मथुरा - वर्षायन - नन्दग्राम - गोकुल - गोवर्द्धनानां विशिष्टतामुद्गीय प्रज्ञाचक्षुःकविकुलपतिं सूरदासं नमस्कर्तुं स्वदूतं कमलसौरभं सादरं नुदति । तत्सन्दर्भे हि—

आत्मानं तत्प्रभुवलिविधौ गन्ध भक्त्या समर्प्य
प्राप्स्यस्येव स्वयमपि परं जन्मसाफल्यलाभम् ॥२२॥

इत्येतदादिश्लोकमधीत्य

कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥

कालिदासस्य श्लोकमिमं पाठकः स्मृति-शिखरे समुदं समारोपयति।

आगरानगरस्य वर्णनं विदधतः काव्यस्यैताः पङ्क्तयः कदा नु को जनो विस्मर्तुं प्रभवेत्—

(क) भर्त्रीं नित्यं स्वरुचिविषयां पुष्टिमिच्छन्ति योषाः
(३८)

(ख) निर्मातुं त्वं प्रिय! यदि भवेरीदृशं मे समाधिम्
सद्योऽद्यैव प्रणयशयने मर्तुमीहे तवोत्से ॥३९॥

गङ्गा-यमुनासिक्तं पावनं स्थलं ग्राम-शोभां च कुर्वन्तो दृग्गतां वयं मातुश्चामुण्डाया दर्शनेन धन्यजन्मानो भवामः। 'राजनीतेः प्रभावात् सद्भाव एव लुप्तिं यातः (४७)' कवेः कथनमेतदस्माकं हृदयं प्रशंसद् विराममपि यावन्न लभते तावदेव सत्यं निदधत्य इमाः पङ्क्त्योऽस्माकं पुरः समुपस्थिता भूत्वा मनो नितरां प्रीणयन्ति—

पौरोहित्ये प्रवणमनसश्चात्र कौसीदभोगान्
हित्वा दूराद् द्रुततरगतिर्वाहयेरध्वशेषम्।
हत्वा सत्यं प्रतिदिनमिमे वञ्चयित्वा च लोकं
मासे मासे विदधति कथाः सत्यनारायणस्य ॥४८॥

यत्र वयं नानासाहवस्य, राज्ञ्या लक्ष्म्याः, चन्द्रशेखरआजादस्य दाराशिकोहस्य च चर्चां कुर्वाणं काव्यमेतत्पश्यामस्तत्र तु ननं भारतीयेतिहास इव भूत्वेदं विभाति।

कानपुरनगरस्य वैभवं समृद्धिमुद्योगांश्च गायतः कवेरिमाः पदावल्यः कं न सचेतसं प्रीणयन्ति—

आद्ये कस्मादधररसने सुभ्रुवां भ्रूविकारान्
मन्यन्तेऽन्तः कुसुमशरभृच्चापनाराचमोकान् ॥६०॥

लखनऊनगरगमनात् कविः स्वदूतं निवारयति । स ब्रूते—

रथ्यास्वस्या वहति मलिना पङ्किला राजनीतिः (६५)

उपमां सन्देहं च प्रयुज्य कविः शाद्वलश्रीसुषमां हृदयहारिण्या रीत्योपन्यस्यति—

मुक्ताशुभ्रैर्हिमजलकणैः शोभिता घासभागाः
संदृश्यन्ते नयनसुभगा इन्द्रचापाभिरामाः ।
तत्तिग्मांशोररुणहरितां मिश्रवर्णत्विषः किं
संक्रान्तिर्वा शबलवसना घासलाव्याकृतीनाम् ॥६८॥

प्रयागस्य गङ्गायमुनयोः सन्निवेशः कियत्समुचिततयोत्प्रेक्षितः—

भागीरथ्या भुवनविदिते सङ्गमे सूर्यजायाः
दृष्टिं यास्यत्यमरमहिमा तीर्थराजः प्रयागः ।
यः सन्तापप्रविलयलसद्धारयोर्मध्यसंस्थो
भाति स्नेहादिव भरतभूमातृबाह्वोर्निविष्टः ॥६९॥

गङ्गायमुनासङ्गमजनितप्रयागवसुन्धराया अनवद्यं हि सौन्दर्य्यमुत्प्रेक्षां रूपकं चावलम्ब्य चमत्कारचञ्चत्सन्देहं च संश्रित्य निदधाति···

भाति स्वच्छा सितयमुनया सङ्गता यत्र गङ्गा
मुक्तामालावनिवनितया नीलदाम्ना धृतेव
एते किं वा सहजभगिनी स्नेहमाश्लेषमाप्ते
हर्षं व्यङ्क्तश्चलितलहरी मानसे नैव मान्तम् ॥७१॥

कविर्वर्णस्वरपदरसवतः कवित्वस्याकलने कुशलं निरालां देशप्रेमवीरशरणस्थलमानन्दभवनं सुविदितन्यायाधीशं जगन्मोहनं न्याया-

लयोच्चं चावदातया गिरया वर्णयन् मातृविन्ध्येश्वरीं प्रणमन् स्वकविताधाराप्रवाहं वाराणस्युन्मुखीं कुर्वाणः पूर्वार्द्धं संवृणुते।

वाराणसी-सुषमां, तदीयं गरिमाणं च पुरो निधाय कविरामनति यदियं सा पुरी यत्र शङ्करः कैलास-वासमपि हित्वा निवसति। सः काशीवर्णनप्रसङ्गे सत्यपालनहुतसर्वस्वं राजानं हरिश्चन्द्रं, विद्याव्यसननिरतां मण्डनस्यार्धाङ्गिनीं भारतीं या शङ्करमपि जिगाय, उपश्लोकयन् महात्मानं तुलसीदासं,रामचन्द्रशुक्लं, भारतेन्दुं, प्रेमचन्दं चोपवीणयन् काशीविद्यापीठस्य राष्ट्रियचरित्रोत्थापकत्वं, संस्कृतविश्वविद्यालयस्य च अस्मत्पूर्वजानां जगद्विदितस्य वैदुष्यस्य च उन्नेतृत्वमुद्गायति। मालवीयमहाभागप्रतिष्ठापित हिन्दूविश्वविद्यालयं विलोकयितुं गन्धं नुदन् कविर्मनीषी यस्मिन् विश्वविद्यालये, मालवीयस्यानहेसि, शुद्धं विद्यावसनं, सुखं शान्तिश्च व्यराजन्त तत्र हन्त, वारनारीस्वभावा राजनीतिर्निविष्टेति वक्तीत्थम्—

शुद्धं विद्याव्यसनमधिकं तत्सुखं सा च शान्तिः
विश्वासः सा मतिरपि तथा नाधुना तत्र मन्ये।
स्वार्थान्धा यत् प्रणयदुरिता वारनारीस्वभावा
सर्वत्रैव प्रकृतिचपला राजनीतिर्निविष्टा ॥१२॥

प्रसन्नायां भाषायां वाराणस्याः शाटिकादिबिविधवस्तूनां मनोज्ञं वर्णनं विधाय कविस्तत्रत्यानां सुन्दरीणां मञ्जुलपदावल्यां नानालङ्कारोत्प्रेक्षाललितोपमाव्यतिरेकानालम्ब्य प्राञ्जलं वर्णनं विदधद्दृग्गतो भवति। श्रूयतां तत्रत्य एक श्लोकः—

हित्वा चन्द्रं स्खलति पतिता चन्द्रिका सा कपोले
अङ्गादङ्गात् स्फुरति मदयन् मानसं पद्मगन्धः।
भाले विन्दुर्गगन उदितश्चन्द्रमा रूपसिन्धोः
सर्वस्वं वा किमपि निहितं मुद्रितं चारुतायाः ॥१९॥

वाराणस्यां लङ्काख्यस्य खण्डस्य सुन्दरतां प्रतिपाद्य कविस्तत्रस्थे स्वकीये गेहेऽभिज्ञं कुरुते गन्धं नाम सन्देहशहरं दूतम्। सन्देशप्रेषणपरस्य प्रणयिनः प्रेयस्याः परिचयमित्थं प्रस्तवीति कवि :

या तत्र स्यात् त्रिदशरमणीरूपगर्वं हरन्ती
बालक्रीडाचरितसुभगान् भ्रातृजान् साधयन्ती।
ध्यायन्ती वा सुकविकवितां पत्रिकां वा पठन्ती
विज्ञेया सा विमलहृदया गन्ध ! भार्या मदीया ॥२६॥

तत्सुन्दर्याः सौन्दर्यं परमसुन्दरचमत्कारचारुप्रकारेणाभिव्यनक्ति कविवरः—

हासे यस्या वसति शरदां पद्मशोभाप्रसारः
वायुः स्पर्शात् कुसुमितलतास्पन्दलीलाङ्गभङ्गे।
निर्वातायां इव नयनयोर्नीलिमा पुष्करिण्याः
हंसालभ्या विलसति गतिः पादयोरेत्य लग्ना ॥२७॥

वारुणी न कदापि केनापि सेव्या। सा परमहानिप्रदा। सा मानवस्य सर्वस्वमपहरति। अस्ति सा कुटुम्बविनाशिनी। सर्वसुख-सम्पद्धारिणी इत्येतस्मात् कारणात् कविः परमौजस्विन्यां भाषायां सुराया हानीः प्रस्तवीति—

सम्पर्कादप्यहह बलवद् वारुणीं तिग्मरश्मेः
स्थानं रूपं हरति च महो मानवाः के वराकाः।
वारस्त्रीवद् हरति सततं स्वास्थ्यमर्थञ्च तेषा-
माधिं व्याधिं विषममुपदां लाति चास्वादितैव ॥३३॥

तदेवमनन्तविपद्वर्षिणीं वारुणीं कविसत्तमो बहुभिः श्लोकैरालिख्य जनतां ततो दूरीभवितुं—तां परित्यक्तुं—सादरमनुरुणद्धि। स ब्रूते—

रे रे मर्त्याः ! भवत सततं सावधानाः सुरायाः (४४)

कविस्तस्य प्रणयिनो मुखेन प्रार्थयते—

कश्चित् पाशे सुभग ! न पतेद् वारुणिन्या हताशो
राष्ट्रं यायादुदयमचिराद् दुष्प्रभावाद् विमुक्तम् ।।४६।।

इतोऽग्रे कविना प्रापणीयः सन्देश उपन्यस्तः । सन्देशे यद्यत्प्रणयिनाभिहितमस्ति तत्र मुख्यमस्ति 'सुरायाः परित्यागः' । अत्र काव्ये यदुक्तं तदपि आकर्ण्यताम्—

त्वां कल्याणि ! प्रियसहचरो मुक्तपूर्वस्त्वया यः
पूर्णप्रेम्णा स्मरति सततं त्यक्तकादम्बरीकः ।
संतप्तस्ते विरहदहने मां च गन्धं प्रयातः
शुद्धो ग्राह्यः कनक इव ते मद्गिरा चैवमाह ।।५२।।

यक्षो तथा स्वसदनस्याभ्याशे अशोककेसरयोः श्रियमस्मत्पुरत उपस्थापयति तथैव कविरयमपि प्रणयिनः सद्मन आम्रश्रीसुशोभितत्वं निरूपयति—

यश्चाम्रस्य प्रसितवदने ! रोपितः पादपो नौ
यत्नैः सिक्तो मधुरपयसा यस्त्वया मातृभावात् ।।५५।।

प्रियतमाया विरहे चन्द्रिका अनलायते इत्येतदादि यत्कवयो वर्णयन्ति तदिहापि वर्णनं स्फुरतितराम्—

गर्जन् मेघः स्फुरति चपला घोरवर्षादिनानि
स्त्यानज्योत्स्ना रजतधवलाः शारदीयास्त्रियामाः ।
प्रालेयोग्रोत्प्लवनहिमिता लम्बिताः पौषरात्रीः
कान्ते ! तप्ते रजसि पतितो मीनवद् वाहयामि ।।६७।।

प्रियतमाप्रियाणि वस्तूनि प्रेक्ष्य प्रियतमस्य मनः किञ्चिदाश्वासनमाप्नुते इत्येतदादि कथयन् कविर्विरहिणः स्वभावस्य तद्गतदौर्बल्यं च चित्रणं कुर्वाणः प्राप्यते । क्वापि विरही शान्तिं नाधिगच्छति—इत्येतच्च सर्वं दीर्घायां पदावल्यां वितन्वानश्च कविः संलक्ष्यते—

'दूनश्चित्ते क्वचिदपि सुखं नाप्नुवन्नेकलोऽहम्
चित्रागारं मृगदृशि ! मनोरञ्जनाय प्रयामि' ॥७६॥

काव्यस्य भाषा आभाणकसूक्त्यादिभिः संविभूषमाणास्ति—

(क) प्लुष्टो लोकः पिबति पयसाप्यत्र फूत्कृत्य तक्रम् ।
(२६)

(ख) प्राप्ते सर्वं परममुदितो जायते ज्ञातिबन्धौ
पारार्थ्यैकव्रतिनि ललिते किं पुनस्त्वादृशे तु ।
(पू० ३६)

अर्थान्तरन्यासस्य च छविभ्रंशं नन्दयति चेतः सचेतसाम्—

(क) आशाश्वासाः प्रसभमथवा प्राणिनं जीवयन्ति ।
(५६ उ०)

(ख) पीडोत्पीडे हृदि न लभते हन्त ! भाषावकाशम् ।
(८१ उ०)

(ग) रूपाकृत्योर्भवति न गुणैः शाश्वतः कोऽपि योगः ।
(२८ उ०)

दृष्टान्त-प्रतिवस्तूपमयोश्छविरपि मनो मोहयन्ती प्रायेणावाप्यते—

(क) शूलं यस्मिन् पदि निविशते सैष जानाति पीडाम्
दाहं वेत्ति प्रथितजलधिर्नापरो वाडवाग्नेः ॥
(७८ उ०)

(ख) वर्षाकाले घनरसभरे के पुनर्न स्खलन्ति ॥
(८० उ०)

कविप्रयुक्तायां— **'कसं केशग्रहणमहनद् भूरिभूभारभूतम् ।** (२१ पू०) इत्यस्यां पङ्क्त्यां पदम् **'अहनत्'** इति किञ्च 'संशेरन्ते भयमिव गता आत्मजाश्चात्मनीनाः (३८, उ०) इत्यस्यां पङ्क्त्यां **'संशेरन्ते'** इत्येतत्पदं विशेषतो विचारणीयं वर्तते ।

नूनं काव्यमस्ति मनोऽभिरामं शिक्षाप्रदं च। भाषास्ति तदीया भव्या, वस्तु वर्तते तदुपादेयम्, भावाः सन्ति अवदाता उदात्तसौन्दर्य-समुद्दीप्ताः, भावाभिव्यक्तिप्रकारो वर्तते मनोविनोदकृत्, शब्दार्थ-समुच्चयश्रीश्च ह्यभिवन्दनीया। अत्र आधुनिकतायाः पुरातनताया-श्च समीचीनः समन्वययोऽथवाद्भुतः सङ्गमः पर्यवलोक्यते तस्मात् कविश्रेष्ठे डाक्टरपरमानन्दशास्त्रिणि पुनः पुनः साधुवादाः व्याह्रियन्ते —

कादम्बर्यां जगति न जनः कोऽपि चेतो निदध्यात्
सा नः सर्वं हरति विभवं चास्मदीयं चरित्रम्।
एतद् वक्तुं प्रिवकविवरः काव्यसौन्दर्यशुभ्रम्
अध्वानं यं श्रयति ललितं को न तं संस्तुवीत ॥१॥
अस्मिन् काले त्रिदशवचसि ख्यातकाव्यानि यानि
सन्देशार्थं कविसहृदयैर्लोककल्याणहेतोः।
रच्यन्ते स्म स्तुतशुभगुणैर्गन्धदूतं हि तेषु
मूर्धन्यं सद् विलसति विभामद्वितीयां दधानम् ॥२॥

विंशशताब्दीयसंस्कृतवाङ्मयाय पञ्चाम्बुप्रदेशस्य योगदानम्

(डा० शिवप्रसादो भारद्वाजः, विश्वेश्वरानन्दवैदिकशोधसंस्थानम्,
होशियारपुरम्)

सुरभारत्या सुरसरित इव साहित्यधारा चिरकालात् प्रवहन्ती युगेऽस्मिन् सर्वथा तदुपेक्षामयेऽपि सातत्येन प्रवर्तमाना लक्ष्यते। आंग्लशासनारम्भानन्तरम् अत्रत्यराजभाषापदम् अधिरूढा आङ्ग्ली गीरेव भारतदेशस्य पठनपाठनद्वारं जाता। राजसेवा- प्राप्तये च तदीयज्ञानस्याऽनिवार्यतया जनसामान्यस्य तां प्रत्येव साग्रहं प्रवृत्तिरभवत्। किन्तु न खल्वाङ्ग्ला केचन यवना इव बर्बराः ज्ञान-विज्ञान-विद्वेषिण आसन्। प्रत्युतान्यभाषाभिः सह संस्कृत-गिरः साम्यम् अभिलक्ष्य तस्याः प्रचुरवाङ्मयस्य परिचयं महत्त्वं चाऽभिज्ञाय सरुचयस्तस्या अध्ययनेऽभवन्। कामं न ते तस्या अध्ययनं प्रोदसाहयन् परं तदध्ययने वाधाऽपि तैर्न कृता। अस्य प्रबलतरं प्रमाणं च पञ्चाप-विश्वविद्यालयस्य मूलाधारत्वेन प्राच्यशिक्षा-विभागस्य (ओरिएण्टल कालेजस्य) स्थापना यस्य प्रधानाचार्यः कदाचित् ए०सी० वुलनरनामा शर्मण्यदेशीयः कोऽपि विपश्चिद् बभूव। एवं संस्कृताध्ययनस्य विरलप्रचारे कालेऽपि तस्यां गिरि प्रचुरवाङ्मयस्य सृष्टिरव्याहताऽभवद् अद्यापि च भवति। खिृष्टाब्दस्य विंशी शताब्दी तत्र विशेषेण महत्त्वपूर्णा यतस्तस्यां प्रतिकूलपरिस्थितिसत्त्वेऽपि पुष्कलस्य साहित्यस्य निर्माणं प्रकाशनं चाऽक्रियत संस्कृतप्रियैः। तत्र पञ्चाप-प्रान्तीयविदुषां चाऽप्यनुपेक्षणीयो योग इति तमेवाधिकृत्य किमप्यत्र प्रतिपाद्यते।

पञ्चाप-प्रदेशस्य सामाजिकी स्थितिर्भारतस्य प्रान्तान्तरीय-स्थितेः सुतरां भिन्ना। भारतस्य सीमाभागत्वात् प्रायेण वैदेशिकाक्रमणस्य मुख्यम् आभिषम् अयमेव प्रदेशोऽभवत्। यवनानां बाहुल्येनात्र विशेषेण पारसीकभाषाया उर्दूभाषायाश्च पठन-पाठने सविशेषा प्रवृत्तिर्लोकेऽभवत्। पुनश्च शिष्यमतस्य प्रसारानन्तरं तदनुयायिनां संस्कृताध्ययनाध्यापने वृत्तिर्नाजायत। अद्यापि तेषां संस्कृतं प्रति नितरां विरक्तिरक्षतैवेति न वक्तव्यं भवति। पुनराङ्गल-भाषायाः प्राधान्येन गण्डस्योपरि भूयो विस्फोटः कृतः। सत्यामप्येवं विधायां प्रतिकूलस्थितौ स्वातन्त्र्यात् प्राक् पञ्चाम्बुप्रदेशे संस्कृताध्ययनस्य भूयान् प्रचारो जात इति महते तोषाय। तत्रत्य संस्कृतसेविनां सेवाया विवरणे दातव्ये नेदं विस्मरणीयं यत् नाद्यतनः पञ्चनदप्रदेशः प्राक्तन इव विस्तृतः। भारतविभाजनप्रसङ्गे पूर्वं तस्य द्वौ भागौ जातौ—पश्चिमः प्राच्यश्च। अधुना द्वितीयस्य पुनरपि हिमाचलः, हरयाणा, पञ्चापश्चेति त्रयो भागा जाताः। अतः पञ्चाम्बुप्रान्तस्य संस्कृताय योगदाने विचार्यमाणे प्रश्न उदेति यत् कस्यात्र योगदानं विवक्षितम् अविभाजितपञ्चापस्य वर्तमानपञ्चापस्य वा। प्रथम-पक्षे तत्र साम्प्रतिकहिमाचलप्रदेशस्य त्रिगर्त-कुलूतप्रभृतयो भागा हरयाणाख्यप्रदेशोऽपि च सम्मिलित इति तत्रत्यानाम् अपि संस्कृत-साहित्यकाराणाम् अवश्यं गणनया भवितव्यम्। द्वितीये पक्षे तु केवलं द्वादशमण्डलेषु सीमितस्य वर्तमानस्य पञ्चापस्यैव लेखकानाम् इष्टा चर्चा। पुनश्च त्रिविधा अत्र लेखकाः —

१. पञ्चापप्रदेशे गृहीतजनुषस्तत्रैव च स्थित्वा संस्कृतसेवां कृतवन्तः।

२. जन्मना पञ्चापवास्तव्या अपि जीविकावशेन देशस्यान्यभागेषु स्थित्वा संस्कृतसेविनः।

३. ये नाम जन्मनान्यप्रदेशसम्बद्धा अपि वृत्त्यादिहेतोः

पञ्चापप्रदेशे वसन्तः सुरभारतीभाण्डागारस्य वृद्धिम् अकार्षुः।

एतेषां त्रिविधानामपि देवगवी समुपासकानां केषाञ्चिदेवात्र संस्कृत-साहित्याभिवृद्धौ योगदानं समासतः प्रस्तूयते। अनेके हि पञ्चाप-प्रदेशवास्तव्या विद्वांसो देशे विभक्ते सति तं प्रदेशं परित्यज्य यत्र तत्र वार्ताहेतोः प्रान्तान्तरं गताः कालक्रमेण तत्रैव स्थिताः। न तेषां सर्वेषां नामादि ज्ञायते। तत्र प्रथमम् अविभक्तपञ्चनद-स्थितानां विदुषां संस्कृत-भाण्डागारवृद्धे विवरणम् अत्र प्रस्तूयते।

नरोत्तम शास्त्री :

'पुरुषपुर' नगर वास्तव्येनाऽमुना संस्कृते कानिचित् सुभाषितानि लिखितानि समस्यापूर्तयश्च कृताः। केचित् 'हिन्दुशब्दः, हिन्दुशब्द-व्युत्पत्तिः', 'संस्कृतभाषा' एतच्छीर्षकोपन्यस्ता निबन्धा देववाण्यां लिलेखिरे। अप्पाशास्त्रिराशिवडेकरमहाशयाय तेन प्रहितानां पत्राणां संस्कृतसाहित्य दृष्टया महत्त्वम् अनुपेक्षणीयम् एव।

हृषीकेश भट्टाचार्यः :

वङ्गवास्तव्येनाप्यनेन वृत्त्यर्थं लाभपुरे (लाहौर) तिष्ठता वहूनि वर्षाणि यावत् 'विद्योदय'नाम्नी मासिकपत्रिका सम्पादिता। तस्य नूतनशैल्यां लिखिता वहवो निबन्धाः [प्रबन्धमञ्जरी-नाम्नि सङ्ग्रहे सङ्कलिताः प्रकाशिताश्च।

डा० लक्ष्मणस्वरुपः :

पञ्चापविश्वविद्यालयस्योपकुलपतिपदमधितिष्ठताऽनेन वेङ्कट-माधवकृतस्य ऋग्वेदभाष्यस्य सम्पादनं प्रकाशनं च कृतम् आसीत्।

नृसिंहदेव शास्त्री दर्शनकेसरी :

लाभपुरस्थे प्राच्यमहाविद्यालये प्राध्यापकपदं भजता दार्शनिक-प्रवरेणाऽनेन रचिता सिद्धान्तमुक्तावली-व्याख्या विद्वत्समाजे नित-

राम् आदृताऽऽसीत्। काव्यदर्शे च कुसुमप्रतिमाभिधा व्याख्याऽपि रचिता।

कन्हैयालाल शास्त्री :

अनेन होशियारपुरे तिष्ठता प्रसिद्धस्य पारसीककवेः शेखसादो-त्याख्यस्य कृत्योः गुलिस्तां बोस्तां इत्याख्ययोः पुष्पवाटिका इति संज्ञयाऽतिसुन्दरोऽनुवादः कृतः।

तुलाराम शास्त्री :

अनेन गुरदासपुरवास्तव्येन 'पिण्डौरी' संज्ञस्य वैष्णवपीठस्या-ध्यक्षाणाम् आचार्याणां साधनामयं जीवनचरितमधिकृत्य 'सिद्धचरि-तम्' इतिसंज्ञं काव्यं रचितम्।

चारुदेवशास्त्री :

होशियारपुरात् नातिदूरे स्थितस्य टांडानगरस्य निकटे गृहीत-जनुषा अभिनवपाणिनिरिति विरुदभाजा चारुदेवचास्त्रिणा लाभपुरे स्थितेन सता 'गाँधिचरितम्' इति साहित्यकृतिः रचिताऽभूत्। 'हास-विमुखी राजदारिका' इति शीर्षकशीर्षण्या लघुकथाऽपि तेन विदुषा रचिता विश्वसंस्कृत-नाम्नि संस्कृत-त्रैमासिके प्रकाशिताऽभवत्। शास्त्रीयक्षेत्रे तु तस्य शब्दापशब्दविवेकः, अनुवादमुक्तावलिः, व्याकरणचन्द्रोदय-प्रभृतयोऽनेके ग्रन्थाः प्रकाशिताः। अस्य प्रस्ताव-तरङ्गिणी संस्कृतनिबन्धानाम् आदर्शः। तत्र प्राञ्जला भाषा तस्याः संस्काराय च स्थाने स्थाने संस्कृतभाषकानां वाग्धाराणां यथावसरं प्रयोगस्तदीयगरिमाणं वर्धयति।

डा० सत्यव्रत शास्त्री :

प्रथितयशसश्चारुदेवशास्त्रिणोऽनुरूपेण तनयेन दिल्ली-विश्व-विद्यालये प्रोफेसर' पदमधितिष्ठता डा०सत्यव्रत शास्त्रिणा शोधकार्य-मतिरिच्य भूयसी मौलिकसंस्कृतसाहित्यरचना कृता, तस्य बोधि-

१. अद्यत्वे डा० शास्त्री पुरीस्थे श्रीजगन्नाथ संस्कृतविश्वविद्यालये कुलपति-रस्ति (सम्पादकः)।

सत्वचरितम् श्रीगोविन्दसिंहचरितम् इति काव्यद्वयं भारतशासनस्य साहित्यअकादमी - सञ्ज्ञया संस्थया पुरस्कृतम्। शर्मण्यदेशविलासः थाईलैण्डविलासः इति काव्ये च वर्णितदेशयोः संस्कृतिं सभ्यतां च पुरस्कुरुतः। तयोरन्तिमं तु नवीनतमं काव्यम्। अनेन महाभागेन रचितं इन्दिराचरितमपि ख्यातिं गतम्। हर्षस्यायं विषयः यथा डा० सत्यव्रतस्यैकाकी तनूज आयुष्मान् शरच्चन्द्रः पाश्चात्त्यशिक्षामधिगच्छन्नपि पितामहप्रसादात् सुरभारत्यामपि सनिष्ठस्तदीयव्याकरणे सुप्रबुद्धः काव्यरचनामपि करोति। डा० सत्यव्रतमहाभागेन स्वछात्रावस्थायाम् एव षड्ऋतुवर्णनम् इत्याख्या काव्यकृतिरपि रचिताऽभूत्।

आचार्य विश्वबन्धु शास्त्री :

पश्चिमपञ्चापप्रदेशान्तर्गत'भेरा' नाम्नि नगरे लब्धजनुषा चमनलाल संज्ञेन पश्चाच्च विश्वबन्धुनाम्ना ख्यातेन विदुषा वैदिकपदानुक्रमकोषस्य षोडशभागेषु रचना कृता। शब्दार्थपारिजातः, वैदिकस्वरपरिचय इत्यन्ये कृती। परीक्षा-सरस्वतीस्तुतिः - सदृक्षाः काश्चन काव्यकृतयोऽपि प्रकीर्णरूपेण तस्य प्रकाशिताः।

आचार्यः विश्वनाथ शास्त्री :

होशियारपुर मण्डलान्तर्गत 'जैंजो' नाम नगरे लब्धजनिरयम् ऋषिकल्पो मनीषी खन्नानगरस्थ सरस्वती संस्कृतकालेज संज्ञायाः संस्थाया आचार्यपदं बहूनि वर्षाणि यावदवहत्। अनेन रचितासु संस्कृतकृतिषु 'आदर्शप्रस्तावरत्नमाला' संस्कृतनिबन्धानां मौलिकः संग्रहः। शास्त्रीयक्षेत्रे लघुकौमुद्याम् उपेन्द्रविवृतिः' मध्यकौमुद्यां प्रभाकरी टीका, कणादगौतमीयपदार्थानुशासनम्, प्रारम्भिक पाणिनीयम्, न्यायबोधिनीसहिते तर्कसंग्रहे हिन्दी - टीका, विष्णुसहस्रनाम-हिन्दीभाष्यम् इत्येतास्तदीया रचनाः।

पं० अमरनाथ शास्त्री :

पश्चिम पञ्चापस्य 'रावलपिण्डी' नाम नगरे गृहीतजनुषाऽनेन 'वैदिकस्वरमीमांसा' नाम्ना वैदिकस्वरबोधको ग्रन्थो रचितः। चीनाभिसारः, पाणिनेः सूक्ष्मदर्शिता प्रभृतयोऽस्य केचन निबन्धाः संस्कृतसाहित्यस्य समर्थकाः विश्वसंस्कृते प्रकाशिताः।

डा० श्यामदेव पाराशरः :

होशियारपुर मण्डलान्तर्गत सतनौर ग्रामे लब्धजन्माऽयं सुकविः होशियारपुरस्थ राजकीय महाविद्यालये संस्कृतव्याख्याता स्वकाव्यमधुरिम्णा माघप्रभृतीनां पुराणकवीनां स्मारयति, शृङ्गारशती, अन्योक्तिशतकम्, काश्मीरसुषमा, इति प्रकाशिताः तस्य रचनाः। राजसिंहचरितम् अप्रकाशितं खण्डकाव्यम् कादम्बिनी संज्ञा च अपूर्णा कथा। अयम् आशुकविः संस्कृतसाहित्यसम्मेलनस्याधिवेशने स्वर्णपदकं लब्धवान्।

हंसराज अग्रवालः :

पञ्चापशासनस्यानेकेषु पदेषु लब्धप्रतिष्ठोऽयं प्रबन्धप्रदीप इति संज्ञया संस्कृतनिबन्धसंग्रहस्य रचयिता।

डा० श्रुतिकान्तः :

फ़गवाड़ा नगर निकटे हदियाबाद नाम्नि स्थितेनानेन विदुषा बहूनि वर्षाणि यावत् परिश्रम्य आनन्दवर्धनकृतस्य ध्वन्यालोक ग्रन्थस्यालोचनात्मकं संस्करणं सम्पादितम्। छात्राणां कृते तेन लघु निबन्धमणिमाला नाम्नो निबन्ध-संग्रहस्य रचनाऽपि कृता। हरबससिंह कृत गोविन्दसिंहचरितस्य गुरुगोविन्दसिंहभगवत्पादा इति नाम्ना संस्कृतेऽनुवादोऽपि कृतः।

प्रा० साधुरामः :

पूर्वं करोड़ीमल कालेजे संस्कृतप्राध्यापकेन तेन केचन संस्कृत

निबन्धा लिखिता। 'अहो मनस्विता' इति शीर्षकेण संस्कृत एकाङ्की च रचितः।

स्वयंप्रकाश शास्त्री :

रूपनगरान्नेदीयसि बलाचौर नाम्नि स्थाने लब्धजनुषाऽनेन यद्यपि भारतसेनाकार्यालय एव सेवा कृता तथापि सुरभारत्याः सपर्याऽपि काव्यरचनाद्वारेण विहिता। अस्य कृतयः - इन्द्रयक्षीयम्, मार्नासहचरितम्, अमृतमन्थनम् इति काव्यानि। तृतीया कृतिः उत्तर-प्रदेशशासनेन पुरस्कृता।

डा० बहादुरचन्द्रश्चापोत्कटः :

भारतसर्वकारस्य पुरातत्त्वविभागे निदेशकपदम् अधितिष्ठतोऽस्य पिपीलिकापौरुषम् इत्याद्याः अनेकाः प्रकीर्णाः काव्यकृतयः 'विश्वसंस्कृते' त्रैमासिके प्रकाशिताः।

यशोदानन्दन भारद्वाजः :

पश्चिम पञ्चापप्रदेशे लब्धजन्माऽयं भारतविभाजनानन्तरं देहलीनगरे कृतवसतिः इन्द्रप्रस्थीय - संस्कृत-परिषदो मन्त्री। अस्य संस्कृतभाषायां कृतयः - साहित्यावाटिकाख्यकाव्यसंग्रहे द्वे पुष्पे, कविसम्मेलनदिग्दर्शनम्, अय्यङ्गराभिनन्दनम्, मरुद्गणाः इति कृति-रप्रकाशिता।

पं० तेजोभानुः :

अभिनवभर्तृहरिरित्युपाधिभाजा 'रावलपिण्डी' नगरे लब्ध-जनुषानेन विदुषा विप्रपञ्चदशी, श्रीचन्द्रचरितम् काव्यम्, स्तुति-मुक्तावली, नीतिशतकम्, शृंगारशतकम्, वैराग्यशतशम् इत्यनेकाः कृतयो रचिताः।

डा० नरेन्द्रनाथः :

लाभपुरे गृहीतजन्मनाऽनेन कृष्णाभ्युदयनाटकम्, गौरवविलास इति द्वे काव्यकृती कृते।

सत्यव्रत शास्त्री :

रूपनगरनिकटे कुरालीग्रामस्थस्य मुकुन्दवल्लभस्य ज्योतिर्विदः पुत्रेण विदुषाऽनेन भैरवस्तवः खण्डकाव्यम्, भ्रमभञ्जनं नाटकं मातृ-स्तोत्रम् चेति तिस्रो रचनाः कृताः ।

ब्रजमोहन शर्मा :

होशियारपुरस्थेनाऽनेन संस्कृतसंजीवनी नामकं पुस्तकम् रचितम् ।

सूतदेव हंसः :

मलेरकोटलास्थित - राजकीयमहाविद्यालये व्याख्यात्राऽनेन काश्चित् प्रकीर्णकाव्यकृतयो रचिताः ।

अन्यप्रदेशोद्भवैरपि पञ्चनदप्रदेशं वृत्तिहेतोः श्रयद्भिर्यैः संस्कृतवाङ्मयस्याभिवृद्धिरनुष्ठिता तेषु माधवशास्त्रिभण्डारिणा शब्दकौस्तुभादिसहित-महाभाष्यस्य सम्पादनम् अनुष्ठितम् । गढ़वालाभिजनैरपि देहरादूनं निवासस्थानतयाऽऽश्रयद्भिर्महामहो-पाध्याय पं० परमेश्वरानन्दशास्त्रिभिः पूर्वं लाभपुरे पश्चाच्च जालन्धरनगरे चण्डीगढे चाध्यापयद्भिः सुरभारत्यां निम्नलिखिता कृतयो रचिताः—

नागानन्दनाटकस्य सम्पादनं टीका च, प्रतिमानाटकस्य काव्य-दीपिकायाश्च, विदग्धमुखमण्डनस्य च सम्पादनं टीकाश्च, साहित्य-दर्पणस्य तृतीयपरिच्छेदावधि टीका, तैत्तिरीयसंहिताया सायणभाष्य-स्य हिन्द्यामनुवादः (पूर्वार्धम्) मकरन्द-संस्कृतरत्नाकरयोः सम्पादनम् गिरिधरशर्मचतुर्वेदानां भाषणग्रन्थस्य सस्कृतानुवादः ।

डा० धर्मेन्द्र कुमार गुप्तः :

अयं जन्मना मध्यप्रदेशवास्तव्योऽधुना पटियालास्थिते पञ्जाबी-विश्वविद्यालये प्राचार्यः । अनेन दण्डिकृत काव्यादर्शस्य सम्पादनं कृतं तत्र स्वोपज्ञा सुदर्शनाख्या व्याख्या च रचिताः ।

डा० सिद्धेश्वर वर्मा :

प्रसिद्ध भाषाविज्ञानविदाऽनेन शिशुपालवधस्य सर्गद्वयात्मिका टीका रचिता। अन्यत्साहित्यं त्वांग्लभाषायामेव।

जगद्राम शास्त्री :

हिमाचलवास्तव्येनानेन पञ्चापप्रदेशस्य बहुषु नगरेषु संस्कृत-विद्यालयेष्वाजीवनम् अध्यापनकार्यम् अनुष्ठितम्। कविरत्नोपाधि-धारिणा तेन नैषधचरितस्य पञ्चसर्गावधि संस्कृतटीका, नागानन्द-नाटकस्य च टीका रचिता। मौलिककृतिषु च पञ्चसर्गात्मकं मदनचरितम् नाम काव्यं, छत्रशालविजयं नाम प्रौढं गद्यकाव्यं, संस्कृतसंगीतरामायणम्, प्रस्तावकौमुदी, कौण्डिन्यस्मृतिः इत्येता सुरभारत्या भाण्डागारम् अवर्धयन्। दुर्भाग्यवशात् एतासु केवलं कौण्डिन्यस्मृतिर्मुद्रिता।

डा० मथुरादत्त पाण्डेयः :

कूर्माञ्चलवास्तव्येन होशियारपुरस्थराजकीयमहाविद्यालये हिन्दी-विभागे प्राध्यापकेनाऽनेन पञ्चपल्लवम् इत्याख्यया एकाङ्कि-पञ्चकस्य स्वकृतस्य संग्रहः प्रकाशयितुमारब्धः।

आचार्य जगदीशप्रसाद सेमवालः :

गढवालवासिना अनेन कठोपनिषदो वस्त्वाश्रित्य यमनाचिकेत-सीयं नामैकाङ्कं नाट्यं, दुर्गास्त्रोत्रं, दशगुरुचरितं नाम काव्यम् इत्येता रचना रचिताः।

इन्द्रदत्त उनियालः :

टिहरी - गढ़वालवास्तव्यनानेन विश्वसंस्कृतस्य त्रैमासिकस्य सम्पादनं बहुभिर्वर्षैः क्रियते। अनङ्गहर्षकृतस्य तापसवत्सराजसंज्ञस्य नाटकस्य सम्पादनमपि अनुष्ठितम्।

शशिधर शास्त्री :

गढ़वालवास्तव्येन चण्डीगढस्थ पञ्चाप विश्वविद्यालयीय पत्रा-

चारविभागे प्राध्यापकेन अनेन शाङ्करसर्वस्वं वीरतरङ्गिणीति द्वे काव्ये शोधसुधा नाम्ना प्रौढः शोधग्रन्थश्च रचितः।

डा० सीताराम सहगलः :

पञ्चनदाभिजनेनाऽपि दिल्लीनगरे वसताऽनेन संस्कृतकाव्यान्यनेकानि हिन्दीभाषायामनूदितानि, प्रकीर्णाः काव्यकृतयश्च देवगिरि कृताः।

परमानन्द शास्त्री :

सहारनपुरमण्डलवास्तव्येनानेन हरिद्वारस्थ ऋषिकुले शिक्षा लब्धा, जीवनं पञ्चापप्रदेश एव यापितम्। अनेन लिखितः करुणा नामोपन्यासोऽपूर्ण एव। तस्य शैल्या वैशिष्ट्यं शिमलामार्गवर्णने-'अमरकोष इव वारिवर्गः, कामनीनितम्ब इव वर्तुल' इत्यादिवाक्यांशैः साध्वनुमातुं शक्यते। षोडशी इति शीर्षकेण च षोडशपद्यात्मिका कविता तदीयं काव्यपाटवं व्यनक्ति। सप्तपञ्चाशदुत्तरैकोनविंशतिशततमे ख्रिष्टाब्दे वृत्तस्य फगवाडानगरस्थ - संस्कृतसम्मेलनस्याध्यक्षता-भाषणं तस्य काव्यमयमासीद् यस्य कवित्वप्रौढिमा - 'कान्ता शरद् विजयते कविता सभा चे'ति श्लोकचरणेन स्फुटीभवति। संस्कृतगीतिसंग्रहे चलचित्रीयगीतरीत्या स्वरचितानां गीतानां मधुरं सङ्कलनम् अस्ति।

श्रीधरानन्दः :

गढ़वालवास्तव्येन कपूरथलास्थ रणधीर संस्कृत कालेजे प्रधानाध्यापकपदमधितिष्ठताऽनेन लघुसिद्धान्तकौमुद्याः संस्कृतटीकाऽपि रचिता।

पशुपति झा :

नेपालराज्यान्तर्गतजनकपुरनिकटे गृहीतजनुषा विदुषाऽनेन नेपाल संज्ञं महाकाव्यं विरचितम्। अयं शृंङ्गाररसस्य प्रौढः कविर्बहूनि प्रकीर्णकाव्यान्यापि विरचितवान्।

जगदीश झाः :

दरभङ्गराज्यवासिनाऽनेन विदुषाऽऽशुकविना लालबहादुर-शास्त्रिचरितं नाम प्रबन्धकाव्यं व्यरचि। बहुसहस्रश्लोकपरिमाणं किमपि प्राकृतकाव्यमपि तेन पूर्वं रचितमासीत्। तद्रचितानां प्रकीर्णं-काव्यानां तु भूयसी संख्या।

दुनीचन्द शास्त्री :

हिमाचलप्रदेशे गृहीतजनिमनाऽपि द्वाविंशतिवर्षेभ्यः होशियारपुरे वार्तहितो निर्वसताऽनेन विदुषा लोकगीतानि संस्कृतगिरि परिवर्ति-तानि तदीयलये चाऽनेकानि गीतानि रचितानि, 'धन्या गुरूणां मही' इति शीर्षकेण पञ्चनदप्रशस्तिः, नैके संस्कृतनिबन्धाश्च तस्य प्रतिभां परिचाययन्ति।

शिवप्रसाद भारद्वाजः :

उत्तरप्रदेशस्य पौड़ीगढ़वाल मण्डले गृहीतजन्मनाऽनेन होशियार-पुरे वृत्त्यर्थं तिष्ठता भारतसन्देशः, महावीरचरितम् इति काव्ये, मत्कुणायनं व्यंग्यकाव्यम्, अभिनवरागगोविन्दम् गीतिकाव्यं, जीवन जलधिरित्याख्यं गीतिकाव्यं, हूण-पराजयम्, सङ्गच्छवं संवदध्वम् वैतरणी इति शीर्षकशीर्षण्यानि नाटकानि, अजेय-भारतम्, केसरि-चङ्क्रम इति ध्वनिरूपके, साक्षात्कार इति नाम्ना भाणः, मायापतिः इति सामाजिकम् एकाङ्कं रूपकम्, संस्कृतनिबन्धमणिमाला, संस्कृत-निबन्धरत्नाकरश्चेति द्वौ निबन्धसंग्रहौ, महापुरुषचरितावलिरिति जीवनचरितम् हिन्दी भाषायां च कालिद सदर्शन इत्याख्यसमालो-चनात्मको ग्रन्थ इत्येताः कृतयो रचिता। शिक्षाकाले प्रतापाभ्युदयं नाटकम्, गङ्गावतरणचम्पूः, वेणीसंहारस्याऽङ्कद्वयावधि संस्कृत-व्याख्या इत्येता रचनाः कृताः। मञ्जूषाचौर्यात् तासां लोप एव जातः। शतप्रायानि प्रकीर्णकाव्यानि त्रिंशत्प्रायाश्च; शोधनिबन्धा यत्र तत्र प्रकाशमिताः। संस्कृतभाषाया लोकप्रियताकाम्यया तस्यां रुबाई,

गजल, कव्वाली, स्वच्छन्दकविता प्रभृतयोऽनेके प्रयोगाः कृताः। एतासु कृतिषु भारतसन्देशः, हूण-पराजयम्, कालिदास-दर्शन इत्येता रचना उत्तरप्रदेशशासनेन पुरस्कृताः। जोनराजकृतराजतरङ्गिण्या भाषानुवादः प्रकाशनं प्रतीक्षते। पञ्चवर्षाणि यावत् विश्वसंस्कृतम् इति त्रैमासिकस्य सम्पानदम् अप्यनुष्ठितम।

अद्यत्वे पृथग्राज्यरूपेण प्रतिष्ठितो हरियाणाप्रदेशः त्रिगर्तादयोऽद्यतनहिमाचलप्रदेशभागाः कतिपयवर्षाणि पूर्वं पञ्चापराज्यस्यै वाङ्गताम् अभजन्। अतः तेषु स्थानेषु लब्धजनुषां सुरभारतीसमुपासकानां कृतयोऽप्यत्र यथाज्ञ नं परिगण्यन्ते। एतच्चाऽत्र निवेदनीयं यदनेके पञ्चनदवास्तव्याः संस्कृतलेखका अत्र भारतराजधान्यां निवसन्ति परं तेषां परिचयाऽभावादेव नात्र लघौ निबन्धे तदीयनामोल्लेखः न तु हेत्वन्तरेणेति समाजेऽस्मिन् विद्यमानैस्तादृशैर्मनीषिभिः क्षन्तव्योऽयम् अल्पज्ञो जनः। सामग्रीलाभे सति तत्कृतिनामादिसमावेशोऽपि यथास्थानं विद्यास्यत इति प्रतिज्ञायते।

हरयाणाप्रदेशः—हरयाणाप्रदेशेऽनेके संस्कृतविद्वांसः स्वकृतिभिः सुरभारत्या भाण्डागारं समर्धितवन्तः। तेषु रोहतकमण्डलान्तर्गतमोई ग्रामवास्तव्यैश्चन्द्रमणिशास्त्रिभिरनेकाः काव्यकृतयो रचिताः। तासामन्यतमा नैगमप्रशस्तिरिति संज्ञा बीकानेरवास्तव्यस्य कस्यापि श्रेष्ठिनोऽभिनन्दिनी यस्यां कवयितुः परिचयः 'श्रीमांश्चन्द्रमणिः सुधाकरमणिः साहित्यचिन्तामणि' रिति पद्यांशेन दत्तः। तस्य वैदुष्यविषये च'धीचातुरी स्फुरति यस्य तुरीव तन्तौ साहित्यशास्त्रविषयेऽपि च शब्दशास्त्रे। हस्ते स्थिता हसति यस्य च वैद्यविद्या' इत्येवं विद्यागर्वोक्तिः। तस्य शारदाष्टकं नाम स्तोत्रमामूलं विरोधाभासालङ्कृतम्।

माधवाचार्यः :

करनालमण्डलान्तर्गतकौलग्रामे लब्धजनिः धार्मिकक्षेत्रे शास्त्रार्थ-

महारथोपाधिना प्रसिद्धोऽयं विद्वान् वक्तृतायामिव काव्यशक्तावपि विश्रुतकीर्तिरासीत्। कवीरचरितम्, ध्रुवचरितम्, दृष्टान्तदिग्दर्शनम् टुडेस्मृतिः इत्याद्यास्तस्य विख्याताः कृतयः। पुराणदिग्दर्शनम् हिन्द्यां लिखितमपि पुराणसाहित्यस्य प्रामाणिकत्वप्रतिष्ठापक सद् गरिमाण विभर्ति।

भिक्षारामः :

अयं हरयाणाप्रदेशस्य प्रख्यातो विद्वान् वेद-वेदाङ्गेषु निष्णातः शस्त्रार्थे च निपुण आसीत्। वैदिकसंस्कृत - व्याकरणविषयिणी कृतिः शब्दज्योत्स्ना, भृगुवंशम्, नेहरूवंशम्, राजेन्द्रकाव्यम् सामयिककाव्यम्, विष्णुस्तोत्रम्, आयुर्वेद-योगावलिकाव्यम् गांधिचरितम्, नेहरूचरितम्, पटेलचरितम्, मालवीयचरितम्, राजेन्द्रचरितम्, रवीन्द्रचरितम् इत्यादीनि गद्यकाव्यानि वेदसुधा, वेदान्तचम्पूः, शुद्धिसमालाचना, वेदानां सर्वादित्वम् इत्यादयो धार्मिका दार्शनिकाश्च प्रबन्धाः तस्य व्यापकपाण्डित्यस्य प्रख्यापकाः।

छज्जूराम शास्त्री :

विद्यासागर इत्युपाधिना विभूषितोऽयं मनीषी सर्वशास्त्रविन्महाकविः प्रवक्ता चाऽऽसीत्। तेनाऽपि प्रभूतं साहित्यं रचितम्। यथा-कुरुक्षेत्रमाहात्म्यम्, दुर्गाभ्युदयं नाम नाटकं, सुलतानचरितम्, परशुरामविजयं, शिवपार्वतीपरिणयम् इति काव्यानि साहित्य शास्त्रीयग्रन्थः साहित्यबिन्दुः पञ्चाध्यायपरिमिता निरुक्तटीका महाभाष्य-सिद्धान्तमुक्तावल्यादिविवृतिश्चेति।

सत्यदेव वाशिष्ठः :

भिवानीस्थेनाऽनेन नाडीतत्त्वदर्शनम् सत्याग्रहनीतिकाव्यम् विष्णुसहस्रनाम्नः सत्यभाष्यम् चतुर्षु भागेषु विभक्तम् इत्येताः प्रबन्धकृतयोऽनेकाः प्रकीर्णरचनाश्च कृताः।

हजारीलाल:

रोहतकनगरे गौड़ब्राह्मण - संस्कृत - महाविद्यालयेऽध्यापकेनानेन विदुषा संस्कृतमहाकविदिव्योपाख्यानम् शिवप्रतापविरुदावली, कादम्वरीशतकम् इत्येता अनेका: काव्यकृतया रचिता: ।

सीताराम शास्त्री :

भिवानीनगरस्थ ब्रह्मचर्याश्रमस्थापकेनाऽनेन विदुषा निरुक्तस्य विस्तृतं भाष्यं विरचितम् ।

राधाकृष्ण शास्त्री :

भिवानीवास्तव्येनाऽधुना संन्यासग्रहणानन्तरं निगमवोधतीर्थ इति संज्ञया विश्रुतेनानेन विदुषा हरियाणावैभवम् नाम प्रवन्ध काव्य रचितम् । इदं काव्यम् उत्तरप्रदेशशासनेन हरियाणाशासनेन च पुरस्कृतम् ।

विद्याधर गौड़:

अनेन विदुषा कर्मकाण्डक्षेत्रेऽनेके ग्रन्था: प्रणीता: । 'यथा कात्यायनश्रौत सूत्रस्यसरला वृत्ति:, कात्यायनश्रौतसूत्रस्य भूमिका, शतपथब्राह्मणभूमिका, शुल्बसूत्रव्याख्यानम् इत्यादय: ।

मेधाव्रत:

झज्जरगुरुकुल आचार्यपदं भजताऽनेन दयानन्ददिग्विजयं नाम महाकाव्यं, कुमुदिनीचन्द्र: इत्युपन्यास:, श्रीरामचरितामृतम् काव्यम् ईशोपनिषत् काव्यम्, ब्रह्मचर्यशतकम्, नारायणस्वामिचरितम् काव्यं ब्रह्मचर्यमहत्त्वम्, महर्षिविरजानन्दचरितम् इति काव्यानि, प्रकृति-सौन्दर्यं नाम नाटकम् इत्येता: कृतय: प्रणीता: ।

शिवनारायण शास्त्री :

भिवानीवास्तव्येन वर्तमाने देहल्यां करोड़ीमल महाविद्यालये संस्कृतविभागे प्रवक्त्रा हिन्दीभाषाया द्वारेण शास्त्रीयक्षेत्रे पुष्कलं

कर्म कृतम्। तस्य निरुक्तमीमांसा पञ्चाध्यायावधिनिरुक्त-व्याख्या सुतरां वैदुष्यपूर्णे कृती। नवाम्बराख्या गीताव्याख्योत्तर प्रदेशशासनेन पुरस्कृता।

हिमाचलप्रदेशवास्तव्याः साहित्यकाराः :

हरियाणाप्रदेशवास्तव्यानामिव हिमाचलप्रदेशवास्तव्यानां विदुषामपि संस्कृतसाहित्यभाण्डागारवृद्धौ महद्योगदानम्। बहुविधं साहित्यं तत्रत्यैर्मनीषिभी रचितं यस्य विवरणं समासतोऽधस्तात् प्रस्तूयते।

चन्द्रशेखरः 'बेबसः' :

हिमाचलप्रदेशान्तर्गत कुलूतनगरीवासिनाऽनेन गुरुनानकाष्टकम् हिमाचल-प्रशस्तिरिति द्वे काव्यकृती रचिते।

दिवाकरदत्त आचार्यः :

शिमलानगर्या जाखूस्थानात् प्रकाश्यमानाया दिव्यज्योतिरिति ख्यातायाः संस्कृतपत्रिकायाः सम्पादक आचार्यमहाभागः संस्कृत सेविनां नाऽविदितः। अस्याः पत्रिकाया द्वारेण स चिराद देवगव्याः संवर्धने संरक्षणे च निरन्तर निरत आस्ते। १९७१ वर्षे प्रकाशितस्तदीयो विशेषाङ्को देशस्य प्रमुखसंस्कृतसाहित्यकृतां सचित्रं परिचयं प्रस्तौतीत्यहो तदीयोपयोगिता। तस्य काश्चन काव्यकृतयोऽपि सन्ति। यथा- हिमालयः, रे तरुवर !, कृषकः इति त्रीणि प्रकीर्णकाव्यानि।

दुर्गादत्त शास्त्री :

हिमाचलप्रदेशान्तर्गतनलेटी ग्रामवास्तव्येनानेन राष्ट्रपथप्रदर्शनम्, तर्जनी, मधुवर्षणम् इति त्रीणि शिक्षाप्रदानि काव्यानि प्रणीतानि। हिमाचलगौरवम्, पश्य प्रभावं कलेः, स्नेहस्य सूत्रेण भवन्तु बद्धाः इति प्रकीर्णकाव्यकृतयस्तदीयरचनानाँ भावसम्पद आदर्शाः।

परमानन्दशास्त्री :

सिरमौरमण्डले गृहीतजनुषानेन मनीषिणा शास्त्रक्षेत्रे ऋक्सूक्त-

संग्रहस्योपोद्घातेन सहितं पञ्चाध्यायात्मकं निरुक्तरहस्यं षडध्यायात्मकं सांख्यसूत्रभाष्यम् तत्त्वज्ञानमञ्जूषा इति ग्रन्थत्रयं काव्यक्षेत्रे च पञ्चदशसर्गात्मकम् ऐतिहासिकम् इन्दुकाव्यं च निर्मिते ।

केशवराम :

महासूमण्डले गृहीतजन्माऽयं हिमाचलवैभवम्, अरुणपर्णाः 'वल्लकी' इति काव्यत्रयस्य रचयिता ।

चक्रधारी शास्त्री :

काँगड़ामण्डले लब्धजनुषोऽस्य विदुषः रसचन्द्रिका वात्स्यायनकामसूत्रम् इति द्वे कृती ।

आचार्य सुग्रीवानन्दः :

ऊनामण्डलान्तर्गत डेरा बाबा रुद्रू संज्ञस्याश्रमस्याध्यक्षेण विदुषाऽनेनाचार्येण चतुर्वर्गमीमांसेत्यपरनामधेयं परमार्थदर्शनं नाम पुस्तकं प्रणीतम् ।

मनसाराम शर्मा 'अरुणः' :

अस्य 'हे भारति !' 'जननान्तरसौहृदानि' इति द्वे काव्यकृती विद्येते । अभिनवकविताधारायाम् 'वनिका' माध्यमिका इति द्वे रचने । प्रथमा पद्ये द्वियीया च गद्ये वर्तते ।

शुकदेव शर्मा :

अस्य 'आधारः, निर्वाचनम् आशीर्वादः' इति त्रिषु भागेषु विभक्ता 'हिमाचले तिष्ठति विश्वतीर्थम्' इति प्रख्याता काव्यकृतिः । गोविन्दसागरस्य कथाऽपि तेन काव्यशैल्यां प्रणीता ।

कान्ताचार्यः :

अनेन विश्वस्य पञ्च महामानवान् अधिकृत्य विरचिता पद्यावली भारतस्य स्वाधीनतारजतजयन्ती, हिमाचलो दिव्यविभूतिभूमिः सुविकासो हिमाचले इति तिस्रः काव्यकृतयः तस्य प्रतिभाया निदर्शनम् ।

मथुराप्रसाद दीक्षितः :

जन्मना उत्तरप्रदेशवास्तव्योऽपि सोलननरेशस्य राजगुरुपदं भजन् महामहोपाध्यायविरुदभागयं विद्वान् हिमाचलप्रदेशेनाऽपि सह सम्बद्ध ऐवेत्यस्यां परम्परायां तस्य रचना अपि परिगणनीया भवन्ति। तासां नामान्यधस्ताल्लिख्यन्ते वीरप्रतापम्, पृथ्वीराजविजयम्, गाँधिविजयम्(द्वयङ्कम्), भारतविजयम् भक्तसुदर्शनम् इति पञ्च नाटकानि कामशास्त्रीयं केलिकुतूहलम्, अभिधानराजेन्द्रकोषः, पालिप्राकृतव्याकरणम्, प्राकृतप्रदीपः, मातृदर्शनम्, कुण्डगोलनिर्णयः रोगिमृत्युदर्पणम्!

बलदेव सिंहः

शिमलास्थिते हिमाचलप्रदेश - विश्वविद्यालये संस्कृतविभागाध्यक्षेण अनेन हर्षदर्शनम् इत्याख्यमेकाङ्कं नाटकं लिखितं यद् विश्वसंस्कृतं नाम्नि त्रैमासिके प्रकाशितम्।

काशीराम शास्त्री :

अनेन विदुषा वैशेषिकदर्शनस्य विस्तृतं पर्यालोचनं संस्कृतभाषया कृतम्। एतान् विदुषोऽतिरिच्य सन्त्यनेके येषां नामादिज्ञानं प्रस्तुतप्रबन्द्धुर्नाऽस्ति। अतो न तद्-विषये केनाऽप्यसूयाकषायितनयनेन भाव्यम्। लघौ च निबन्धेऽस्मिन् न कृतीनां गुणदोषादिसमीक्षणं तदुद्धरणदानं च संभवतीति न तदर्थं प्रयतितम्। एतावत्तु वक्तुं शक्यते यत सुरभारतीविषये पञ्चापप्रदेशे प्रतिदिनं जनेषूदासीनता प्रसरति। तत्र विरला एव जनाः संस्कृत-पठन-पाठने सरुचयः। एतादृश्यां स्थितौ तत्रोत्तरकाल एतादृश-साहित्यनिर्माणस्याशा क्षीण-क्षीणैव लक्ष्यत इति शम्।

विंशशताब्दीयरामकाव्यपरम्परायां

'श्रीरामविलापः'

(डा० रमाकान्त शुक्लः)

रामकथा हि अनितरसाधारणी कथा। तन्माध्यमेन विश्वस्मिन् अनेकैः कविभिस्तत्तद्भाषासु स्वानुभूतेरभिव्यक्तिः कृता। अतीते तु रामकथापरकाणि काव्यानि कविभी रचितान्येव, विंश्यां शताब्द्यामपि संस्कृतेऽनेकेषां रामसम्बन्धिनां काव्यानां रचना सञ्जाता। तत्र महाकाव्य-खण्डकाव्य-गीतकाव्य-चित्रकाव्य-नीतिकाव्यादीनि सन्ति। तेषां संक्षेपतश्चर्चात्र विधीयते। इदमपि प्रारम्भ एव निवेदनीयमस्ति यदत्र दत्ता सूचना न सम्पूर्णा। यतो हि अद्यापि अनेकानि काव्यानि अप्रकाशितावस्थायाम् अज्ञातावस्थायां च तिष्ठन्ति।

विंशशताब्देरारम्भ एव इलत्तूर रामस्वामी शास्त्रिणा (१८२४-१९०७) अष्टादशसर्गात्मकं **'सुरूपराघवम्' 'रामोदयं'** चेति महाकाव्यद्वयं रचितम्। 'विद्योदय' पत्रिकायां (१९१९) **'रामरसार्णव'** नाम एकोनविंशतिसर्गात्मकं काव्यं प्रकाशितं जातम्। श्रीकुट्टमन्तु चेरिय राम कुरुप (१८४७-१९०६) महाभागेन **'सीतास्वयम्वरम्'** नाम यमककाव्यं ग्रथितम्। सूर्यनारायण अध्वरिणा **'सीतापरिणयं'** काशीनाथेन 'वैदेहीपरिणयम्', श्रीमत्या कामाक्ष्या **अभिनवरामायणं** सोंठी भद्राद्रि रामशास्त्रिणा (१८५६-१९१५) श्रीरामविजयम् कविसार्वभौम कुडगल्लूर कुच्चुनि तुम्बुरान (१८५८-१९२६) महाभागेन त्रयोदशसर्गात्मकं **'रामचरितपूरणम्'** अष्टसर्गात्मकं **'उत्तररामचरितम्'** चेति महाकाव्यद्वयं, बटुकनाथशर्मणा (१८९५-

१९४४) च **'सीतास्वयम्वरम्'** नाम महाकाव्यं रचितमिति 'आधुनिकसंस्कृतसाहित्ये' डा० हीरालाल शुक्लः सूचयति।

१९७० तमेशवीयेऽब्दे श्रीरामविशाल त्रिपाठी **'श्रीराम-चरितम्'** नाम सरलकाव्यं, १९७८ तमेशवीयेऽब्दे आचार्य रमेशचन्द्र शुक्लः **'सुगमरामायणं'** डा० रेवाप्रसाद द्विवेदी च **'सीताचरितम्'** रचयामासुः। 'सुगमरामायणं' 'सीताचरितं' चावलम्ब्य 'अर्वाचीनसंस्कृते' एतत्पंक्तिलेखकेन डा० कृष्णकान्त-शुक्लेन डा० रमेशकुमार लौ - महाभागेन च विस्तृता चर्चा कृता; अतोऽत्र केवलं स्थानानुरोधात् सूच्यते यदत्र राष्ट्रीयभावना नवोत्साहेन समुल्लसति। 'रामचरितम्' हि सरलभाषायां बालानामपि कृते बोधगम्यं स्यादिति रचितम्। तत्र वाल्मीकिरामायण-अध्यात्म-रामायणयोर्वर्णितैव कथा प्रायेण स्वीकृता। 'तुलसीमानसनलिनम्' इत्याख्यो रामचरितमानसस्य काव्यानुवादोऽपि स्व विच्छित्तिं विकिरति।

खण्डकाव्येषु गणपतिवेदान्तकेसरी (१८७१-१९१३) - कृतम् **'तारकावधम्'** वेकंटेशवामन सोवाणी (१८८२-१९२५) रचितं **'रामचन्द्रोदयं'** (४सर्गात्मकं), सी० शंगुन्नि नायरकृतम् (१८९५-१९४२) **'सीताहरणम्'** आचार्य रमेशचन्द्र शुक्लकृतं (१९७४) **'भरतचरितामृतम्'** डा० लड्केश्वरशतपथीशर्मविरचितं **'रामचरितम्'** च उल्लेखनीयत्वेनावतिष्ठन्ते।

चित्रात्मकरामकाव्येषु मन्दिकल रामशास्त्री (१९०५) कृता **'सीतारावणसंवादझरी'** लक्ष्मणसूरिरचितं **'अक्षरमालिका-रामायणम्'** (१९०४,) **'गायत्रीरामायणं'** च (१९०३) उल्लेखितुं शक्यन्ते।

नीतिपरकरामकाव्येषु एल्लत्तूर सुन्दरराज अय्यंगार (१८४१-

१९०५) कृतं **'नीतिरामायणम्'** सुब्रह्मण्यसूरिकृतम् **आसेचनक-रामायणम्'** (१८५०-१९१३) च उल्लेखनीये स्तः।

गीतिकाव्येषु सुब्रह्मण्यम् सूरिकृतं 'रामावतारम्' **'विश्वामित्र-यागम्', 'सीताकल्याणम्'** च श्री भि० वलणकर रचित (१९८२) **'बालगीतं रामचरितम्'** च उल्लेखनीयतां भजन्ते यत्र संगीतानुसारं रामकथा प्रस्तूयते।

एतेषां काव्यानां विविधदृष्टिभिरध्ययनं कर्तुं शक्यते। आशासे शोधार्थिनोऽस्यां दिशि दत्तावधाना भविष्यन्ति।

'श्रीरामविलापः'

अस्यां रामकाव्यपरम्परायां नेपालवास्तव्यकविरत्न श्रीकृष्ण-प्रसाद 'घिमिरे' रचित १९८० ई० वर्षे प्रकाशितं 'श्रीरामविलापः'[1] इत्येतन्नामं खण्डकाव्यमपि समुल्लसति यद्विषये समासतोऽधस्तात् चर्चा क्रियते॥

कविनास्मिन् खण्डकाव्ये १७० पद्यैः सीताहरणानन्तरं लक्ष्मण-स्याग्रे कृतः श्रीरामस्य विलापो निबद्धः। कविना पूर्वार्द्धस्यादिमा-भिरष्टाभिर्वसन्ततिलकाभिः संक्षेपतो रामस्य जन्मनः सीताहरणपर्यन्तं कथानकमुपन्यस्तम्। तदनु सीतावियोगे पम्पासरोवरसमीपवर्ति-दृश्यावलिविलोकनविकलितस्य रामस्य विरहोच्छ्वासाः प्रस्तुताः। सर्वाण्यपि संयोगकालीनानि सुखदानि वस्तूनि रामाय दुःखदानि प्रतीयन्ते। उत्तरार्द्धे लक्ष्मणस्तं सान्त्वयति किन्तु रामः प्राकृतजन इव स्व प्रियावियोगे व्याकुलतां भजते। लक्ष्मणमयोध्यां गन्तुमाज्ञा-पयति स्वयं च वन एव निवसितुमिच्छति।

---

१. **रचयिताः** कविरत्न श्री कृष्णप्रसाद शर्मा घिमिरे। **प्रकाशकः** - श्रीकृष्ण-ग्रन्थमाला प्रकाशनम्, टङ्गाल गहिरीधारा, काठमाण्डू, नेपालः। **प्रकाशन-वर्षम्** १९८० ई०। **मूल्यम्**-५.०० रूप्यकाणि। **पृष्ठसंख्या**-६८।

रामस्य वच: श्रुत्वा लक्ष्मण: कथञ्चित् तस्योत्साहवर्धनं करोति। रामश्च तद्वचनमाकर्ण्य ऋष्यमूकगिरिं प्रति प्रतिष्ठते। इदमस्ति काव्यस्यास्य कथावस्तु।

काव्येऽस्मिन् कविना प्रकृतेरुद्दीपनरूपस्य चारु वर्णनं कृतम्। सर्वत्र प्रसादगुणस्य छटा विलोकनीया। क्वचित् (यथा पूर्वार्द्धे ४५, ६३ पद्ययो:) छन्दोदोष: सम्भवतो: मुद्रणानवधानतया दृश्यते।

सहृदयाणां मनोविनोदाय काव्यादेकोंऽश: प्रस्तूयते। सीतावियोगे श्रीराम: प्रियासहितं मयूरमेव आत्मनो वरतरं मन्यमानो लक्ष्मणं व्याहरति—

'तत्पश्य लक्ष्मणं! मयूरगणा अमी स्वौ
पक्षौ प्रसार्य बहुवर्णविचित्रितांशौ।
नृत्यन्त उद्गतमनोजविकारवेगा:
स्वा: स्वा प्रिया: समनुसृत्य मुदा रमन्ते॥
नृत्यन्तमात्मगतभावममुं मयूरं
दृष्ट्वा प्रियाऽस्य शिखिनी च विवृद्धकामा।
रन्तुं प्रियेण सह साऽऽरभताऽत्र गत्वा
मत्वा प्रियञ्च तदवस्थमुदारचेष्टम्॥
धन्यो भुजङ्गभुगयं शिखिनीद्वितीयो
यो नृत्यतीह ललितं प्रियया सहैवम्।
यस्य प्रियाऽपि न हृता खलराक्षसेन
यद्बान्धवाश्च सततं सुखिनोऽपि सन्ति॥

(रामविलाप:, पूर्वार्ध: ४७-४९)

काव्यस्यास्य रचना कविना १९७२ तमे ईशवीयाब्दे कृता, प्रकाशनं च १९८० तमेशवीयेऽब्दे कृतम्। कविनास्य हिन्द्यनुवादोऽपि कृत:।

वस्तुतः प्रियाविहीनस्य कस्यापि प्राणिनो या स्थितिर्भवितुं शक्यते सैव स्थितिः सीताविहीनस्य रामस्यापि कविना चित्रिता। अत एव ग्रन्थान्ते कविः कथयति—

'तद्ब्रह्मणोऽपि भवति स्थितिरीदृशी चेत्
काऽस्माकमत्र सुकथेति विचारितेऽस्मिन्।
कृष्णप्रसादघिमिरेकृतखण्डकाव्ये
ग्रन्थः समाप्तिमगमल्लघुसोत्तरार्धः ।।

(उत्तरार्धः, ८९)

नून हीदं काव्यं सहृदयानां चेतस्सु रसधारां प्रवाहयितुं समर्थम्। कविरत्न श्रीघिमिरे-महाभागोऽस्य रचनार्थं वर्धाप्यते ।

महाकविमुनिश्रीज्ञानसागरस्य संस्कृतकाव्येषु गीतानि

(लेखिका : डा० किरण टण्डन, एम०ए०, पीएच०डी० साहित्याचार्या)
प्राध्यापिका, संस्कृतविभागः,
कुमायूँ विश्वविद्यालयः, नैनीतालः (उ०प्र०)

मुनिश्रीज्ञानसागरस्य अतिसंक्षिप्तः परिचयः

महाकविमुनिश्रीज्ञानसागरस्य जन्म राजस्थानप्रान्तस्य राणौलीनामके ग्रामे एकस्मिन जैनपरिवारे नयन-ग्रह-वसु-भू (१८९२) संज्ञके ईशवीये वत्सरे जातमासीत्। अस्य बाल्ये एव एतदीयस्त पितुर्मृत्युर्बभूव। येन, एतदीयेन परिवारेण महतः आर्थिकसंकटस्य साम्मुख्यं कर्त्तव्यं समापतत्। स्वीयं तदेव पारिवारिकं कष्टं तथा सामाजिकीः कुरीतीः समनुभूय अनेन भोगविलासाभ्यां तिलाञ्जलिर्दत्तः; तथा आजीवनं ब्रह्मचर्यव्रतं परिपालितम्। अनेन स्वकीयं समग्रमेव जीवनम्, अध्यापनं, ग्रन्थलेखनं, जैनधर्मस्य प्रचारप्रसारौ, परोपकारम्, आध्यात्मिकचिन्तनं च कुर्वता एव व्यतीतम्।

अनेन महाकविना स्वीये परिश्रमपूर्णे जीवने द्वाविंशतिकृतीनां प्रणयनं कृतमस्ति। आसु कृतिषु अष्ट कृतयः संस्कृतभाषायां सन्ति तथा चतुर्दशकृतयो हिन्दीभाषायां वर्तन्ते। संस्कृतभाषायां प्रणीतासु कृतिषु जयोदय-वीरोदय - सुदर्शनोदय - श्रीसमुद्रदत्तचरितनामकानि चत्वारि महाकाव्यानि सन्ति; दयोदयचम्पूनामकमेकं चम्पूकाव्य-

मस्ति; तथा मुनिमनोरञ्जशतकनामकमेकं मुक्तककाव्यं विद्यते; एवञ्च प्रवचनसार-सम्यक्त्वसारशतकनामिके द्वे दार्शनिक्यौ कृती वर्त्तेते।

हिन्दीभाषायाम् ऋषभावतार-गुणसुन्दरवृत्तान्त - भाग्योदय-नामिकाः तिस्रः साहित्यिकाः कृतयो वर्त्तन्ते; एवमेव जैनविवाह-विधि- तत्त्वार्थसूत्रटीका-कर्त्तव्यप्रदर्शन - विवेकोदय-सचित्तविवेचन-देवागमस्रोतोहिन्दीपद्यानुवाद - नियमसारपद्यानुवाद - अष्टपाहुड-पद्यानुवाद - मानवजीवन - स्वामीकुन्दकुन्द और सनातन जैनधर्म-समयसार-नामिकाः एकादश जैनदार्शनिक्यः कृतयः सन्ति। महाकवेरिमे सर्वे एव ग्रन्थाः न केवलं जैनेन धर्मेण दर्शनेन च सम्बद्धाः सन्ति, अपितु इमे संस्कृत-हिन्दीवाङ्मयोपवनयोः स्वीयस्य काव्यात्मकस्य सौरभस्यापि प्रसारकाणि पुष्पाणि सन्ति। इमे विद्वज्जनानां न केवलं बुद्धिविलाससाधनानि सन्ति; अपितु जन-मानसस्य कृते स्वास्थ्यदायकं परमौषधमपि सन्ति। अतः एतदीय-कृतीनां स्वाध्यायः परिशीलनं च मानवतायाः कृते परमोपयोगितां धारयिष्यतीति मामकीनो विश्वासः।

गीतम् (रागो रागिणी)

तालेन रागेन च निबद्धा कविता गानविषयीभूय गीतसंज्ञां धारयति। लयबद्धता, काव्यचारुता, रागात्मकता च संगीतस्य गुणाः सन्ति। साहित्य-संगीतयोः परस्परं महान् सम्बन्धोऽस्ति। अनयो-रेकत्र संस्थितिः सहृदयाय आह्लाददाने सहायिका भवति। अतो यदि कश्चित् कविः स्वीये काव्ये संगीतमपि सम्मेलयति, तर्हि तस्य काव्यं मनोरमं बोभूयते।

मुनिश्रीज्ञानसागरकाव्येषु गीतानि

मुनिश्रीज्ञानसागरेण स्वीयेषु संस्कृतकाव्येषु स्थाने-स्थाने स्वकीयसंगीतप्रियतायाः परिचयो दत्तोऽस्ति। कदाचिद् वसन्त-

शोभया आकृष्टो भूत्वा, कदाचिद निशानिविडभयदायकान्धकाराद् भीत्वा, कदाचित्प्राभातिकसौन्दर्येण प्रभावितो भूत्वा, कदाचिच्च भक्तिवशो भूत्वा तेन गीतरूपेणापि स्वहृदयोद्गाराः प्रकटिताः सन्ति। तदीयकाव्येषु गीतानि गीतानि प्रभाती-काफीहोलिका-सारङ्ग-श्यामकल्याण-सौराष्ट्रीयनामकेषु रागेषु निबद्धानि सन्ति। कतिपयानि गीतानि कव्वालीशैल्यामपि समुपलभ्यन्ते।

अस्य महाकवेः काव्येषु प्राप्तानां गीतानां संख्या सप्तत्रिंशद् वर्तते। एषु चत्वारि गीतानि जयोदय-महाकाव्यस्य त्रयोविंशे सर्गे सन्ति एकं च पञ्चविंशे सर्गे अस्ति। अष्ट गीतानि सुदर्शनोदयस्य पञ्चमे सर्गे सन्ति; नव गीतानि षष्ठे सर्गे सन्ति; अष्ट गीतानि सप्तमे सर्गे सन्ति; द्वे गीते अष्टमे सर्गे स्त,; त्रीणि च गीतानि नवमे सर्गे विद्यन्ते। एकं च गीतं दयोदयचम्पूकाव्ये सप्तमे लम्बे लभ्यते।

जयोदयमहाकाव्ये दयोदयचम्पूकाव्ये च लभ्यमानानि गीतानि केषु रागेषु सन्तीति समुल्लेखने न लभ्यते। तेषु रागनिवेशकरणं गायकाधीनं संगीतकाराधीनं च। कृतमस्ति किन्तु सुदर्शनोदय-काव्ये द्वे गीते प्रभातरागभैरवे, द्वे गीते काफीहोलिकारागे, षड् गीतानि सारङ्गरागे, द्वे गीते श्यामकल्याणरागे, एकादश गीतानि दैशिकसौराष्ट्रीयरागे, षड् गीतानि कव्वालीशैल्यां, एकं गीतं छन्दचालशैल्यां तथा एकं गीतं रसिकरागे निबद्धमस्ति। प्रभाती-काफीहोलिका-सारङ्ग-श्यामकल्याणनामानश्चत्वारो रागास्तु संगीत-क्षेत्रस्य बहुचर्चिताः रागाः सन्ति, दैशिकरागः सौराष्ट्रीयक्षेत्र-विशेषस्य रागोऽस्ति; कव्वालीशैली च अद्यतनस्य उर्दूप्रियस्य सहृदयसमाजस्य अतिप्रसिद्धा गायनशैली वर्तते; रसिकरागो व्रज-प्रदेशे लब्धप्रसरस्य रसियानामकस्य रागस्यैव नामान्तरं प्रतिभाति; किन्तु छन्दचालनामिकायाः गायनशैल्याः परिचयोऽधुनापि मम

गवेषणाविषयो विद्यते।

अथ कतिपयगीतानां रागसहितानि उदाहरणानि प्रस्तूयन्ते—

(क) प्रभाती (भैरवरागः)

अस्य रागस्य संक्षिप्तः परिचयः इत्थमस्ति—

रागः - भैरवः। थाटः - भैरवः। जातिः - सम्पूर्णा। वादी - धैवतः। संवादी - ऋषभः। स्वरः - रे - धौ कोमलौ, अन्ये शुद्धा। गायनसमयः - प्रभातम्; तथा गेयवस्तु - भक्तिगीतम्।[1]

महाकविना मुनिश्रीज्ञानसागरेण अस्मिन् रागे निबद्धं गीतमित्थमस्ति—

(अ)

अहो प्रभातो जातो भ्रातो भवभयहरजिनभास्करतः।स्थायी।

पापप्राया निशा पलायामास शुभायाद्भूतलतः।

नक्षत्रता दृष्टिपथमपि नाञ्चति सितद्युतेर्निर्गमनमतः।स्थायी।

खगभावस्य च पुनः प्रचारो भवति दृष्टिपथमेव गतः।

क्रियते विप्रवरैरिहादरो जडजातस्य समुत्सवतः।।स्थायी।।

साऽमेरिकादिकस्य तु मलिना रुचिः सुमनसामस्ति यतः।

भूराजी शान्तये वन्दितुं पादौ लगतु विरागभृतः।।स्थायी।।[2]

(ख) काफीहोलिकारागः

अस्य रागस्य संक्षिप्तः परिचयः एवम्भूतो विद्यते—

रागः - काफी। थाटः - काफी। जातिः - सम्पूर्णा। वादी - पः। संवादी - सः। स्वरः - ग - नी कोमलौ, अन्ये शुद्धा। गायन-

---

१. पं० विनायकरावपटवर्धनविरचितं रागविज्ञानम्, तृतीयभागः, सप्तमं संस्करणम्, पृ० सं० १०६

२. सुदर्शनोदयम्, ५/प्रथमगीतम्। एवमेव द्रष्टव्यम् तदेव ५/द्वितीयगीतम्।

समयः - रात्रिमध्यकालः; तथा गेयवस्तु होली-भजनादीनि ।[3]

अस्मिन् रागे मुनिश्रीज्ञानसागरेण निबद्धं गीतमत्र उदाह्रियते—

(अ)

कदा समयः स समायादिह जिनपूजायाः ।।स्थायी।।
कञ्चनकलशे निर्मलजलमधिकृत्य मञ्जुगङ्गायाः ।
वाराधारा विसर्जनेन तु पदयोर्जिनमुद्रायाः,
लयोऽस्तु कलङ्ककलायाः ।।स्थायी।।
मलयगिरेश्चन्दनमथ नन्दनमपि लात्वा रम्भायाः ।
केशरेण सार्धं विसृजेयं पदयोर्जिनमुद्रायाः,
न सन्तु कुतश्चापायाः ।।स्थायी।।
मुक्तोपमतन्दुलदलमुज्ज्वलमादाय श्रद्धायाः ।
सद्भावेन च पुञ्जं दत्त्वाऽप्यग्रे जिनमुद्रायाः,
पतिः स्यां स्वर्गरमायाः ।।स्थायी।।
कमलानि च कुन्दस्य च जातेः पुष्पाणि च चम्पायाः ।
अर्पयामि निर्दर्पतयाऽहं पदयोर्जिनमुद्रायाः,
यतः सौभाग्यं भायात् ।।स्थायी।।[4]

(ग) श्यामकल्याणरागः

अस्य परिचयः संक्षेपेण अनेन प्रकारेण अस्ति—

रागः - श्यामकल्याणः । थाटः - काफी । जातिः - षाडवी

---

३. (क) वसन्तः, संगीतविशारदम् (प्रकाशकः-संगीतकार्यालयः, हाथरसः) पृ० सं० १८१ ।
(ख) पं० विनायकरावपटवर्धनः, रागविज्ञानम्, तृतीयभागः, पृ० सं० १८४ ।

४. सुदर्शनोदयम्, ५/चतुर्थगीतस्य प्रथमे चत्वारो भागाः । एवमेव द्रष्टव्यम् । तदेव, ५/पञ्चमगीतस्य प्रथमौ द्वौ भागौ ।

सम्पूर्णा। वादी - पञ्चमः। संवादी - षड्जः। स्वरः - निः कोमलः, मः तीव्रः तथा गायनकालः - रात्रिप्रथमयामः।[५]

अस्मिन् रागे मुनिश्रीनिबद्धं गीतं प्रस्तूयते—

(अ)

।जनप परियामो मोदं तव मुखभासा ।।स्थायी।।
खिन्ना यदिव सहजकद्विधिना, निःस्वजनो निधिनासा ।।
सुरसनमशनं लब्ध्वा रुचिरं सुचिरक्षुधितजनाशा ।।
केकिकुलं तु लपत्यधिमधुरं जलदस्तनितसकाशात् ।।
किन्न चकोरदृशोः शान्तिमयो प्रभवति चन्द्रकला सा ।।[६]

(घ) सारङ्गरागः

सारङ्गरागस्य संक्षिप्तः परिचयः इत्थमस्ति—

रागः - शुद्धसारङ्गः। थाटः - काफी। जातिः - षाडवी। वादी - रे। संवादी - पः। स्वरः - उभौ मौ उभौ च नी; तथा गायनसमयः - दिनस्य द्वितीयं प्रहरम्।[७]

अस्मिन् रागे मुनिश्रीविरचितं गीतमत्र समुद्राङ्क्यते—

(अ)

स वसन्त आगतो हे सन्तः, स वसन्तः ।।स्थायी।।
परपुष्टा विप्रवराः सन्तः सन्ति सपदि सूक्तमुदन्तः ।।
लताजातिरुपयाति प्रसरं कौतुकसान्मधुरवरं तत् ।।

---

५. पं० नारायण लक्ष्मणगुणेकृता संगीतप्रवीणप्रदर्शिका (प्र०भा०), द्वितीय-संस्करणम्, पृ० सं० ५८

६. सुदर्शनोदयम्, ५/षष्ठं गीतम्। अपि च द्रष्टव्यम् तदेव, ५/सप्तमं गीतम्।

७. संगीतविशारदम्, पृ० सं० १८२

लसति सुमनसामेष समूहः किमुत न सखि विस्फुरदन्तः ।।
भूरानन्दमयीयं सकला प्रचरति शान्तेः प्रभवं तत् ।।[८]

(ङ) सौराष्ट्रीयरागः

अस्य रागस्य संक्षिप्तः परिचयः इत्थमस्ति—

रागः - सौराष्ट्रीयः । थाटः - भैरवः । वादी - मध्यमः । संवादी - षड्ज. । स्वरः - उभौ धो; तथा गायनसमयः - प्रभात-कालः ।[९]

अस्मिन् रागे मुनिश्रीनिवद्धं गीतमित्थमस्ति—

(अ) न हि परतल्पमेति स ना तु ।।
किन्नु भूरागस्य भूयाद् बुधो विपदे जातु,
क्षणिकनर्मणि निजयशोमणिमसुलभं च जहातु ।
न हि परतल्पमेति स ना तु ।।
भोजने भुक्तोज्झिते भुवि भो जनेश्वरि भातु,
रुक्करोऽपि स कुक्कुरो न हि परो दृशमपि यातु ।
न हि परतल्पमेति स ना तु ।।[१०]

(च) कव्वाली

संगीत द्वे गायनशैल्यौ स्तः—'वड़ा ख्याल' नाम्नी 'छोटा ख्याल' नाम्नी च । कव्वाली 'छोटा ख्याल' नामिकाया गायनशैल्याः

---

८. सुदर्शनोदयम्, ६/प्रथमं गीतम् । एवमेव द्रष्टव्यम् - तदेव, ६/द्वितीयं गीतम् ।

९. पं० विष्णुनारायणभातखण्डे कृत हिन्दुस्तानी संगीतपद्धतिः, पृ० सं० ३४१ ।

१०. सुदर्शनोदयम्, ६/सप्तमस्य गीतस्य प्रथमौ द्वौ भागौ । अपि च द्रष्टव्यम् तदेव, ६/नवमस्य गीतस्य प्रथमे त्रयो भागाः ।

भेदो विद्यते। सर्वप्रथमम् अस्याः अविष्कारः ईशवीये चतुर्दशशतके अलाउददीनखिलजीसभायाः सुप्रद्धिसदेन संगीतज्ञेन कविना राजमन्त्रिणा श्रीमता हजरत अमीरखुसरुणा कृत आसीत्। अस्मिन् गीतविशेषे कविता लघीयसी भवति। शृङ्गारः करुणो वा रसः प्रधानो भवति। उर्दू-पारसीभाषयोः प्रयोगो भवति। मुसलिमसमाजे तदतिरिक्ते च हिन्दुसमाजेऽपि अस्याः शैल्याः प्रचारः प्राप्यते। अस्याः गायकाः 'कव्वालाः' कथ्यन्ते। कव्वालीगायनकाले ढोलकाख्यो मृदङ्गविशेषः करतालाश्च वाद्यन्ते। इयं द्रुतलये गीयते। अस्याम् एकताल-त्रिताल-झपताल-रूपक-पश्तो प्रभृतीनां तालविशेषाणां विशिष्टः प्रयोगो भवति।[११]

उदाहरणम्—

समस्ति यताऽऽत्मनो नूनं कोऽपि महिमूर्ध्न्यमहो महिमा ॥
न स विलापी न मुद्वापी दृश्यवस्तुनि किल कदापि।
समन्तात्तत्र विधिशापिन्यदृश्ये स्वात्मनीव हि या।समस्ति०।
नरोत्तमनवीनता यस्मान्न भोगाधीनता स्वस्मात्।
सुभगतमपक्षिणस्तस्मात् किं करोत्येव साऽयहिमा।समस्ति०।
न दृक् खलु दोषमायाता सदानन्दा समा याता।
क्वापि बाधा समायाता द्रुमालीवेष्यते सहिमा ।।समस्ति॥
इयं भूराश्रितास्त्यभितः कण्टकैर्यत्पदो रुदितः।
स चर्मसमाश्रयो यदितः कुतः स्यात्तस्य वा न हिमा
।।समस्ति०।।[१२]

---

११. (क) विक्रमादित्यसिंह निगमः, संगीतकौमुदी, पृ० सं० ११३-११४
(ख) शान्तिगोवर्धनः, संगीतशास्त्रदर्पणः, पृ० सं० ६६-६७।
(ग) वसन्तः, संगीतविशारदम्, पृ० सं० १५४

१२. सुदर्शनोदयम्, ८/प्रथम गीतम्। अपि च द्रष्टव्यम् तदेव, ८/तृतीयगीतम्।

(छ) छन्दचालगायनशैल्या उदाहरणम्

छविरविविकलरूपा पायात् साऽऽर्हतीति नः स्विदपायात् ।।
वसनाभरणैरादरणीयाः सन्तु मूर्त्तयः किन्तु न हीयान् ।
तासु गुणः सुगुणायाश्छविरविकलरूपा पायात् ।।
धरा तु धरणीभूषणताया नैव जात्वपि स दूषणतायाः ।
सहजमञ्जुलप्राया छविरविलकरूपा पायात् ।।
यत्र वञ्चना भवेद्रमायाः किङ्करिणी सा जगतो माया ।
ऐमि तमां सदुपायान् छविरविकलरूपा पायात् ।।
यत्र मनाङ् न कलाऽऽकुलताया विकसति किन्तु कला-
कुलतायाः ।
भूरानन्दस्याऽऽयाज्छविरविकलरूपा पायात् ।।[१३]

(ज) रसिकरागोदाहरणम्

भोः सखि जिनवरमुद्रां पश्य नय दृशमाशु सफलतां स्वस्य ।।
रागरोषरहिता सती सा छविरविरुद्धा यस्य,
तुला त्विलायां किं भवेदपि दृगपि न सुलभा तस्य ।।
पुरा तु राज्यमितो भुवः पुनरञ्चति चैक्यं स्वस्य ।
योग-भोगयोरन्तरं खलु नासा दृशा समस्य ।।
कल इति कल एवाऽऽगतो वा पल्यङ्कासनमस्य ।
बलमखिलं निष्फलं च तच्चेदात्मबलं न हि यस्य ।।
यद्यसि शान्तिसमिच्छकस्त्वं सम्भज सन्निधिमस्य ।
भूरामादिभ्यस्तिलाञ्जलिमर्पय नर्मोदस्य ।।[१४]

---

१३. सुदर्शनोदयम्, ५/अष्टमं गीतम् ।

१४. तदेव, ५/तृतीयं गीतम् ।

संगीतशास्त्रिभिः यस्य रागस्य गानाय यः समयो निर्धारितोऽस्ति, मुनिश्रीज्ञानसागरेण स्वगीतेषु तस्य रागस्य गानार्थं स एव समयो गृहीतोऽस्ति। काफीहोलिकारागस्य श्यामकल्याणरागस्य च गायनसमयो रात्रेः प्रथमं प्रहरमस्ति। अत एव सुदर्शनेन स्वक्रियमाणे सन्ध्याकालीने पूजने एव एतौ रागौ गीतौ स्तः। सारङ्ग-रागस्य गायनसमयो दिवसस्य द्वितीयं प्रहरमस्ति। अत एव महाकविना अस्मिन् रागे निबद्धस्य गीतस्य विषयवस्तुरूपेण वसन्तवेलावर्णनस्य चयनं कृतमस्ति। चम्पापुरवासिभिः सर्वैः मध्याह्नसमये एव वसन्तोत्सवो वनविहारश्च विहितोऽस्ति।

संगीतं नाम भावपक्षं द्रढयितुं मधुरतमं साधनं विद्यते। स्वीयेषु काव्येषु कविना यत्र यत्र इमानि गीतानि निवद्धानि सन्ति, तत्र-तत्र कवेः संगीतप्रियतायाः परिचयस्तु लभ्यते एव, सहैव तस्य-तस्य स्थलविशेषस्य काव्यसौन्दर्यमपि वृद्धिं यातमस्तीति काव्ये संगीतमहत्त्वं सिद्ध्यतितमामिति सारः।

●

भाति मौरीशसम्

(डा० रमाकान्त शुक्ल:)

(१)

भारताम्भोधिमुक्ताफलं भास्वरं,
पूर्वरूपं पृथिव्यां दिवः सुन्दरम् ।
भारतं रूपमेवापरं धारयत्
भाति मौरीशसं भाति मौरीशसम् ।।

(२)

इक्षुमाधुर्यपूर्णं, प्रकृत्याः प्रियं
कल्पनाकौशलं, पर्वतश्रीयुतम् ।
श्यामशस्यावृतं पुष्पाहासान्वितं
भाति मौरीशसं भाति मौरीशसम् ।।

(३)

वेशभूषाशनोपासनापद्धति-
क्रीडनामोदसंस्कारवृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं हि तत्
भाति मौरीशसं भाति मौरीशसम् ।।

(४)

वेदभाभासितं सत्कलालासितं
रम्यसंगीतसाहित्यसौहित्यभूः ।
भारतीवल्लकीझङ्कृतैर्झङ्कृतं
भाति मौरीशसं भाति मौरीशसम् ॥

(५)

संस्कृतं गुर्जरीं तामिलं तेलगुं
भोजपुरीं क्रियोलं महाराष्ट्रिकाम् ।
फ्रेञ्चहिन्द्यांग्लभाषाश्च नित्यं वदत्
भाति मौरीशसं भाति मौरीशसम् ॥

(६)

होलिका-दशहरा-पर्वकोजागरी-
पोङ्गल - श्रावणी - दीपमालामयम् ।
ईद-वैशाखि-कृसमस् - युगादीन् दधत्
भाति मौरीशसं भाति मौरीशसम् ॥

(७)

शङ्करं शम्प्रदं माधवं राघवं
पार्वतीं राधिकां जानकीं च स्तुवत् ।
मारुतिं बुद्धदेवं जिनं च स्मरत्
भाति मौरीशसं भाति मौरीशसम् ॥

(८)

मन्दिरैर्मस्जिदैश्चैत्यगिर्जागृहै-
रार्यगेहैर्गुरुद्वारकैः राजितम् ।
कर्मभूः शर्मभूः धर्मभूः मर्मभूः
भाति मौरीशसं भाति मौरीशसम् ॥

(९)

राजमार्गेषु पुष्पप्रहासैर्युतम्
आम्र-लीची-लिली[1]-ताल[2]-शोभायुतम् ।
भास्करास्तोदयाभ्यां[3] भृशं रञ्जितम्
भाति मौरीशसं भाति मौरीशसम् ॥

(१०)

सप्तवर्णां[4] धरित्रीं विचित्रां दधत्
इन्द्रचापप्रभाभिर्भृशं[5] रञ्जितम् ।
रम्यमन्तूरियम्[6] पुष्पहासैर्युतम्
भाति मौरीशसं भाति मौरीशसम् ॥

(११)

यत्र नानार्तवः सन्ति दृश्याः सदा
यस्य चेतोहरं रम्यरूपं तथा ।
हिन्दपाथोधिरिङ्गत्तरङ्गार्चितं
भाति मौरीशसं भाति मौरीशसम् ॥

(१२)

मोक्षदांगुष्ठलम्बैर्नगैः[८] शोभितम्
अङ्गरक्षाद्रि-मुण्डाद्रि[९]- सम्पालितम् ।
निर्झराणां रवैः स्वीयवृत्तं वदत्
भाति मौरीशसं भाति मौरीशसम् ॥

(१३)

क्वापि यात्रिद्रुमैः[१०] क्वापि चिञ्चाद्रुमैः[११]
क्वाप्यनन्नास - सत्क्षेत्रकैर्मोदितम् ।
क्वापि लोंगान[१३]-चीनामृतैः[१४] स्वादु सत्
भाति मौरीशसं भाति मौरीशसम् ॥

(१४)

आतिथेयो भवेत् शीघ्रमभ्यागतो
यत्र कैश्चित्क्षणैरेव दूरागतः ।
शान्तिदं धर्मपीयूषपूरप्लुतं
भाति मौरीशसं भाति मौरीशसम् ॥

(१५)

लोकनृत्याञ्चितं लोककृत्यान्वितं
लोकगाथांकितं लोकगीतान्वितम् ।
रागरङ्गोत्सवैर्मण्डितं वर्धितं
भाति मौरीशसं भाति मौरीशसम् ॥

(१६)

यस्य संदृश्य संदृश्य शोभा नवाः
यस्य संस्मृत्य संस्मृत्य नाना कथाः ।
रोमहर्षो नृणां जायते तत्प्रियं
भाति मौरीशसं भाति मौरीशसम् ॥

(१७)

'विर्जिनी-पाल'-गाथाङ्कितं[१५] कोमलं
चित्तविश्रामभूमिः कवीनां प्रिया ।
सर्पदंशैर्विहीनं मधुप्लावितं
भाति मौरीशसं भाति मौरीशसम् ॥

(१८)

"हन्त ! डोडोतपस्वी[१६] खलैर्नाशितः"
इत्थमाक्रुश्य यत्र प्रकृत्या भृशम् ।
चक्रवातैक्रमेणेव निःश्वस्यते
तत्प्रकृत्या गृहं भाति मौरीशसम् ॥

(१९)

सांस्कृतं मेलनं[१७] योजयित्वाखिलान्
विज्ञधुर्यान् नयज्ञाँस्तथा धार्मिकान् ।
गान्धिसंस्थान - प्रेक्षागृहे[१८] दर्शयत्
भाति मौरीशसं भाति मौरीशसम् ॥

(२०-२१)

हे रमाकान्त ! पश्यात्र दामोदरं
वासुदेवं हि विष्णुं दयालुं हरिम् ।
लक्ष्मणं रामयुक्तं सुरेशं शिवं
नागराजं रवीन्द्रानिरुद्धारुणान्[20] ।
भो रमाकान्त ! पश्यात्र गेहे सताम्
मारुतेर्वैजयन्तीं[21] लसन्तीं शुभाम् ।
पश्य ! विस्मृत्य पीडामतीतां निजां
भाति मौरीशसं भाति मौरीशसम् ॥

(२२)

यस्य गङ्गातटाके[22] शिवं शङ्करं
पूजयित्वा लभन्ते सुखं सज्जनाः ।
'स्वस्तिका'[23]-होलिका-रागपूर्णं हि तत्
भाति मौरीशसं भाति मौरीशसम् ॥

(२३)

होलिका श्रीमतां जीवनं पूरयेत्
सौख्य-शोभा-समुल्लासभावैस्सदा ।
सेचितं प्रेमरागेण[24] चोल्लासितं
भातु मौरीशसं भातु मौरीशसम् ॥

(२४)

हर्षमुल्लासमोजो दधाना सदा
रत्नगर्भा धरेयं सदा राजताम् ।
शारदा - श्रीसपर्यापरं सत्सदा
भातु मौरीशसं भातु मौरीशसम् ॥

टिप्पण्यः

१. लिली—'पाम्प्लेमूस गार्डन' इत्याख्ये उद्याने शतदलकमलं बृहत्पत्रशोभितं 'जाइण्ट लिली (Giant Lily)' इत्यभिधीयते।

२. ताल—तत्रैवोद्याने विचित्र ताल (Palm)-वृक्षोऽस्ति यस्मिन् शतवर्षाभ्यन्तरे एकवारं पुष्पोद्गमो भवति। इदं च पुष्पं षण्मासावधि तिष्ठति। पुष्प-नाशानन्तरमयं तालवृक्षोऽपि नश्यति। उद्यान-व्यवस्थापकैरस्य वृक्षस्य परम्परा वर्धाप्यते येन प्रतिवर्षं दर्शका अस्य पुष्पमवलोकयितुमवसरं लभन्ताम्।

३. भास्करास्तोदयाभ्याम्—मौरीशसदेशे सूर्योदयं सूर्यास्तं च द्रष्टुं पर्यटकाः सौत्सुक्यं तिष्ठन्ति यथा भारते कन्याकुमारी-क्षेत्रे।

४. सप्तवर्णा धरित्रीं—'समारैल' स्थाने विविधवर्णाधरित्री आश्चर्यं जनयति। अत्रत्या मृत्तिका मया १८.३.१९८३ तारिकायाम् यदा भक्षिता तदा ज्ञातं यदियं मृत्तिका नास्ति अपितु किमपि रसायनमिवास्ति। वैज्ञानिकैरस्याः परीक्षणं कर्तव्यम्, तदैव तस्या गुणानां ज्ञानं सम्यग् भविष्यति। केचिद्वदन्ति यत्कदाचिदत्र ज्वालामुखीविस्फोटः सञ्जातस्तदैव भूगर्भादयं पदार्थः आविर्बभूव। यतो हि सूर्यकिरणानां वर्णाः सप्त भवन्ति-इति हेतोः अत्रत्यां मृत्तिकां सप्तवर्णां कथयन्ति लोकाः। वस्तुतः 'सप्ते' त्युपलक्षणम्। तत ऊर्ध्वमेव वर्णास्तत्र प्रतीयन्ते। यैर्विश्वस्याश्चर्याणि परिगणितान्यासन्, मन्ये तैरियं 'समारैल'-धरित्री नावलोकिता अन्यथास्याः परिगणनं तैरवश्यमेव विश्वाश्चर्येषु कृतं स्यात्।

५. इन्द्रचाप०—मौरीशसदेशे इन्द्रधनूंषि बहुधा आकाश रञ्जयन्ति। अतएवेदम् 'इन्द्रधनुषां प्रदेशः' (Land of Rainbows) इति कथ्यते।

६. अन्तूरियम्—एतन्नामकं पुष्पमत्यन्तं मनोहरं नयनहरं च भवति। अस्य पादपः साक्षात् सूर्यातपं न सहते; अतो जनाः आतपवारणाय अस्योपरि जालवस्त्रं तन्वते। मया श्रीपरमानन्द रामलखन-महाभागस्योद्याने एतेषां प्रसूनानां हासः सस्पृहमवलोकितः। रक्तवर्णमिदं पुष्पमत्यन्तं महार्घं भवति।

७. नानातर्व:०—मौरीशसे प्रत्यहं वसन्तः, शरद्, वर्षा, ग्रीष्मश्चानुभवितुं शक्यन्ते। 'पोर्ट-लुई' क्षेत्रे ग्रीष्मः, 'कात्रबोन' क्षेत्रे वसन्तो यत्र

वीथीनां नामानि पुष्प-फलाधारेण सन्ति। 'मोकाक्षेत्रे वृष्टिः। 'सोड्नक'-शिखरे 'निकोलियर्'-पर्वते च शरदनुभूयते। 'क्यू पिप्'-क्षेत्रे च वर्षा-शरद्-वसन्तानां सङ्गमः। वस्तुतः मोरिशसे प्रति मीलचतुष्टयम् ऋतु-परिवर्तनं भवति।

८. मोक्षदांगुष्ठलम्बैर्नगैः—मोक्षदः=मोका (Moka)-पर्वतः, अंगुष्ठगिरिः='अँगूठा'-पहाड़' इति हिन्दीभाषायां 'पूश' इति च फ्रेन्चभाषायां प्रसिद्धः पर्वतः, यस्य मौरीशस-वयोवृद्धसाहित्यकारेण श्रीवासुदेवविष्णु-दयाल महाभागेन 'कैलास' इति नाम कृतम्। लम्बनगः—लम्बा पर्वतः, (Long Mountain), 'मोंताई लाँग' इति फ्रेन्चभाषायां प्रसिद्धः।

९. अङ्गरक्षाद्रिः-Body Guard Mountain 'कोदी गार्द' इति फ्रेन्च-भाषायां प्रसिद्धः। मुण्डाद्रिः - 'मुँडिया पहाड़' इति हिन्दीभाषायां प्रसिद्धः 'पीटर बोथ' इत्यपरनाधेयः पर्वतः, यद्विषये लोककथा अपि प्रसिद्धा।

१०. यात्रिद्रुमैः - Traveller's Tree। कदलीतालयोः सङ्करवृक्षः। अस्य पत्रे माङ्गलिकोत्सवेषु भोजनमपि क्रियते मौरीशसदेशीयैः।

११. चिञ्चाद्रुमैः - Tamrine Trees।

१२. अनन्नास - Pine Apple। मौरीशसे बहु भवति।

१३. लोंगान - Longan इति नामधेयं लीची-सदृशं फलम्।

१४. चीनामृतम् - 'चीनी अमरूद' इति प्रसिद्धं फलम्। अम्लमधुरोऽस्य स्वादः।

१५. 'विर्जिनी'-'पाल'-गाथा - 'बेरनार्दे सें प्येर'-नाम्ना फ्रेन्चलेखकेन कृतः 'पाल एण्ड विर्जिनी'-नामक उपन्यासः।

१६. 'डोडो' तपस्वी - डोडो नामकः पक्षी योऽद्यत्वे कुत्रापि न प्राप्यते। स खलु मौरीशसे समागतैः हिंसकैर्मानवैः समूलं भक्षितः। अस्य चित्रं मौरीशसे विविधपत्रेषु मुद्राप्यते।

१७. चक्रवातः - Cyclone। चक्रवातागमनेऽत्रोत्प्रेक्षा।

१८. सांस्कृतं मेलनम् - संस्कृतसम्बन्धि सम्मेलनम्। १९८४ ई० वर्ष मार्च-मासस्य १४—१७ तमदिवसेषु समायोजितं यत्र भारतस्य प्रातिनिध्यं कर्तुं त्रिसदस्यीये प्रतिनिधिमण्डले काव्यकर्ताऽपि समुपस्थितः।

१९. गान्धिसंस्थानप्रेक्षागृहे - मोकास्थ-महात्मा गांधी संस्थानस्य प्रेक्षागृहे (Auditrioum)। यत्र संस्कृतसम्मेलनं सम्पन्नम्।

२०. दामोदरं-रवीन्द्रानिरुद्धावरणान् - अत्र मुद्रालङ्कारः। कवि विविधदेवान-प्यत्र साक्षात्कुरुते। अपरञ्च स दामोदरादिपदैः स्व आतिथेयबन्धून् सम्मेलनायोजनकांश्च—श्रीदामोदरतुलसी - वयोवृद्धसाहित्यकार श्री-वासुदेव विष्णुदयाल - श्री उत्तमविष्णुदयाल - श्री पी०हरिनाग - श्री-परमानन्द रामलखन - शिक्षामन्त्री श्री ए० परशुरामन् - श्री चितलाल रामचरण - श्री सुरेश रामवर्ण - गवर्नर-जनरल डा० सर शिवसागर रामगुलाम (चाचा)-श्री नागराजन्-आचार्य रवीन्द्रनागर - प्रधानमन्त्री डा० अनिरुद्ध जगन्नाथ - पत्रकार श्री राजेन्द्र अरुण - प्रभृतीनपि संकेतयति।

२१. मारुतेर्वैजयन्तीं - मौरीशसे हिन्दुधर्मावलम्बिनां गृहे 'हनुमान जी की ध्वजा' स्थाप्यते।

२२. गङ्गातटाके - 'गङ्गा तालाव' इति स्थाने यत्र प्रतिवर्षं शिवरात्र्युत्सवो राष्ट्रीयस्तरेण सोत्साहं सम्मान्यते।

२३. स्वस्तिका - इत्याख्यं 'क्यू पिप्'-स्थितं मन्दिरम्। तत्र राष्ट्रीयस्तरेण होलिका सम्मान्यते। लेखकोऽपि १८.३.१९८४ तारिकायां तस्यां सम्मिलितो बभूव।

२४. प्रेमरागेण - अत्र श्लेषः। तत्रातितमां लोकप्रियो भारतीयोच्चायुक्तः श्री प्रेमसिंहः स्वस्तिकास्थान् जनान् रागयुक्तजलेन अभिषिक्ता-नकरोत्। पक्षे - स्नेहरागेण।



देववाणी-परिषद्वार्ता

(१) अर्वाचीनसंस्कृतस्य षष्ठवर्षे प्रवेशः

१५-१-१९८४ ई० तारिकायाँ अर्वाचीनसंस्कृतम् षष्ठवर्ष प्रविष्टम्। 'आर-६, वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने विद्यावाचस्पति पं० अमीरचन्द शास्त्रिणा षष्ठवर्षस्य प्रथमोङ्कः समुन्मील्य विद्वद्भ्य समर्पितः।

(२) 'अभिनवोत्तर संस्कृत-काव्यशास्त्र में साधारणीकरण विमर्श' इति ग्रन्थस्य समुन्मीलनोत्सवः

१५-२-१९८४ तारिकायां दिल्लीविश्वविद्यालयस्य कलासंकाये सेमिनार-कक्षे परिषदस्तत्त्वावधाने एकस्मिन् समारोहे दिल्लीविश्वविद्यालयस्य हिन्दी-विभागाध्यक्षपदमलंकुर्वन्त्या श्रीमत्या डा० निर्मला जैन-महाभागया परिषत्प्रकाशितः डा० सुलेख चन्द्र शर्म लिखितः "अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण विमर्श" इति शीर्षको ग्रन्थः समुन्मील्य वयोवृद्धविदुषे डा०दशरथ ओझामहाभागाय समर्पितः। उत्सवस्य आध्यक्ष्यं दिल्लीविश्व-विद्यालयस्य प्राक्तनहिन्दीविभागाध्यक्षेण डा० विजयेन्द्र स्नातक-महाभागेन सम्पादितम्। कृतिमवलम्ब्य केन्द्रीय-हिन्दी-निदेशालये सम्पादकेन डा० नरेन्द्र व्यास महाभागेन पत्रपाठः कृतः। अस्मिन्ननुष्ठाने विश्वविद्यालयस्य नैके आचार्याः प्राध्यापकाः शोधच्छात्राश्च समुपातिष्ठन्। श्रीगणेशप्रसाद विद्या-लंकारेण सरस्वती-वंदना, डा० रमाकान्त शुक्लेन काव्यपाठश्चापि कृतः।

(३) 'संस्कृतसाहित्य में राष्ट्रियभावना'-ग्रन्थस्य त्रयाणां खण्डानां समुन्मीलनोत्सवः

२०-२-१९८४ तारिकायाम् 'आर-६, वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने सम्मयोजिते एकस्मिन् समारोहे रुहेलखण्ड विश्वविद्यालयस्य प्रसिद्धसंस्कृतविदुषा देववाणी-परिषदः प्रावतनाध्यक्षेण च डा०कृ.ष्ण.कान्तशुक्ल

महाभागेन परिषत्प्रकाशितं डा० हरिनारायण दीक्षित-लिखितं, 'संस्कृत साहित्य में राष्ट्रियभावना' इति ग्रन्थस्य खण्डत्रयं विमोचयता संस्कृतस्य राष्ट्रियभावना - भरितस्य साहित्यस्य अनुशीलनस्योपयोगित्वं सविशेषं प्रतिपादितम्। स्मरणीयं विद्यते यत् परिषदा १९८१ तमेशवीयेऽब्देऽस्य ग्रन्थस्य त्रिषु खण्डेषु प्रकाशनं कृतम्। १९८४ तमेशवीयेऽब्दे च एकस्मिन्नेव पुटबन्धे अस्य परिवर्धितं संस्करणं प्रकाशितम्। अस्यापि शीघ्रमेव केनचित् विदुषा समुन्मीलनं विधास्यते।

(४) 'श्रीबदरीशतरङ्गिणी'-'सुरश्मिकाश्मीरयो' समुन्मीलनोत्सवः

२१-२-१९८४ तारिकायां नवदिल्लीस्थे भारतीयविद्याभवने समायोजिते एकस्मिन् भव्यसमारोहे भारतसर्वकारस्य योजनायोग - सदस्येन प्रोफेसर एम०जी०के० मेनन महाभागेन परिषत्प्रकाशितौ श्रीसुन्दरराज आई०ए०एस०-प्रणीतौ 'श्रीबदरीशतरङ्गिणी' - 'सुरश्मिकाश्मीरं' चेत्याख्यौ काव्यग्रन्थौ समुन्मीलितौ। तेन संस्कृते आकर्षकप्रकाशनानामावश्यकता रेखांकिता। भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये संयुक्तपरामर्शदात्रा डा० रामकरण-शर्ममहाभागेन कृतिद्वयमवलम्ब्य विचाराः प्रकटिताः। परिषन्महासचिवेन डा० रमाकान्तशुक्लेन भारतसर्वकारस्य योजनामन्त्रालये संयुक्तसचिवपदं निर्वहन्नपि स्वान्तःसुखाय काव्यरचनायां प्रवृत्तः श्रीसुन्दरराजमहाभागः परिषत्पक्षतः समभिनन्दितः। डा० सम्पन्नारायणाचार्यमहाभागेन कवयितुः परिचयः प्रस्तुतः। श्रीसुन्दरराजमहाभागेन संस्कृतपद्यैः स्वाभिनन्दनस्योत्तरं व्याहरता देववाण्याः समुन्नतिरभिलषिता कवितां प्रति आदरश्च प्रकटितः।

(५) संस्कृताशुलिपि 'श्रीगणेश'-पुरस्कार-समर्पणोत्सवः

२१-२-८४ तारिकायां भारतीयविद्याभवने एव संस्कृताशुलिपिविकासार्थम् देववाणी - परिषत्प्रवर्तित एकोत्तरपञ्चसहस्ररूप्यकात्मकः संस्कृताशुलिपि-'श्रीगणेश' पुरस्कारः केन्द्रीयसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये उपपरामर्श-दात्रा डा०सी०आर० स्वामिनाथन्-महाभागेन श्रीगोपालदत्तबिष्टमहाभागाय सताम्रपत्रप्रावारकः समर्पितः। पुरस्कार - समर्पण-समारोहस्य प्रारम्भो डा० नित्यानन्दशर्मकृत - सरस्वती - वन्दनयाभूत्। परिषदध्यक्षैराचार्य - रमेशचन्द्र शुक्ल - महाभागैराशा प्रकटिता यत् संस्कृतज्ञानां संस्कृतानु-रागिणां च समवेतप्रयासैः संस्कृताशुलिपिविद्या - समधिकं विकासं

लप्स्यते । समारोहस्याध्यक्षपदमलंकुर्वता राष्ट्रियसंस्कृतसंस्थाननिदेशकेन डा० मण्डनमिश्रमहाभागेन संस्कृत-संस्थानानां संस्कृतमाध्यमेन पारस्परिक-पत्राचारार्थम्, संस्कृतपत्रपत्रिकाणां सम्पादन-सौकर्याय च संस्कृताशुलिपेरौपयिकत्वम् सविशेषं प्रतिपादितम्, देववाणी-परिषदः प्रयासाश्च एतदर्थम् सविशेषम् अभिनन्दिताः । परिषन्महासचिवेन डा० रमाकान्तशुक्लेन सूचितम् यत् षड्वर्षाणामनवरतप्रयासैः संस्कृताशुलिपेः प्रारम्भिकसूत्रपातः सुशकोऽजायत । यद्यग्रेऽस्यां दिशि संस्कृत-संस्थाभिः सर्वंकारेण च समुचितः प्रयत्नो विधीयेत तर्हि अस्याः सम्यक् विकासः संभाव्यते ।

(६) देववाणी-परिषन्महासचिवस्य मौरीशस-यात्रा

देववाणी-परिषन्महासचिवः डा० रमाकान्त शुक्लः मौरीशसदेशस्य शिक्षा-मन्त्रिणः श्रीअर्मूगम परशुरामन्-महाभागस्य संरक्षणे मोकास्थ महात्मागान्धी-संस्थाने समायोजिते चतुर्दिवसीये अन्ताराष्ट्रीय - संस्कृतसम्मेलने समुपस्थातुं भारतसर्वंकारशिक्षामन्त्रालयस्य राष्ट्रियसंस्कृत-संस्थानेन प्रेषितः। १४-१७ ३ - १९८४ तारिकासु समायोजितेऽस्मिन् समरोहे भारतस्य प्रातिनिध्यं कर्तुं त्रिसदस्यीयं प्रतिनिधिमण्डलमित्थमासीत: (१) डा० सी०आर० स्वामिनाथन् भारत-सर्वंकारस्य शिक्षा - संस्कृति - मन्त्रालये उपपरामर्शदाता (नेता), (२) श्रीमती कमला रत्नम् (३) डा० रमाकान्त शुक्लश्च (सदस्यौ)। एतेषां त्रयाणामपि विदुषां वक्तव्यानि सम्मेलने समायातैर्विद्वद्भिः समभिनन्दितानि डा० स्वामिनाथेन संस्कृतस्य महत्त्वं प्रकटीकुर्वता नैके ग्रन्थाः तत्रत्यसंस्थाभ्य उपायनीकृताः । श्रीमती कमला रत्नम् संस्कृतस्य प्रचारप्रसारार्थं नाटकानां भूमिकामवलम्ब्य स्वविचारान् प्रकटीचकार । डा० रमाकान्तशुक्लेन विश्वस्मिन् संस्कृतस्य स्थितिं संस्कृतस्य साम्प्रतिकविश्वस्य कृते प्रासंगिकतां चावलम्ब्य विचाराः प्रकटिता । तेन देववाणी-परित्पक्षतः नैके ग्रन्था आयोजकेभ्यः उपायनीकृताः । सम्मेलनमिदं 'मौरीशस सनातनधर्म टेम्पल्स फेडरेशन'स्य प्रधानपुरोहितानां संस्कृतशिक्षानिदेशकानां च आचार्य रवीन्द्र नागर महाभागानां सत्प्रेरणया मौरीशसदेशस्य अनेकाभिः साहित्यिक-सांस्कृतिक-धार्मिकसंस्थाभिरायोज्यत । तत्रत्यप्रधानमन्त्रिणा श्री अनिरुद्ध जगन्नाथ महाभागेनास्योद्घाटनं विहितम् तत्रत्य गवर्नरजनरलेन डा० सर शिवसागर रामगुलाममहाभागेन च समापनोत्सवे मुख्यातिथिरूपेण पुरस्कारा वितीर्णाः । संयोजनसमित्या अध्यक्षः श्रीचितलाल रामचरणः, सचिवः

श्रीसुरेश रामवर्णः, कोषाध्यक्षः श्रीदामोदर तुलसी, मोरीशस सनातन धर्म टेम्पलस फेडरेशनाध्यक्षः श्री परमानन्द रामलखनः, कार्यक्रमाधिकारी श्री पी० हरिनागः, अन्ये च आयोजकसमितिसदस्याः सम्मेलनानन्तरमपि मोरीशसे संस्कृत-प्रचार-प्रसारार्थं प्रयत्नशीलाः सन्ति। भारतीयोच्चायुक्तो महामहिम-श्री प्रेमसिंह महाभागः स्वसहयोगिभिः साकं संस्कृत - सम्मेलन पारितस्य प्रस्तावस्य कार्यान्वयानार्थं पूर्णसहयोग करोति।

अस्मिन् मोरीशस-प्रवासे डा० शुक्लेन नैकासु संस्थासु संस्कृत-संस्कृति-परकाणि स्वभाषणानि कृतानि। 'मोरीशस ब्राडकास्टिंग कार्पोरेशनेन' तस्य कविताः, साक्षात्काराश्च बहुशः प्रसारिताः। १७-३-१९८४ ई० तारिकायां सम्मेलन-समापनावसरे होलिकावसरे च तेन 'भाति मोरीशसम्' नाम कविताऽपि विरच्य श्राविता। २७-३-१९८४ तारिकायां डा० शुक्लो दिल्लीं प्रतिनिवृत्तः।

(७) देववाणी - परिषदः सहारनपुरे वाराणस्यां च शाखागठनम्

१९८४ ई० वर्षस्य फरवरीमासस्य सप्तमतारिकायां वसन्तपञ्चम्यां 'देववाणी-परिषद्, दिल्ली'-इत्यस्याः शाखा सहारनपुरे गठिता। अस्या अध्यक्षो-पाध्यक्षसचिवोपसचिवाः क्रमशः डा० कैलासचन्द्र जैनः (संस्कृत-विभागाध्यक्षः, जे०वी० जैन कालेजस्य) श्रीमती डा० रमा दुबलिश (संस्कृतविभागाध्यक्षा, मुन्नालाल-कन्यामहाविद्यालयस्य) डा० देवी चन्द्र शर्मा (संस्कृत-विभागे प्रवक्ता, जे०वी० जैन कालेजे) श्रीमती पद्मजा अमित (संस्कृत-विभागा-ध्यापिका, मुन्नालाल - कालेजे) सन्ति। परिषदः संयोजकश्च पण्डित विष्णुकान्त शुक्लः [हिन्दी-विभागाध्यक्षः (जे०वी० जैन कालेजस्य)] अस्ति।

(२) वाराणस्यां देववाणी-परिषदः शाखा स्थापिता। यस्या अध्यक्षो डा० विश्वनाथ भट्टाचार्यः सचिवश्च डा० कपिलदेव पाण्डेयः निर्वाचितो-इति शाखासंयोजकः डा० शिवदत्त शर्मचतुर्वेदः सूचयति।

संस्कृत-जगद्वार्ता

(१) राष्ट्रपतिना संस्कृतविद्वांसः पुरस्कृताः

२४.३.१९८४ तारिकायां भारतस्य महाहिमराष्ट्रपतिना श्री ज्ञानी जैल सिंह-महाभागेन ये संस्कृत-विद्वांसः सम्मानिता तेषु डा० मण्डन मिश्र-प० बदरीनाथ शुक्ल - पं० बट्कनाथशास्त्री खिस्ते प्रभृतयो देववाणी-परिषद-मसकृत् स्वशुभागमनेन विचारैश्च सनाथितवन्तः। एतेषां सम्मानेन देववाणी-परिषत्परिवारः समधिकां मुदमावहति।

दिल्ल्याः नैकाभिः संस्थाभिरेतेषां २५-३-१९८४ तारिकायां राष्ट्रीय-संग्रहालये अभिनन्दनं कृतम्।

(२) डा० रामकरणशर्माणः संस्कृतविश्वविद्यालयस्य कुलपतयः सवृत्ताः

भारतसर्वकारस्य शिक्षासंस्कृति-मन्त्रालये २८ ३.१९८४ ई० यावत् संयुक्तपरामर्शदातृत्वं सम्यक् प्रतिपाल्य डा० रामकरणशर्ममहाभागाः २९-३-१९८४ ई० तारिकातः वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिपदमलङ्कर्तुं २८-३-८४ तारिकायां वाराणसीं प्रति प्रस्थिताः। अस्मिन्नवसरे नैकैर्विद्वद्भिः संस्थाप्रतिनिधिभिश्च डा० शर्ममहाभागेभ्यो विसृष्टिकालिकमभिनन्दनं समर्पितम्। देववाणी-परिषन्महासचिवेन डा० रमाकान्त शुक्लेन परिषत्पक्षतस्तेभ्यः सौप्रस्थानिकं व्याहृतम्, परिषदि तेषां स्नेहश्चाविस्मरणीयत्वेन उपश्लोकितः।

(३) मयराष्ट्रविश्वविद्यालयसंस्कृत-प्राध्यापक - परिषदः दशमं वार्षिकाधिवेशनम्

मयराष्ट्रविश्वविद्यालय-संस्कृत-प्राध्यापकपरिषदो दशमं वार्षिकमधिवेशनं साहिबाबादस्थ लालालाजपतराय कालेजे २४—२५-३-१९८४ ई० तारिकयोः सम्पन्नम् यत्र कविसम्मेलनं, शोधसंगोष्ठी विचारसंगोष्ठी च आयोज्यन्त।

(४) श्रीलालबहादुरशास्त्रि-केन्द्रीय-संस्कृत - विद्यापीठस्य छात्रावासभवनोद्घाटनं दीक्षान्त-समारोहश्च

३-४-१९८४ ई० तारिकायां नवदिल्लीस्थ श्रीलालबहादुरशास्त्रि केन्द्रीय संस्कृत विद्यापीठस्य नवनिर्मितछात्रावासभवनस्योद्घाटनं दीक्षान्तसमारोहश्च संयोजितावभूताम्। अस्मिन्नवसरे विद्यापीठप्राचार्येण राष्ट्रियसंस्कृत संस्थानस्य निदेशकेन च डा० मण्डनमिश्रमहाभागेन संस्थाया: प्रगतिविवरणं प्रस्तुतम्। समारोहस्य मुख्यातिथित्वं भारतसर्वकारस्य शिक्षामन्त्री श्रीमती शीला कौल महाभागा, आध्यक्ष्यं च उपशिक्षामन्त्री श्री पी० के० थुंगनमहाभागो निरवहताम्। उपाधिपुष्टि: श्री किरीटजोशिमहाभागेन कृता।

(५) अखिलभारतीयसंस्कृतप्रतियोगिता: सम्पन्ना:

केन्द्रीयशासनशिक्षासंस्कृतिमन्त्रालयसाहाय्येन जावालिपुरस्थ - रानी दुर्गावती - विश्वविद्यालयस्य संस्कृत-पालि-प्राकृत - विभागाध्यक्षाणां डा० कृष्णकान्त - चतुर्वेद महाभागानां निर्देशने मध्यप्रदेशे प्रथमबारं १९८४ ई०, फरवरीमासस्य अष्टादशोनविंशतितारिकयो: अखिल-भारतीय-संस्कृत प्रतियोगिता: सम्पन्ना:।

प्रतियोगिता विश्वविद्यालयकुलपतीनाम् श्रीकान्त चोधुरी महाभागानामाध्यक्ष्ये जावालिपुरसंभागस्यायुक्तै: श्रीरामनारायण वैद्यमहाभागैरुद्घाटिता।

जाबालिपुरजिलाधीशानां श्री एस० मिश्रमहाभागानाक्ष्माध्यक्ष्ये आयोजिते समापनोत्सवे विजेतृभ्य: पारितोषकानि कुलपतय: श्रीकान्त चोधुरीमहाभागा: वितरितवन्त:।

अस्मिन्नवसरे भारतशासनस्य सहायकशिक्षापरामर्शदाता डा० रामकृष्णशर्ममहाभाग: केन्द्रीयशासनेन संस्कृतस्य प्रचारप्रसारार्थं प्रचालितानां योजनानानां विस्तरेण परिचयमदात्। तेन कथितं यत् केन्द्रीय शासनं संस्कृतस्य परिवर्धनाय दृढसंकल्पमस्ति। अस्यायोजनस्य सफलतायै तेन रानी दुर्गावती विश्वविद्यालय: प्रशसित:। प्रतियोगितायां कर्णाटकेन प्रथमं तमिलनाडुना द्वितीयं इन्द्रप्रस्थेन (दिल्लीप्रदेशेन) च तृतीयं स्थानं लब्धम्। मध्यप्रदेशोऽपि द्वौ पुरस्कारौ अलभन— इति जबलपुरत: श्रीकमलनयन शुक्ल: सूचयति।

(६) संस्कृतनाट्यमञ्चेन 'चारुदत्त' प्रस्तुतम्

दिल्लीस्थ 'संस्कृत-नाट्य-मञ्चेन' १९८४ तमेशवीयेऽब्दे भासप्रणीतं 'चारुदत्तम्' नाम नाटकं २४-२-८४, २५-२-८४ तथा २०-३-८४ तारिकासु नवदिल्ल्यां सफलतया प्रयुक्तम् यत्र कु० स्मृति मेहता, डा० नित्यानन्द शर्मा, श्री विश्वनाथ शर्मा, श्री प्रमोद दुआ, श्री कार्तिक अवस्थी, कृष्णचन्द्र त्रिपाठी श्रीमती सुशीला अम्बिके इत्यादयो विविधा भूमिका अनुष्ठिवन्तः। नाट्यमञ्चस्य महासचिवा श्रीमती कमलारत्नम् महाभागा नाट्यप्रदर्शनार्थं साधुवादार्हा।

(७) मैनपुरीनगरस्थ-सुरभारती-सेवासंस्थानस्य सारस्वत-समारोहः

२१—२२-४-१९८४ ई० तारिकयोः उत्तरप्रदेशान्तर्गतमैनपुरीनगरे श्री एकरसानन्द संस्कृतमहाविद्यालये सुरभारती-सेवा-संस्थानस्य सारस्वत-समारोहो देववाणी - परिषन्महासचिवस्य डा० रमाकान्त-शुक्लस्याध्यक्षे सम्पत्स्यते। अस्मिन्नवसरे परिसंवाद-गोष्ठी, संस्कृतकविसम्मेलनं विद्वदभिनन्दनं च समायोजयिष्यन्ते। समारोहेऽस्मिन् डा० राजेश्वरप्रसाद-चतुर्वेद-डा० वासुदेवकृष्ण चतुर्वेद महाभागयोः 'पं० वेणीमाधव द्विवेदी - स्मारक व्याख्यानमालायां' व्याख्याने अपि भविष्यतः-इति विज्ञापयति संस्थानस्य महासचिवो डा० इच्छाराम द्विवेदी।

(८) डा० स्वामिनाथस्य ग्रन्थाय कालिदास-पुरस्कारः

मध्यप्रदेश-साहित्य-कला-परिषदा डा० सी० आर० स्वामिनाथलिखितो 'गीता-भाष्य-विवेचनम्' इत्याख्यो ग्रन्थः 'कालिदासपुरस्कारेण' सम्मानितः। वर्धापनम्।

(रमा शुक्ला)



प्रकाशन-चर्चा

(१) रामकविविरचितं सङ्गीतराघवम्

प्रधानसम्पादकः डा० जि० मरुलसिद्धय्यः। सम्पादकः एच० शङ्कर-गणपतिफाटक्। प्रकाशकः प्राच्यविद्यासंशोधनालयः, मैसूरु-विश्वविद्यानिलयः, मैसूरु। संस्करणम् १९८० ई०। मूल्यम् ९-५० रूप्यकाणि। पृष्ठसंख्या १८+६६=८४।

क्रैस्ताष्टादशशतकस्य मध्यमवर्तिनि काले पेरिपुरे लब्धजनुषा रामकविना गीतगोविन्दमनुसृत्य रचितं 'सङ्गीतराघवं' श्रीरामस्य ललितं शृङ्गारमयं स्वरूपं ललितेषु गीतेषूपन्यस्यति। श्रीफाटकमहाभागेन महता परिश्रमेणास्य काव्यस्य मातृकायाः पाठः संशोध्य सम्पादितः। प्रस्तावनायां कवेः काव्यस्य च विषये सम्पादकेन विस्तृता सूचना समालोचना च दत्ता। ग्रन्थस्य सम्यक्-सम्पादनार्थं श्रीफाटकमहाभागः नितरामभिनन्दनीयोऽस्ति।

(२) श्रीगुरुनानकदेवचरितम्

रचयिता-श्री विष्णुदत्त शर्मा। प्रकाशकः - विश्वनाथ प्रकाशन, ११० निकट थाना, सदर, मेरठ। मूल्यम् - पञ्चाशद्रूप्यकाणि। संस्करणम् - २०३९ वि०। पृष्ठसंख्या - २९४+१२=३०६।


सज्जनानां चरितान्यधिकृत्य निर्मितेषु संस्कृतमहाकाव्येष्विदं महाकाव्यं कामपि विशिष्टां द्युतिं धत्ते। सप्तदशसर्गात्मकेऽस्मिन् महाकाव्ये कविना श्री गुरुनानक-देवस्य चरितं वर्णितम्। अस्य काव्यस्य वैशिष्ट्यमुद्घाटयता महाकविश्रीप्रभुदत्तस्वामिमहाभागेनोक्तम्-"अस्मिन् हि काव्ये रसानां परिपक्वता, भावानां भव्यता, भाषाया भावानुरूपता स्थाने च शब्दार्था-लंकाराणां सन्निवेशचारुता, गुणानां वृत्त्यनुसारिता, वृत्तीनाञ्च गुणानुवृत्ति-तेति समग्रमपि सत्काव्यानुगुणं सामग्र्यं सहृदयहृदयाह्लादनक्षमां महतीं क्षमतामावत्त इति यत्सत्यं प्राशस्त्यं भूयो भूयोऽर्हतितरां नितराम्। सर्वविधेन

काव्यवैभवेन समृद्धेऽस्मिन् सत्काव्ये सर्वामप्यनन्यसाधारणीमस्य कमनीयतां पृष्ठतो निधाय केवलान् गुरोर्नानकदेवस्य मुखादुपदिष्टान् उपदेशानेव यदि पश्यन्ति सन्तस्तदनेनैव हेतुना केवलेन कविरयं महामहत्याः प्रशंसायाः पात्रं भवति । सुरापानप्रवृत्तेर्निरोधाय, वेश्यावृत्तिनिरासाय, डाकुसमस्यासमाधानाय, अस्पृश्यतानिवारणाय, हिन्दुमुस्लिमैक्यसम्पादनाय, साधुसंन्यासिनां भिक्षावृत्ते र्निवृत्तये, अन्यासामप्येवंविधानां सामयिकीनां राष्ट्रियसमस्यानां समाधानाय गुरोर्नानकदेवस्य मुखेन कविना प्रोक्ता उपदेशामृतसूक्तयोऽद्य यादृशीं प्रासङ्गिकतां वहन्ति सा खलु नान्यत्र कुत्रापि काव्येषूपलभ्यते । एताः सूक्तयो विषोपमाभिराभिः समस्याभिर्म्रियमाणं राष्ट्रं जीवयितुं यत् सत्यम् अमृतायिष्यन्ते सुतराम् ।' (प्रस्तावना/ङ, च) ।

काव्यमिदं राष्ट्रभक्तिभावं जागरयितुमपूर्णां क्षमतां निदधाति । प्रथमसर्गे 'जयत्यसौ भारतवर्षदेशः' इत्यन्तपदयुताः २६ श्लोकाः भारतस्य भौगोलिकं सांस्कृतिकं च वैभवं प्रति पाठकान् झटित्यावर्जयन्ति ।

कविरस्य काव्यस्य रचनायै भूयो भूयो वर्धाप्यते ।

(सम्पादकः)



समृद्ध राष्ट्र का आधार : सुखी परिवार

क्या आप जानते हैं?

- परिवार नियोजन का अर्थ मात्र बच्चों की संख्या सीमित करना ही नहीं।
- इसका उद्देश्य है सुखी और निश्चिन्त वैवाहिक जीवन।
- अगर आप निस्संतान हैं– तो अपने नजदीकी परिवार कल्याण केन्द्र से सम्पर्क करें।
- संतान का जन्म वांछित समय पर हो, इसके लिए बच्चों के जन्म में अन्तर रखने के लिए अस्थायी गर्भनिरोधक तरीके अपनाएं।
- दो संतान होने से जब आपका परिवार भरा-पूरा हो जाए तब आप स्थायी गर्भनिरोधक तरीके अपनाएं।

अस्थायी गर्भनिरोधक तरीके

निरोध

आसान और आदर्श गर्भनिरोधक तरीका, खासतौर से गर्भधारण के अनिच्छुक नव-विवाहितों और उनके लिए जिनका एक बच्चा है और दूसरा अभी नहीं चाहते हैं। यह सस्ता है और आसानी से मिल जाता है तथा इसके इस्तेमाल से स्वास्थ्य पर कोई बुरा प्रभाव भी नहीं पड़ता है।

डायाफ्राम

अगर इसका चुनाव ठीक प्रकार से किया जाए और इसे उचित स्थान पर रखा जाए तो यह एक बहुत ही असरदार तरीका है। डाक्टर द्वारा इसका ठीक आकार निर्धारित किया जाता है तथा इसके बाद महिलाएं इसे स्वयं रख सकती हैं।

कापर 'टी'

अंग्रेजी के टी (T) अक्षर के आकार का यह उपकरण (आई यू डी) प्रशिक्षित चिकित्सक अथवा चिकित्सा सहायक कर्मियों द्वारा गर्भाशय में रखा जाता है। यह तीन या चार साल तक अपने स्थान पर रहता है। इस्तेमाल करने वाली महिलाओं को इसकी उपस्थिति का भान तक नहीं होता और वे सुखी जीवन बिता सकती हैं। इसका प्रयोग करने वाली महिलाओं को आर्थिक रूप से प्रोत्साहन भी दिया जाता है।

खाने की गोलियां

यह 28 गोलियों का एक पैकेट होता है तथा माहवा[र] में प्रतिदिन एक गोली लेनी होती है। जब तक अगला ब[च्चा न] चाहें गोलियां खाना जारी रखें। इन गोलियों का यौन सु[ख पर] कोई असर नहीं पड़ता और न ही इसके कोई अन्य कुप्रभ[ाव] समय-समय पर स्वास्थ्य निरीक्षण आवश्यक है।

स्थायी गर्भनिरोधक तरीके

नसबंदी

यह अनुभवी चिकित्सकों द्वारा पुरुषों पर किया जा[ने वाला] आसान किन्तु प्रभावकारी आपरेशन है। यह स्थायी त[रीका है] और इससे यौन क्रियाओं पर कोई असर नहीं पड़ता है। [नसबंदी] कराने वाले पुरुषों को आर्थिक प्रोत्साहन भी दिया जात[ा है।]

नलबंदी (महिला नसबन्दी)

यह अनुभवी चिकित्सकों द्वारा महिलाओं पर कि[या जाने] वाला आपरेशन है। इसमें कुछ समय के लिए म[हिला को] अस्पताल में रहना पड़ता है। यह भी एक स्थायी तरीक[ा है।] इससे साधारण गतिविधियों पर कोई असर नहीं पड़[ता।] अपनाने वाली महिलाओं को आर्थिक प्रोत्साहन भी दि[या जाता] है।

लैपरोस्कोपी

यह महिला नलबन्दी का नवीनतम तरीका है। शहरों और कस्बों में इसकी सुविधा विद्यमान है[।] अस्पताल में रहने की जरूरत नहीं पड़ती और न ही इ[सके] प्रतिकूल प्रभाव पड़ते हैं।

जो तरीका आपको ठीक लगे उसे ही अपनाइए।


बोने को जमीन,
रहने को घर,
बीस सूत्र की
बनी डगर।
davp-83/156

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

❀

१. प्रकाशन का स्थान	नयी दिल्ली
२. प्रकाशन की आवधिकता	त्रैमासिक
३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
४. सम्पादक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९
५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं।	देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नई दिल्ली-११००५९

मैं डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१. कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्) रु० ५.००
२. श्रीबदरीशसुप्रभातम् (,, ,,) रु० १०.००
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (,,) रु० ४०.००
४. श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः) रु० ३०.००
५. सुगमरामायणम् (,, ,,) रु० ३५.००
६. श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायण दीक्षितः) रु० २०.००
७. भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः) रु० ३५.००
८. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.००
९. आभाणकमञ्जरी (,, ,,) रु० १५.००
१०. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.००
११. रघुवंश : एक विश्लेषण (,, ,,) रु० २०.००
१२. अभिज्ञानशाकुन्तल : एक विश्लेषण (,,) रु० २०.००
१३. कालिदास की कला और संस्कृति (भाग २) (,,) रु० ६०.००
१४. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.००
१५. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,) रु० ३० ००
१६. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.००
१७. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः) रु० २०.००
१८. भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
१९. अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण-विमर्श (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
२०. साधारणीकरण : प्राच्य और प्रतीच्य चिन्तन : (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
२१. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.००
२२. संस्कृत साहित्य में राष्ट्रिय भावना (भाग १) (डा० हरिनारायण दीक्षित) रु० ५०.००
२३. संस्कृत साहित्य में राष्ट्रिय भावना (भाग २) रु० ७०.००
२४. ,, ,, ,, (भाग ३) रु० ५०.००
२५ (सम्पूर्णग्रन्थः एकस्मिन् पुटबन्धे) रु० १५०.००
२६. साहित्यकौतुकम् (काव्यम्) (पं० टी०वी० परमेश्वर अय्यरः) रु० ४०.००
२७. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २० ००
२८. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.००
२९. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.००
३०. श्रीबदरीशतरङ्गिणी (काव्यम्) श्रीसुन्दरराजः रु० २०.००
३१. सुरभिकाश्मीरम् (,,) (,,) रु० ५.००
३२. पुरश्चरणकमलम् (नाटकम्) (डा०रमाकान्त शुक्लः) रु० ६.००

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

षष्ठवर्षे तृतीयोऽङ्कः

१५ जुलाई १९८४

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः



प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

विषय सूची

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद् दिल्ली'-कृते डा० रमाकान्त शुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली -११००५९' इति मुद्रणालये मुद्रापयित्वा '६, वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (६/३)। प्रधान सम्पादकः—डा० रमाकान्त शुक्ल:। प्रकाशनतिथिः १५ ७-१९८४।

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य षष्ठवर्ष तृतीयोऽङ्कः पाठकानां करकमलेषु समर्प्यते।

अस्मिन्नङ्के पञ्चदश संस्कृतकविता, नाटकद्वयं, नवप्रकाशनचर्चा, देववाणी-परिषद्वार्ता, संस्कृत-वार्ता च दीयन्ते।

श्रीगणपतिशुक्लस्य 'समयानुसारं चलतु' इतीयं रचना बोधप्रदा कवितास्ति। अस्यामुदीयमानकविना समयदर्शनस्य महत्त्वं प्रतिपादितम्। कवेः शैली हिन्दी मुक्तच्छन्दःप्रभाविता।

सागरविश्वविद्यालयस्य संस्कृत-विभागे प्रवक्तृपदमलंकुर्वता डा॰ विन्ध्येश्वरीप्रसादमिश्र 'विनय'-महाभागेन रचितासु चतुर्दशरचनासु गीतपद्धतिरवलोकयितुं शक्यते। कविना एतेषु गीतेषु क्वचिद्भगवत्या भारत्याः स्तुतिः कृता, क्वचित्प्रभातवेलायां नायिकायै प्रत्यग्रताया सन्देशो दत्तः, क्वचित्सूर्यदेवः स्तुतः, क्वचिज्जलद उपालब्धः, क्वचित्प्रावृड्गीतव्याजेन चेतसः कोमलभावना व्यक्तीकृता, क्वचित् लोकध्वनिमाश्रित्य नन्दलाल आहूतः, क्वचित्प्रीतिविधानस्य परुषत्वं संकेतितम्, क्वचिन्नववर्षागमे स्वशुभकामनाः समर्पिताः, क्वचिदात्मा उद्बोधितः, क्वचिद् गजलपद्धत्या प्रश्नाः समुपस्थापिताः, क्वचिद् विधुवदना प्रेयसी अनुनीता, क्वचिच्चाधुनिको मानवो विध्वंसलीलां त्यक्तुं प्रतिबोधितः, क्वचिज्जीवनस्य परिभाषा विहिता, क्वचिच्च साम्प्रतिकानां यूनां गतिमवलम्ब्य सव्यङ्ग्यं स्वविचाराः प्रस्तुताः।

एतत्पंक्तिलेखकप्रणीतं 'पुरश्चरणकमलं' नाम लघुनाटकं प्रसिद्धहिन्दीकविश्रीसूर्यकान्तत्रिपाठी 'निराला' कृत 'राम की शक्तिपूजा'-कवितायाः संस्कृतनाट्यरूपान्तरं विद्यते। अस्य प्रयोगः देववाणी-परिषदः संस्कृतनाट्यसमारोहे, ३०-१२-१९८३ ई० तारिकायां श्रीमत्याः कमलिनीदत्त-महाभागायाः निर्देशने नवदिल्लीस्थे 'श्रीराम सेण्टर फॉर आर्ट एण्ड कल्चर' इत्येतदाख्ये प्रक्षागारे अभूत्।

'पण्डितराजीयम्' रेडियोनाटकं विद्यते । आकाशवाण्या दिल्लीकेन्द्रात् नाट्यवेला'-कार्यक्रमे १२-१२-६९—७-८-७०ई० तारिकयोः प्रसारणमभूत् । ततश्च मञ्चनाटकरूपेणास्य प्रस्तुतिः २५-१-१९८३ ई० तारिकायां २६-१२-१९८३ तारिकायां च उपरिनिर्दिष्ट एव स्थाने श्रीमत्या कमलिनी दत्त-महाभागाया निर्देशने एव सञ्जाता यत्रास्य संक्षिप्त एव अंशोऽभिनीत आसीत् । अस्मिन्नभिनये श्रीबलदेवानन्द सागर-श्रीविश्वनाथशर्म-श्रीप्रमोद दुआ-कु० भवानी अय्यर-कु० हेमलता-कु० शशिबाला प्रभृतिकलाकारैर्विविधा भूमिका समनुष्ठिताः । निर्देशिकया अस्य प्रयोगे नव्यपुरातनपद्धत्योः सम्मेलनं कृतमासीत् । ये सज्जनाः बहुवारमेतयोर्नाटकयोः पाठ्यं लब्धुं समुत्सुका आसन् ते इदानीं तदस्मिन्नङ्के लप्स्यन्ते ।

नवप्रकाशन-चर्चायां समीक्षार्थं लब्धानां ग्रन्थानां विषये संक्षिप्तः संकेतो विधीयते । वस्तुतोऽनया संक्षिप्तया चर्चया इमान् ग्रन्थान् प्रति सम्यक् न्यायो नैव कर्तुं शक्यते । समीक्षकाः एतद्विषये विस्तृतलेखान् विलिख्य अस्मत्सकाशं प्रेषयितुं सादरं प्रार्थ्यन्ते येनैतान् ग्रन्थान् प्रति समुचितो न्यायः क्रियेत ।

देववाणी-परिषद्वार्तायां, संस्कृत-वार्तायाञ्च परिषत्कार्यकलापानां संस्कृत-जगतश्च केचन समाचाराः दीयन्ते ।

पाठका यत्र क्वचिज्जाता मुद्रणत्रुटीः संशोधयितुं सादरं प्रार्थ्यन्ते ।

विदुषां वशंवदः

(डा० रमाकान्त शुक्लः)

प्रधानसम्पादकः

१५.७.१९८४

६, वाणी-विहारः,

नयी दिल्ली-११००५९

समयानुसारं चलतु

[गणपति शुक्लः, बड़वाहा (म०प्र०)]

किमर्थम् बध्नाति जनः
दीप्तिमयीम् सुवर्णाम्
भारतीयाम् विदेशीयाम् वा
स्वचलिताम् बहुमूल्यवतीम्
मणिबन्धघटीम्,
समयावलोकनाय
समयानुसारं चलनाय
अथवा प्रभाव प्रदर्शनाय ?
लौहविनिर्मिता घटी
जडा अस्ति
तथापि प्रचलति समयं दृष्ट्वा
दर्शकेभ्यः समयं च प्रदर्शयति ।
जीवितोऽस्ति जनः
शिक्षितश्च,
परं क्व उद्यतोऽस्ति समयदर्शने
स्वीये मग्नः "यद्भाव्यं तद् भवेत्"
अलसोऽस्ति भविष्यचिन्तने ।।

गृहे ग्रामे देशे विदेशे च किं भवति ?
कस्य समीपेऽस्ति समयः चिन्तनाय !
घटीम् बध्नाति हस्ते परम्
न बध्नाति समयं स्वचलनाय
सामायिकी श्रावश्यकताऽस्ति महती
हस्ते घटीम् बध्नातु
समयानुसारञ्च चलतु ॥

●

डा० विन्ध्येश्वरी प्रसाद मिश्र : 'विनयः'

१. निखिलवाङ्मय देवते ! जय

(गीतम्)

निखिलवाङ्मयदेवते ! जय जननि वीणावादिनि ॥ध्रु०॥
नवलधवलोत्पलदले,
चन्द्रिकाचयनिर्मले,
नवमृणालसुकोमले जय विनतवदनाह्लादिनि ॥००॥
तव करे शततन्तुवीणा,
रङ्गिणि ! त्वमपि प्रवीणा,
मुखरितां कुरु वरविपञ्चीं स्वरसहस्रनिनादिनि ॥००॥
त्वमसि दिव्या देववाणी,
जननि ! कल्याणी पुराणी,
विततघनमोहान्धकारे त्वमसि दीप्ता ह्लादिनि ॥००॥
आदिकविमुखरसितकरुणे,
व्यासकाव्यवरेण्यवरुणे,
'भास' 'दीपशिखा' दिसेवितकविकलासम्पादिनि ॥००॥
भारति ! त्वां संस्मरामः,
वयं सन्ततमानमामः,
जय सुधामाधुर्यमधुमयि ! मुदा मानसमादिनि ॥००॥
निखिलवाङ्मयदेवते ! जय जननि वीणावादिनि ॥००॥

२. प्रभात-गीतिः

नयनयुगलमुन्मीलय, शीलय कचजाले
धम्मिल्लं मञ्जु, गता रजनी मधुबाले ।।
अनुगुञ्जच्चञ्चरीकपटलीसञ्चारं,
ह्यामन्त्रयतीव सरसिजश्रीः शतवारं;
सुतनु ! सर्वतोदिक् संसरति किरणमाली,
मन्दं मन्दं नु वाति पवन इन्द्रजाली;
मुग्धे ! तल्पं विहाय पश्य व्योमभाले ।।
नयनयुगलमुन्मीलय......
उल्वणविरहाग्निदग्धमुग्धा सु वराकी,
त्वभिसरति प्रियं प्रति सम्प्रति हि चक्रवाकी;
निशिजागरणेन पाण्डुवदनो नु मृगाङ्कः,
विशतितरां सुतरां शयनाय निरातङ्कः,
नयनयुगलमुन्मीलय......
रङ्गिणि ! सरिदियं नृत्यतीव वहति तरला,
सिञ्चन्ती पुलिनपटं बालिकेव सरला,
दूर्वादलहरितमुपवनं मरालमाला,
न्यञ्चति चोत्पतति वियति गच्छति सुविशाला,
'कुहु-कुहु' कूजति विदग्धकोकिलो रसाले !
नयनयुगलमुन्मीलय......
सखि ! विमुग्धवदने !! परिवर्तय परिधानं
ह्यवतरति दिनश्रीः, कुरु वन्दनाविधानं
पञ्जरगतशुकः किमपि पठति बावदूकोऽ-
प्यन्वेषयतीव हरिणपोतकोऽपि मूकः
अभिनन्दय सर्वान् अयि ! प्रणयिनि ! रसशाले ।।
नयनयुगलमुन्मीलय......

३. गायत्रीगानम्

प्रत्यहमुदेति लोकान् पश्यन् यः खलु जगत्पिता ।
स्वेनैव वरेण्यतेजसा तद्रक्षतु नः सविता ॥
यन्मण्डलोद्भासिधामैतद् धारयते संसारं,
यस्य गभस्तस्य ऊर्जितवक्त्राः हरन्ति तमोविकारम् ।
यस्यारुणः श्रयति सारथ्ये गन्धर्वाः किल गाने,
वालखिल्यऋषयस्तु नियुक्ताः यस्य स्तवनविधाने,
सप्ताश्वैः ध्रियमाणः सततं यस्य रथो जविता ॥
स्वेनैव वरेण्य......
अग्नीषोमात्मक एतस्मिन् प्रचलति संसृतियज्ञे,
यः केन्द्रस्थो रयिप्राणानामाहुतीस्तु संजज्ञे,
यो जगतां तस्थुषां ज्योतिषां पतिर्गतिः सर्वेषां
दृढीकरोति वीर्यबलमोजो यः स्वरोचिषा तेषाम्;
यस्त्रिगुणात्मधिया एकोऽनेकस्य हि प्रसविता ॥
स्वेनैव वरेण्य......
त्रिवृदोंकारमूलमन्त्राढ्यं यमीडिरे वै वेदाः
भूर्भुवः स्व इति व्याहृतयोऽपि संजगुः यमभेदाः;
योऽनुप्रविष्ट एकः सन् बाभात्युरुधाऽपि परस्मिन्,
त्रेधा यो विनिदधे पदं त्रिभुवनं व्यनैषीत् स्वस्मिन्,
आदित्यानां परमस्तादृग् भूतो नो भविता ।
स्वेनैव वरेण्य......
यं न वेद सम्यक् प्रहिताऽपि चतुर्धा सैषा वाणी,
तमसोऽस्मान् ज्योतिर्गमयेन्ननु यस्य विभा कल्याणी,
वयममृतत्वमिहाशासानः स्तुमः सुपर्णं हंसं
द्विपदाश्चतुष्पदास्तिर्यञ्चः प्राणिनो लभन्तां शम्,
'धियो नः प्रचोदयात्' स देवः फलत्वियं कविता ।
स्वेनैव वरेण्य......

४. जलदोपालम्भगीतम्

गर्जसि किं मुधा जलद ! वर्ष सुखदनीरम् ।।
कुरुषे किं प्रणयिचित्तचातकमवधीरम् ।।
गर्जसि किम्......

उन्मनायते नु पश्य ललितशिखिसमूहः,
मञ्जुलास्यमध्ये किल जातप्रत्यूहः,
त्यक्त्वेदं कटुरावं निनद रे ! गभीरम् ।।
कुरुषे किम्......

विरहे तव विरसेयं ह्यवनिकान्तिहीना,
संपश्यति सोच्छ्वासा त्वामिह रे ! दीना;
यथा तथा वहति मिहिरतापितं शरीरम् ।।
कुरुषे किम्......

कृषकजनसमूहोऽप्ययमनुरागमुपेत-
स्तेऽभिनन्दनं तनोति भावनासमेतः,
सेवयति मृदुदकदयितगन्धवत्समीरम् ।।
कुरुषे किम्......

सम्प्रति नहि दृश्यते सा दयिता रसराता,
चपला न ह्यंकगता कुत्र प्रतियाता ?
दग्धहृदय ! पश्यसि नहि शुष्कतटिनितीरम् ।।
कुरुषे किम्......

५. प्रावृड्गीतम्

पश्य केलिनिकुञ्जमञ्जुलवञ्जुलवञ्जुलैः परिवारितम् ।
सुतनु ! वृन्दावनवनान्तरमलिकुलैः सञ्चारितम् ।।
तरणिजातटनवतमालं,
कलितकोरकनीपजालं,
नवघनागमनिर्भरं शिखिवृन्दकेकाकारितम् ।।०।।
वाति मन्थरमदिरपवनः
हरति कस्य जनस्य न मनः
सखि ! अनेन मदीयहृदि सौहित्यमतिविस्तारितम् ।।०।।
आलि ! रटति सु चातकोऽयं
त्वस्य पाप्मा हन्त ! कोऽयम् ?
प्रियविरहमनुभवति हा ! विधिना कृतं ह्यविचारितम् ।।०।।
अस्मदीयप्रियमुकुन्दः
ललितनववदनारविन्द,ः
सघननीलबलाहकैस्तद्वपुरहो संस्मारितम् ।।पश्य०।।



६. एहि नन्दलाल !

('बुन्देली'-लोकध्वनिमाश्रित्य गीतिः)

वृदावने यमुनाकूलकुञ्जे भ्रमर-
मुखरपुञ्जे एहि नन्दलाल ।
कुसुमितसुकदम्बे पूरितघनबिम्बे
दिनमणिरिव दर्शनं प्रदेहि नन्दलाल ।
कूजितखगवृन्दे वितरितमकरन्दे
परभृत्स्वच्छन्दे पुलिने सुविशाले
शोभितशशिबिम्बस्फुरितयामुनाम्भ-
स्त्वमेहि नवलनर्तनानुकारिचन्द्रभाल ।।
वादय वनमालि क्षणमिह मधुशालि
स्वीयवेणुयन्त्रं धर्षितेन्द्रजाल ।।
कुरु कुरु नव लास्यं मधुसुस्मितहास्यं
देहि चरणदास्यं ललित धेनुपाल ।।
वृन्दावने यमुनाकूलकूलकुञ्जे
भ्रमरमुखरपुञ्जे एहि नन्दलाल ।।



७. परुषं प्रीतिविधानम्

(गीतम्)

प्रेयसि ! परुषं प्रीतिविधानम् !

पश्य, चकोरीं या निशि चन्द्रे कुरुते दृक्संधानम् ॥००॥

क्व गगनपथचारी राकेशः

तपति कियद्दूरे नु दिनेशः

पश्य कुमुदिनीं पश्य कमलिनीं, सूचयतो महिमानम् ॥००॥

रटति चातकी मेघं दृष्ट्वा,

तां त्रासयति स उपलं सृष्ट्वा;

सा प्रीतिं परिचिनोति बालाऽविगणय्य स्वात्मानम् ॥००॥

दीपो ज्वलति तु पतति पतंगः,

स्वरेणैव हन्यते कुरंगः,

ज्योतिः पश्यति केवलमेकस्त्वपरः केवलगानम् ॥००॥

सखि ! वितथो नितरामनुताप-

स्त्यजति न हृदयमयं खलु शापः,

मुधा विलपनं मुधा प्रलपनं मौनमत्र हि निदानम् ॥००॥

प्रेयसि ! परुषं प्रीतिविधानम् ॥

८. नववर्ष-गीतम्

आगतमिह नववर्षं
जनयतु हृदि हृदि हर्षं,
विरसं, सरसं कुर्यादिमं कार्यभारम् ॥
जने जने मनसि मनसि,
शुष्के तु स्नेहसरसि,
श्रान्ते क्लान्ते लोके वर्षतु सुखसारम् ॥
आगतमिह नवर्षम् ॥
अपसर्पतु क्रूरा दुर्दैवकृता क्रीडा,
गच्छतु दूरे ह्येषा पापमयी पीडा,
द्वेषं दुरितौघमिमं नयतु शान्तिद्वारम् ॥
आगतमिह नववर्षम् ॥
दैनन्दिनजीवनमिह भवति कष्टहीनं,
दैन्यं नहि यातु कोऽपि पश्यतु नहि दीनम्,
राजनये नैतिकता लभतामधिकारम् ॥
आगतमिह नववर्षम् ॥
मुदं समुपयान्तु सदा कर्षकगणमान्याः,
वर्धन्तां श्रमिकजनाः सज्जना वदान्याः
मोदन्तां मिथः प्रकुर्वन्तो ह्युपकारम् ॥
आगतमिह नववर्षम् ॥
विद्वज्जनपूजनं भवेदिह संसारे,
भारतं सदाऽग्रणीर्भवेद् गुणप्रचारे;
अस्य कीर्त्तिवल्ली प्राप्नुयात् सम्प्रसारम् ॥
आगतमिह नववर्षम् ॥

९. उद्बोधनम्

हृदि परिभावय रे ! त्वया कृतं किमनवद्यम् ?
पठनान्नहि . फलति मूढ ! केवलमिह पद्यम् ।।
दुरवगमः पन्थाः पान्थं नु त्वामधीरं
पदे-पदे प्रलोभयति मृगतृष्णानीरम्,
प्रापितं तु वद ! कदाप्यनेन किमपि हृद्यम् ।।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
जीवनमिदमकस्माद् गमिष्यति हि दुरन्तं,
न हि गच्छति मनः किन्तु कामानामन्तम्,
मुञ्चति न हि कालो मूर्खं वा कृतविद्यम् ।।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
दाक्ष्यं तव सर्वमरे ! चाकचिक्यमूलं,
जातुचिन्निराकुरुते किं मानसशूलम् ?
तमपि पातयिष्यति बहु मन्यसे तु यद्-यम् ।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।
त्यज सर्वानर्थमूलमर्थकृतं मोहं,
चिन्तय, 'कुत आयातः ?' 'कस्य कृते' 'कोऽहम्'
'सविनय'गोविन्द कृष्ण माधवेति गद्यम् ।
पठनान्नहि फलति मूढ ! केवलमिह पद्यम् ।।

१०. "कथं जातम्"

(गजलगीतिः)

व्योम्नि सहसैव घोरगर्जनं कथं जातम् ?
अद्य पश्याम्यनवसरे कथं नु पविपातम् ॥
यत्र नवशारदीयचन्द्रिकाचमत्कार-
स्तत्र लयकारि मेघमण्डलं किमायातम् ॥
रे ! विधातस्त्वया विचारितं किमद्य यर्हि
सर्जनोपक्रमे विसर्जनं समाम्नातम् ॥
चन्द्रलोकावलोकनाय भूः समुन्नद्धा-
परिमलं किमपि विसृज्यात्मनस्त्वनाघ्रातम् ॥
किन्तु मनुजस्य भाग्यपट्टिकासु लिखितं भोः !
हन्त ! नाद्यापि यत्तु कैश्चिदपि व्याख्यातम् ॥



११. वद विधुवदने !

(गजलगीतिः)

वद, विधुवदने त्वदीयमानसे कथं भीतिः ?
अपरिचितं कलयसि मयि प्रणयिनि, का संशीतिः ?
किं त्वया पीतमिदं मोहमयं मैरेयं
कापि वा युगस्यैव वञ्चनामयी रीतिः ॥
नाद्य रुद्धाऽसि देहलीषु सतम्प्रतं हि देवि !
'देहली' संस्थिता, तथापि ते न संप्रीतिः ॥
नाद्य त्वं सेविकाऽसि, स्वामिनी स्वयं जाता,
कथं सहसे बलात् स्वधर्षणं तथाऽनीतीः ।
नारि ! मृगतृष्णिकासु वारि प्राप्यते न मनाग्
नापि सिकतासु क्वचन लभ्यते सुधास्फीतिः ॥



१२. पश्य मुकुरे क्षणं नु वदनं स्वम् !

(गजलगीतिः)

पश्य, मुकुरे क्षणं नु वदनं स्वं, कीदृशो रे ! त्वमद्य संजातः।
तिष्ठ निमिषं तथापि भूपृष्ठे, यद्यपि त्वं वियच्चरो भ्रातः ॥
यत्तु नीहारिकासु नगरं ते,
प्रोज्ज्वलं कान्तिमयं प्रतिभाति,
हन्त! प्रहरार्द्धि समुदिते भानौ, यत्तु निधनं गमिष्यति प्रातः ॥
पश्य मुकुरे...... ॥
यत्कृतं भोस्त्वया न तद्वच्मि,
किन्तु कथयामि विरम संहाराद्,
यर्हि श्वासोऽपि साम्प्रतं रुद्धस्त्वद्भिया वाति नो सखे! वातः।
पश्य मुकुरे...... ॥
कञ्चुकं यदपि परिधृतं शुक्लं
श्यामिकासंकुले स्वरूपेऽस्मिन्,
तन्न सुचिरं भविष्यति भ्रान्त्या कस्य पदवीं मुधा त्वमनुयातः।
पश्य मुकुरे......॥
मित्र ! हृदयं क्षणं समवलम्ब्य,
ध्यातुमर्हस्यहह ! 'विनय' एतन्,
मञ्जुमेघावलीष्वपि भ्रान्त्या भवति किमयं न वज्रसम्पातः।
पश्य मुकुरे......॥

१३. क्षणिका

जीवनमस्ति पिपासा !
घर्मतप्तसिकता सुधावनं,
मोहमरुस्थलवनं प्रतिवनं,
परतो हन्त ! हताशा,
सत्यं जीवनमस्ति पिपासा !!
त्वं याने अहमिह पथचारी,
पदरहितोऽहं, त्वं पदधारी,
अन्तरमस्ति तावदेवैतद्
यावन्नास्ति यियासा,
जीवनमस्ति पिपासा !!
खपुष्पायिताऽऽकांक्षा सेयं
'इतोऽप्यधिकमिह ह्यनुसन्धेयं'
सततं सैव दुराशा,
जीवनमस्ति पिपासा !!

१४: अहो ! अद्य यूनां गतिः का नु जाता !

(गीतिः)

अहो ! अद्य यूनां गतिः का नु जाता,
यदेतान् विनिर्माय शेते विधाता ।।
न कुत्रापि येषां कृते ह्यादरं स्यात्
कुतस्तेषु 'सत्यं शिवं सुन्दरं' स्यात्
विमार्गाश्रितानां न वै कोऽपि त्राता ।।
अहो ! अद्य यूनां गतिः का नु जाता ! !
गता क्वापि प्रीतिः श्रिता कूटनीति -
स्तु सर्वत्र संदृश्यते ईति - भीतिः ।
धनं पूज्यते नैव तातो न माता ।।
अहो ! अद्य यूनां गतिः का नु जाता ।।
प्रपञ्चे प्रवीणा तु यस्यास्ति बुद्धिः,
श्रिता हस्तयोर्निश्चितं तस्य सिद्धिः,
प्रियं रूप्यकं, नाद्य बन्धुर्न भ्राता ।।
अहो! अद्य यूनां गतिः का नु जाता ।।
उलूकाः स्थिताः नन्दने कानने हा !
पिकः पीड्यते कण्टकानां वने हा ! !
न कोऽप्यस्ति सत्यानृतस्य प्रमाता !
अहो ! अद्य यूनां गतिः का नु जाता ।।
यदेतान् विनिर्माय शेते विधाता ।।

●

'पुरश्चरणकमलम्'

(संस्कृतनाटकम्)

लेखक :

डा० रमाकान्त शुक्लः

पात्राणि

१. रामः

२. लक्ष्मणः

३. हनूमान्

४. जाम्ववान्

५. विभीषणः

६. अञ्जना

७. देवी महाशक्तिः

६. नल-नील-गवाक्षाङ्गद-सुग्रीव-
वानरवीराः

रमाकान्तशुक्लप्रणीतं नाटकम्

पुरश्चरणकमलम्

"निराला"कृत-"राम की शक्तिपूजायाः" संस्कृतनाट्यरूपान्तरम्

(पूर्वरङ्ग-नान्द्यन्ते नेपथ्यतो वाचकध्वनिः श्रूयते)

वाचकः : रविरस्तमगात्, ज्योतिष्पटले लिखितं ह्यमरम्,
अद्यतनं स्थगितं श्रीराघवरावणसमरम्,
अत्यन्ततीक्ष्णशरपातयुतं वगप्रखरं,
शतशैलसंवरणशीलं पूरितनभस्स्वरं,
प्रतिपलव्यूहपरिवृत्तियुतं कौशलभरितम्,
राक्षसविरुद्धप्रत्यूहकुपितकपिहूह - कृतम्,
राघवलाघव - रावणवारण - गतद्विप्रहरं,
उद्धतलङ्कापतिमर्दितकपिदलबलप्रसरं,
अनिमेषरामविश्वजिद्दिव्यशरभङ्गकरं
खररुधिरस्रावं, विद्धयोद्धृनिर्भयनिकरं,
रावणप्रहारदुर्वारविकलवानर - दल - बल-
मूर्च्छितसुग्रीवाङ्गदभीषण-गवाक्ष - गय - नल-
सौमित्रभल्लपति - वारितागणितमल्लरोध-
गर्जत्प्रलयाब्धिक्षुब्धहनूमन्मात्रबोध-
मुद्गोरितवह्निभीमपर्वतकपियत्नकरं,
जानकीभीरुहृदयाशादं विकटं समरम्।
युगदलौ निवृत्तौ; राक्षसपादैश्चलिता भूः,
उल्लासविद्ध आकाशो नितरां विकलोऽभूत्।
रघुपतिपदचिह्नविलोकनखिन्ना कपिसेना
शिविरं प्रति चलिता स्थविरावली यथा भिन्ना !

रघुपतिमनुयाति लक्ष्मणस्तं वानरवीराः।
चिन्ताचुम्बितचित्ताः सर्वे यद्यपि धीराः॥
सम्प्राप्ताः पर्वतशिखरे सर्वे विश्रान्ताः।
सुग्रीवविभीषणजाम्बवदादिकविक्रान्ताः ॥
नलनीलगवाक्षांगदमारुतिप्रमुखाः वीराः
रामं परितस्तिष्ठन्ति मनस्युत्का धीराः।

(वाचकध्वनिमनुरुद्ध्य युद्धस्थलान्निवर्तमानं खिन्नं रामदलम्। रामदलवीराः पर्वतशिखरे मन्थरगत्या आयान्ति। तिष्ठन्ति। परामर्शं कर्तुं प्रारभन्ते। हनूमान् पादप्रक्षालनार्थं जलमानयति।

श्रीरामः : (सुग्रीव - विभीषण - जाम्बवदंगद - नल - नील-गवाक्षान् प्रति) वीराः, ननु गच्छन्तु सन्ध्योपासनामनुष्ठातुम्। प्रतिनिवर्तने भवतां, भाविनो रणस्य विषये परामर्शं करिष्यामः।

(सर्वे गच्छन्ति। हनूमान् तिष्ठति)

लक्ष्मणः : आर्य ! किं चिन्त्यते ?

श्रीरामः : वत्स लक्ष्मण ! अद्यतनं युद्धमेव विचिन्तयामि ! मया किं किं शरसन्धानकौशलमद्य न प्रदर्शितम्, किन्तु सकलमपि निष्फलमेव संजातम् ! रावणस्य दुर्वार-प्रहारैर्वानरा विकला अजायन्त। केवलं हनूमानेव युद्धे प्रबोधं भजते स्म, अन्ये तु आस्माकीना वानरवीरा मूर्च्छिता एवाभवन्। रणस्थलात् प्रत्यावर्तनवेलाया-महमिव तेऽपि खिन्नतां श्रान्तिं चानुभवन्त आसन्। श्वः किं भविष्यति ? —इत्येव चिन्ता मां दुनोति।

लक्ष्मणः : आर्य ! अलं चिन्तया ! संकटकाले धैर्यं न त्याज्यम्। दृढनिश्चयेन, अध्यवसायेन श्रमेण च नूनं वयमन्यायपरं

रावणं जेष्यामः, आर्यां जानकीं च तस्मान्नीचापसदान्मोचयिष्यामः। जय-पराजयौ तु रणस्थले भवत एव। अद्य यदि रावणो विजयी इव दृश्यते तर्हि श्वः स पराजितोऽपि भवितुं शक्नोति। आर्येणैवं दैन्ये समालम्बिते सति अन्येषां वीराणां का दशा भवेदित्यार्येण विचारणीयम्। ननु सेनापतेरेव मनोबलेन सैनिकानां मनोबलं वर्धते।

श्रीरामः लक्ष्मण! दैन्यं नावलम्बे, नापि धैर्यं त्यजामि, अपि तु यथार्थं परिशीलयामि। अद्य युद्धे उद्धतलङ्कापतिना यथा कपिदलबलं मर्दितं तत्स्मारं स्मारं तु इदमेव प्रतीयते यद्रावणोऽजेयः संवृत्तः। कथमधुना जानकीं विमोचयिष्यामि कथं च अयोध्यावासिनः स्वमुखं दर्शयिष्यामि-इति चिन्ता दुनोति मे मानसम्!

(कृतसन्ध्योपासनानां वानरवीराणामागमनम्)

आगच्छतन्तु वीराः। तिष्ठन्तु।

(वीरास्तिष्ठन्ति। जाम्बवान्, विभीषणः सुग्रीवः सम्मुखं तिष्ठन्ति। पद-प्रान्ते हनूमान् प्रथमत एव तिष्ठति) सर्वे श्रान्तिं रूपयन्ति)

कथमनुभूतमद्यतनं युद्धम्! श्वो युद्धे गन्तुमुत्सहन्ते अत्रभवन्तः?

सर्वे : अवश्यम्!

वीरः (१) : रणात्पलायनं तु कादराणां स्वभावः,न तु वीराणाम्।

वीरः (२) : ताटका - सुबाहु - विराध-- त्रिशिरा - खरदूषणान्तकस्य श्रीरघुवीरस्य सहायका वीराः सन्ति न तु कादराः।

जाम्बवान् : भगवती जानकी प्रतीक्षते भवद्दर्शनम् औत्सुक्येन!

श्रीरामः : जानकि !

('फ्लैशबैक' -पद्धत्या पुष्पवाटिका-जयमाला-वनगमन-दृश्यानां प्रत्यायनम् । अशोकवाटिकायां स्थिताया दीनाया जानक्या रामं प्रत्यवलोकनम् ।[1] रावणस्याऽट्टहासः। रामो व्याकुलतां नाटयति । अश्रुमोचनं करोति)

हनूमान् : प्रभोर्नयनाभ्यामश्रुपातः ! धिङ् माम् ! मयि जीवति प्रभोश्चेतसि पीडा ! अयमहं समस्तं व्योम एव ग्रसिष्यामि ! पश्यामि च, कथं नाम श्रीरामस्य किमपि व्यथाकारणं कुत्राप्यवशिष्यते ?

(इति सक्रोधमाकाशोत्पतनं सूचयति)

(नेपथ्ये **शंकरध्वनिः** देवि ! महानाशो भावी । स्वतेजः संवृणु । नायं हनूमान् साधारणः कपिरपितु चिरब्रह्मचारी, मर्यादापुरुषोत्तमरामस्यार्चनायाः साक्षाद्विग्रहः। अमुं तेजसा प्रहरन्ती त्वं पराजयं लप्स्यसे ! विद्यामाश्रित्यैनं प्रबोधय। अयं नम्रतामङ्गीकरिष्यति। संकटं दूरीभविष्यति । त्वरस्व देवि ! त्वरस्व ।

(गर्जनादिध्वनिः)

देवीध्वनिः : युक्तं भणसि महादेव ! अहमञ्जनारूपं धृत्वा प्रबोधयामि हनूमन्तम् ।)

(अञ्जना प्रकटीभवति)

अंजना : वत्स हनूमन् ! हनूमन् ! किमिदं व्यवस्यते त्वया ?

हनूमान् : अये ! ममाम्बा ! प्रणमामि मातः !

अंजना : वत्स ! चिरञ्जीव ! किमिदमकार्यमनुष्ठीयते त्वया ? ननु आकाशं ग्रसितुं तत्परोऽसि ?

---

१. अत्र यथासौविध्यं निर्देशकेन योजना कार्या ।

हनूमान् : सम्यग् लक्षितमम्बया ! अद्य मया भगवतो रामस्य नेत्रयोः अश्रुकणाः वीक्षिताः। मयि जीवति स्वामी यदि पीडया साश्रुनयनो भवति तदा धिङ्माम् ! अहं निखिलमपि विश्वं ग्रसिष्यामि ! रामाय कष्टदाता न कोऽपि कुत्राप्यवशिष्येत !

अंजना : पुत्र ! नेदमकार्यं कर्तुमर्हसि।

हनूमान् : कथमकार्यम् ? किमत्र अकार्यत्वम् ? ननु पश्यत्वत्रभवती कथं सुकरतया ग्रस्यते मयाकाशः।

अंजना : अलमलमनेन शौर्यप्रदर्शनेन ! शैशवे रविं ग्रसित्वा त्वया जगत् अन्धकारे निमज्जितम्। अधुना यौवने च आकाशमेव ग्रसितुमनाः सन् श्रीरामस्य अहितमाचरसि !

हनूमान् : श्रीरामस्य अहितम् ? कथमेतत् ? तत्प्रीतय एव तु अहमाकाशं कवलीकर्तुमिच्छामि ! समस्तेऽपि ब्रह्माण्डे श्रीरामस्य शोककारणमहं स्थातुं नानुमंस्ये।

अंजना : बलनिधानमसि इत्यहं जाने ! इत्यपि जानामि यत्सर्वमपि चिकीर्षितमनुष्ठातुं समर्थोऽसि ! किन्तु मूढ ! किं त्वं जानासि यन्महाकाशे भगवतः श्रीरामस्य आराध्यदेवो देवाधिदेवो भगवान् शङ्करो निवसति। भगवान् श्रीरामस्तु शंकरं पूजयति, त्वं च स्वस्वामिनस्तम् इष्टदेवमेव ग्रसितुमुपक्रमसे। धन्योऽसि पुत्र ! किं रघुनन्दनेन एवं कर्तुमाज्ञप्तोऽसि ? किं श्रीरामोऽस्मिन् कर्मणि असमर्थ आसीत् यत्त्वामत्र स न्ययूयुजत् ? तव एतादृशैः कृत्यैरहं नतानना भवामि ! एतस्माद् असतो मनोरथात् स्वमनो निवर्तय ! बलनिधान ! बुद्धिनिधानमपि भव ! स्वस्वामिनोऽभिप्रायमज्ञात्वैव अत्युत्साह-

कृतानि अकार्याणि कुर्वाणाः सेवकास्तस्य यशो दूषयन्ति । न च त्वं तथा भूयाः । गच्छ श्रीरामस्य अन्यैः कृत्यैः सेवामाचर ।

हनूमान् : मातः । सम्यगवबोधितोऽस्मि ! मया तु विस्मृतमेवासीत् यन्ममेष्टदेवस्यापीष्टदेवस्य भगवतः शंकरस्यावासभूतो महाकाशः । तत्प्रतिनिवर्ते ! अम्ब ! अनुजानीहि प्रतिनिवर्तितुम् ।

अंजना : वत्स ! शुभं ते भूयात् ।
(अंजना निलीयते । शान्तो हनूमान् अवतारं सूचयति)
(स्थानम्: पूर्वोक्तम् । हनूमानागत्य श्रीरामचरणयोर्निकटे उपवशति । श्रीरामः शान्तश्चिन्तितो विषण्णश्चास्ति ।)

विभीषणः : रघुवीर ! अद्य निसर्गप्रसन्नं भवद्वदनकमलं सविशेषं चिन्ताम्लानमिव कथं वीक्ष्यते ?

हनूमान् : सत्यमाह विभीषणः । किञ्चित्कालपूर्वमत्रभवतो नेत्राभ्यामश्रूण्यपि पतन्ति स्म ।

रामः : सखे विभीषण ! मन्दभाग्योऽस्मि ! रणे विजयं लब्धुमनीशोऽस्मि ! इयमेव चिन्ता आकुलीकरोति माम् !

विभीषणः : रघुवीर ! किमिदमसामयिकमुदीर्यते ? ननु त एव अमोघप्रतापाः भवतः शराः तूणीरमध्यासते, तदेव संकटसहनक्षमं वक्षः, तावेव रणकुशलौ हस्तौ, तदेवामितं बलम्, स एव समरे मेघनादजयी सुमित्रानन्दनः, स एव ऋक्षराजः, स एव प्रमना सुग्रीवः, स एव महाबलोऽङ्गदः, स एव अबु दसम एको वीरो महावीरो हनूमान्, ते एव दक्षा सेनानायकाः, तदेव समरम् ! सत्स्वपि एतेषु विजयसम्भारेषु कथं सन्दिहानो लक्ष्यते भवान् विजयविषये ?

रामः : विभीषण ! न भवता ज्ञातुं शक्यते । सत्स्वपि विजयसम्भारेषु विजयो दुर्लभः । भग्नोत्साहोऽस्मि ! क्षीणाशोऽस्मि !

विभीषणः : रघुकुलगौरव ! कथं लाघवमापन्नोऽसि ? न युज्यते इयं दीनता तस्मिन् क्षणे यदा विजयश्रीः भवतः स्वागतं कर्तुं सन्नद्धा तिष्ठति ! अस्मिन् काले औदासीन्यं नावलम्बनीयम् । मन्दोत्साहता नाङ्गीकरणीया । ननु स्मरति भवान् भवता भवदनुसर्तृभिश्च कियान् श्रमो विहितो लङ्कां जेतुम् । जानक्या समाचारमानेतुं हनुमता कियत् साहसं कृतम् ! भवता च जानकीं रावणपाशात् विमोचयितुं किं किं न सोढम् ! अल्पीयसैव कालेन भवान् जानकीं प्राप्स्यति ! सा भवद्दर्शनं प्रतीक्षते । भवांश्चावसादमङ्गीकृत्य तस्या दूरं पलायितुमीहते !

रामः : विभीषण !

विभीषणः : रघुवीर ! सत्यमहं भणामि । यदि भवानस्मिन् क्षणे मन्दोत्साहतां भजते तर्हि जानकी अत्यन्तं विपद्ग्रस्ता भविष्यति । कलमषो रावणः, खलो रावणः, गताचारो रावणः, हितोपदेशं कुर्वति मयि पादप्रहारी रावणः अशोकवाटिकायां सीतां पुनरपि क्लेशयिष्यति; पारिषद्यैः परिवृतः स्वजयकथां कथयिष्यति, वसन्ततौं उपवने विस्रब्धं पिकानां कलकूजनं समाकर्णयिष्यति···यद्येवं भवान् मन्दोत्साहो भवति! ननु स्मर्यताम्- भवताहं 'लङ्केश' पदेन सम्बोधितः । अपि नामाहं लंकेशः संवृत्तः ?

(सभा निस्तब्धतां नाटयति ।)

रामः : (दीर्घं निःश्वस्य) सखे विभीषण ! समरे जयोऽस्माभिर्न लप्स्यते ? नेदमधुना नरवानराणां राक्षसेन सह युद्धमवसितम्। रावणेनामन्त्रिता महाशक्तिरधुना रावणपक्षे सम्मिलिता। महाशक्त्या सह नरवानराणां युद्धं कथं सम्भाव्यते ? हन्त ! यत्रैवान्यायस्तत्रैव महाशक्तिरपि संयुक्ता ! महाशक्ते ! किमिदमनुष्ठीयते भवत्या ?

(इत्यश्रूणि मुञ्चति। कण्ठावरोधं नाटयति। लक्ष्मणस्तेजश्चमत्कृतिं नाटयति। हनूमान् विवशतां, जाम्ववान् गम्भीरतां स्थितिज्ञतां च, सुग्रीवो व्याकुलतां, विभीषणश्च कार्यक्रमनिश्चयं नाटयति)

रामः : (संयतः सन्) न ज्ञातुं पारये दैवीविधानपरम्पराम् ! देव्या महाशक्त्याः कृते अधर्मरतोऽपि रावणः स्वकीयः संवृत्तः, अहं चापरः सञ्जातः ! शिव शिव ! अयं क्रीडाविलासः शक्तिदेव्याः !

सर्वे : (औत्सुक्यं गंभीरतां च नाटयन्ति)

रामः : अद्य रणे मया मुहुर्मुहुर्योजिताः निशिताः शराः खण्डिताः संवृत्ताः, श्रीहताः सञ्जाताः। त एव शराः प्रभावहीना अजायन्त यैरियं सम्पूर्णापि संसृतिर्जेतुमशक्यत, यैश्च समस्तापि सृष्टिः विपद्भ्यस्त्रातुमशक्यत; ये च घातकपतनसंस्कारयुता आसन्; येषु च क्षात्रधर्मस्य पूर्णाभिषेकोऽस्ति। ये च प्रजापतीनां संयमैः अरक्ष्यन्त !

सर्वे : (गंभीरतामौत्सुक्यं च नाटयन्ति)

रामः : मयाद्य रणे दृष्टं यन्महाशक्तिः रावणं स्वांके दधानास्ति तथैव, यथा शशी कलङ्कं धारयति। सा मया क्षिप्तान् मन्त्रपूतान् शरान् हेलयैव संवृणोति ! सर्वेऽपि मामकीना अमोघा बाणाः लक्ष्ये मोघा अजायन्त ! यथा यथाऽहं

कपिदलं व्याकुलं वीक्ष्य युद्धाय क्रुद्धोऽभूवम् तथा तथा देव्याः दृग्भ्यो ज्वलद्वह्निज्वालेवादृश्यत ! अथ सा मामीक्षितुमारभत ! तस्या अवलोकनेनाहं स्तब्ध इवाभवम् ! धनुराकर्षणस्य मम शक्तिः क्वचिद्विलुप्ता ! बद्ध इवाहं संवृत्तः। त्रस्त इवाहं सञ्जातः। महाशक्ते ! किमिदं भवत्या आरचितमद्य ! किमिदं व्यवसितं भवत्या ! यदा भवती एव अन्यायपक्षपातिनी संवृत्ता तदा असहायोऽहं किं करोमि ? (निःश्वासं मुञ्चति)

जाम्ब० : रघुवर ! अलं चिन्तया ! नैवं विचलितो भवितुमर्हति। भवतापीयं शक्तिः धार्यताम्। आराधनस्य दृढतराराधनेनोत्तरं दीयताम्। संयतप्राणैः प्राणेषु विजयो व्रियताम्। यदि नाम रावणः अशुद्धः सन्नपि शक्तिबलेन भवन्तं त्रस्तमकरोत्तर्हि शुद्धस्तु भवान् सिद्धो भूत्वा तमवश्यमेव ध्वंसयिष्यति !

(रामः कञ्चिदुत्साहं रूपयति)

राघवेन्द्र ! भवतापि शक्तेः पूजा कल्प्यताम्। यावत्सिद्धिर्नैव लभ्येत, तावद् युद्धं त्यज्यताम् ! भवत्साधनाकाले लक्ष्मणोऽस्माकं महावाहिन्या नायकत्वेन स्थास्यति। अङ्गदः, अहं हनूमांश्च तस्य प्रधानसहायकत्वेन स्थास्यामः। नल-नीलौ, सुग्रीवो विभीषणः, अन्ये च यूथपतयस्तदादेशानुसारं यथावसरं स्वनियोगमशून्यं विधास्यन्ति।

सर्वे : (उत्साहं प्रसन्नतां च रूपयन्ति)

रामः : ऋक्षपते ! एष भवतः शुभः कल्पः ! अवश्यं मया महाशक्तिराराधनीया !

(रामो ध्यानं निरूपयति । पुनश्च आवेगरहितस्वरेण देवीं मनसि कृत्य ब्रवीति) मातर्दशभुजे ! विश्वज्योतिः । तव शरणागतोऽस्मि !

(क्लेशबैकपद्धत्या देव्याः महिषासुरमर्दि रूपं प्रदर्शयितुं शक्यते)

तव शक्त्या विद्धः सन् खलो महिषासुरः मर्दितोऽभूत् । धन्योऽसौ तव चरणतलगतो गर्जन् सिंहः । मातः ! गृह्णामीङ्गितम् । नूनमयं सिंहो मम प्रतीकभूतः । अहं अयमिव निर्भीकः सन् त्वां वोढा ।

(रामो ध्यानं निरूपयति । देवीच्छविलीनतां रूपयति । यद्यस्मिन्नवसरे देव्या रूपं प्रदर्शयितुं शक्यते तर्हि शोभनं भवेत् । सर्वे वीराः रामस्य भावस्मितमाननं पश्यन्ति ।)

रामः : (धीर-गंभीरस्वरेण) बन्धुवराः । ननु पश्यत । पुरतो योऽयं शतहरितगुल्म-तृणैः श्यामलः सुन्दरो भूधरः शोभते स एव पार्वती-रूपेण प्रतिभाति । चरणप्रान्ते गर्जन्नयं सिन्धुर्नास्ति अपि त्वयं देव्याः सिंहोऽस्ति । दश दिशोऽस्या हस्ताः सन्ति । मनागूर्ध्वं पश्यत । अम्बरे दिगम्बरः शशिशेखर अर्चित इव दृश्यते ! इदं महाभावमङ्गलं वीक्ष्य मानवमनसि वसानस्य असुरभावस्य गर्वः खर्वतां याति ! जय जय हे महिषासुरमर्दिनि । जय जय शैलसुते ;

(यथासैविध्यमत्र कस्यचित् देवीस्तोत्रस्य पाठः कारयितुं शक्यते अथवा 'पूर्वध्वन्यंकितं' (Pre-recorded) स्तोत्रं नेपथ्येन प्रस्तोतुं शक्यते । पात्राणि तदनुरूपम् ओष्ठसञ्चालनं भावाभिनयं वा कर्तुं शक्नुवन्ति)

(मधुरदृष्ट्या हनूमन्तमाकर्षन्निव, प्रियतरस्वरेण हनूमन्तं

प्रति) कपिवर ! अस्मभ्यमष्टोत्तरशतमिन्दीवराण्यपेक्ष्यन्ते। यद्यधिकानि लभामहे तर्हि अधिकस्याधिकं फलम् ! प्रियवर ! उषःकाले एव सत्वरं देवीदहं गत्वा इन्दीवराण्यवचित्यानय। तदनन्तरं रणे गत्वा स्वपराक्रमं प्रदर्शय ! देवीदहस्य मार्गं, दूरतां स्थितिं च ते जाम्ववान् कथयिष्यति। कथं मन्यते ऋक्षपतिः ?

जाम्ब०: युक्तमाह राघवेन्द्रः। (हनूमन्तं प्रति) हनूमन् ! अहं देवीदहस्य विषये यथाभिलषितां सूचनां तुभ्यं दास्यामि !

हनूमान् : अनुगृहीतोऽस्मि यत्प्रभुणास्मिन् पुण्यकर्मणि नियुक्तोऽस्मि। (श्रीरामस्य चरणौ स्पृशति। पदरजः शिरसि धारयति। जाम्ववान् तस्मै देवीदहमार्गनिर्देशं नाटयति। हनूमान् प्रतिष्ठते)

रामः : वान्धवाः ! अतिकालः सञ्जातः। गच्छत, यूयमपि विश्रामं कर्तुमर्हथ।

सर्वे : विजयताम् श्रीराघवेन्द्रः ! (इति निष्क्रान्ताः)

(सूर्योदयपूर्ववेलायामरुणिमा। शनैः शनैः सूर्योदयः। रामः पूजासनमध्यास्ते। हस्ते धनुर्वाणौ न स्तः। जटाः बद्धा न सन्ति। हनूमान् आगच्छति)

हनूमान् : भगवन् ! इमानि अष्टोत्तरशतमिन्दीवराणि देवीदहतः समानीतानि।

रामः : साधु कपिवर ! साधु !

हनूमान् : इदानीं को नियोगोऽनुष्ठीयताम् ?

रामः : वत्स गच्छ ! त्वमपि रणे सैन्यसाहाय्यं कुरु। अहमपि एकान्तमिच्छामि। आराधनां प्रारभे।

(नेपथ्ये रणकोलाहलः श्रूयते किन्तु रामः शान्तभावेन पूजायां रतोऽस्ति। पूजोपरान्तं दशभुजाया दुर्गाया नामानि जपति। मनसि देव्या नाम्नां गुणग्रामाणां मननं करोति। नाट्यनिर्देशककौशलेन देव्याश्छवयोऽपि 'स्लाइड-प्रयोगेण' 'जालप्रतिसीरा'-प्रयोगेण वा प्रदर्शयितुं शक्यन्ते रामः करमालया (अथवा रुद्राक्षमालया) एकजपस्य क्रमं पूरयित्वा एकैकं कमलमिष्टदेव्यै समर्पयति ।)

वाचकः : एवं श्रीरामो देव्याः समाराधने तत्परोऽस्ति । गहनाद् गहनतरं समाराधनमनेन सम्पाद्यते। पञ्चदिवसाः अनेन क्रमेण व्यतीताः ।

मूलाधारतः ऊर्ध्वतरं स्थितेषु चक्रेषु अस्य मनः सञ्चरते। जपानन्तरमेकमिन्दीवरमिष्टदेवतायै समर्पयति। एवं हि निजपुरश्चरणं पूरयितुमयं साधनायामग्रे सरति।

षष्ठे दिवसेऽस्य मनः आज्ञाचक्रे समाहितम् । प्रतिजपं महदाकर्षणं सिद्ध्यति। अस्य ध्यानं त्रिकुट्यां सञ्चितम्। उभे नेत्रे देव्याश्चरणयुगं पश्यतः। जपप्रतापेन अम्बरं कम्पमानं भवितुमारब्धम् । दिनद्वयं यावत् श्रीरामः एकासने तस्थौ। जपानन्तरं इन्दीवरं समर्पयति। अष्टमे दिवसे ध्यानस्थं मन ऊर्ध्वोर्ध्वतरं संक्रममाणं ब्रह्माच्युत-शंकराणां स्तरमतिक्रमते। तेन सकलमपि ब्रह्माण्डं जितम्। देवता स्तब्धाः सञ्जाताः। तपःप्रभावात् जीवनस्य आरम्भाः दग्धाः सञ्जाताः ! सप्तोत्तरैकशतम् इन्दीवराणि यथाविधानमद्यावधि पुरश्चर्याक्रमानुसारं जपानन्तरं दुर्गादेव्यै समर्पितानि। केवलमेकमेवारविन्द-मवशिष्यते। मनः सहस्रारचक्रं वेद्धुं सन्नद्धम् अस्ति।

निशीथे साक्षाद्भगवती दुर्गा आयाति। सहासं च पूजाकमलं स्वकरेणैव गृहीत्वा विलीयते।

श्रीरामोऽन्तिमं जपं पूरयति। ध्याने जगज्जनन्याश्चरणयुगलं पश्यन् निमोलितनयनः श्रीरामः कमलमाहर्तुं करमर्पयति। हन्त ! तत्र कमलं नास्ति। अस्य मनः किञ्चित् चञ्चलतां भजते।

रामः : (नेत्रे उन्मीलयति। कमलमनवलोक्य मनाग् आतुरतां नाटयति।)अयं जपपूरणकालः। आसनत्यागाच्चासिद्धिः। किन्नु खलु करोमि !

(रामस्य प्रीरिकार्डध्वनिः)

(रामः साश्रुजलनयनतां नाटयति)

रामस्य ध्वनिः : धिगिदं जीवनम्। यद् विरोधमेव आप्नोति ! धिङ् मम साधनाम् ! यदर्थमेतावान् शोधो विहितः। (सकरुणं) जानकि ! तवोद्धारः कर्तुं मया नापार्यत !

वाचकः : किन्तु क्षणविक्षोभेणानेन राघवेन्द्रस्य मनः पराजयं न स्वीकुरुते। तन्मायावरणं भित्त्वा बुद्धिर्दुर्गमुपतिष्ठते। विद्युद्गत्या श्रीरामस्य मनः किञ्चित्स्मरति।

रामस्य ध्वनिः : लब्धो मयोपायः। शैशवे माता मां सदैव राजीवलोचनं व्याहरति स्म। एवमधुनापि द्वे नीलकमले मत्सकाशे अवशिष्येते। मातर्भगवति दुर्गे ! एक नयनकमलं समर्पयित्वा पुरश्चरणमिदं पूरयामि। गृहाण एतन्मे अन्तिमं पुरश्चरणकमलम्। (इति / तूणीरस्थं ब्रह्मशरं पश्यति। तं च वामकरेण गृह्णाति। दक्षिणकरेण दक्षिणं नेत्रं स्पृशति। बाणेन लोचनं निस्सारयितुकामो भवति। अस्मिन्नेवान्तराले देवो आविर्भवति।)

देवी : (वरदमुद्रया) साधु साधक-धीर राम ! साधु ! धर्मधन, धन्योऽसि ! तवानेन दृढनिश्चयेन पूर्णेन तपसा च प्रीतास्मि ! पुरुषोत्तम ! ते विजयः सुनिश्चितः । एषाहं त्वयि विलीना भवामि । उत्तिष्ठ हे सद्धर्मप्रतीक ! अन्यायं जेतासि !

(राम उत्साहं दृढनिश्चयं च सूचयन्नुत्तिष्ठति । धनुर्गृह्णाति । सर्वे हनूमदादयः आगत्य प्रसन्नतां सूचयन्ति । सामूहिकस्वरेण गायन्ति अथवा ध्वनियन्त्रेण पूर्वाङ्कितं देवीस्तोत्रं नेपथ्यतः श्रावयितुं शक्यते तदनुसारं च पात्राणि भावाभिनयं सूचयन्ति :

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च नहि वक्तुमलं वलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ।।)



मुद्रक : देववाणी प्रिण्टर्स उत्तम नगर, नयी दिल्ली-११००५९

'पण्डितराजीयम्'

(संस्कृतरेडियोनाटकम्)

लेखक : डा० रमाकान्त शुक्ल:

पात्राणि

जगन्नाथः : पण्डितराजः, नाटकस्य नायकः। शाहजहानसभापण्डितः।

शाहजहानः : दिल्लीश्वरः, जगन्नाथस्याश्रयदाता।

लवंगी : शाहजहान-पालिता काचित् कन्या, जगन्नाथस्य प्रेयसी। पश्चात् पत्नी।

लवंग्याः सखी

सम्राज्ञी : शाहजहानस्य पत्नी।

पण्डिताः : असूयकः, प्रशंसकः, तटस्थश्च।

प्रतीहारी,)
मन्त्री, दूतः) शाहजहानस्यास्थानवर्तिनः।
भृत्यः)

बटुः : पिपठिषुः ब्रह्मचारी। पश्चात् पण्डितराजस्य शिष्यः।

रमाकान्तशुक्लप्रणीतम्

'पण्डितराजीयम्'

(संस्कृतरेडियोनाटकम्)

सूत्रधार-ध्वनिः : भारतभूमिर्महापुरुषाणाम् जन्मस्थली। अस्याम् अनेके महापुरुषाः संजाता येषां यशोदीपेन समस्तमपि जगत्कान्तिमत् लक्ष्यते। यैर्जातिवर्णस्य देशस्य कालस्य चोपेक्षां कृत्वा मानवतायां दृष्टिर्न्यस्ता, यैश्च क्षुद्रविचाराः साहसपूर्वकं खण्डितास्तेष्वेव अन्यतमोऽभूत् पण्डितराजो जगन्नाथः। पण्डितराजो जगन्नाथः। अयं महाकविः बहुभिः राजभिः पूजितः। अस्य काव्यजातमद्यापि सहृदयानां शिरो नर्तयति। सम्राजः शाहजहानस्यापि सौभाग्यमासीद् यदयं महाकविस्तस्य राज्यसभां सभाजयत्—

(रथागमनध्वनिः। पदचापध्वनिः)

(द्वारि आगमन्)

(१)

प्रतिहारी : को भवान्? अत्रागमनस्य किं प्रयोजनम्?

द्वारस्थः : प्रतिहारि! श्रीमत्पेरमभट्टस्य सूनुर्जगन्नाथोऽहम्। यः खलु विविधशास्त्राण्यधीत्य श्रीमज्जहांगीरस्य राज्यसभानिवाससुखमनुभूय तस्य महाप्रयाणे उदयपुराधीश्वरस्य श्रीमतो जगत्सिंहस्य सभागौरवं संवर्ध्य अधुना पुनरपि दिल्लीवल्लभपाणिपल्लवतले ससुखं काव्यसाधनां सम्पादयितुमुपस्थितः। किम् पातिसाहोऽधुनैव मां द्रष्टुं

सन्नद्धः ? इति पृष्ट्वा सूचनीयोऽहम्। स एव मामाहूतवान्। इदं तस्य पत्रम्।

प्रतिहारी : अये, जगन्नाथपण्डितस्य दर्शनं करोमि ? ननु धन्यमिदं राजभवनं यत्र पाण्डित्यं स्वयमेवोपस्थितम्। भवन्तः क्षणं प्रतीक्षन्ताम्। अहमधुनैव भवदागमनोदन्तं देवाय निवेदयामि। (प्रयाति। पदचापध्वनिः)

(शाहजहानं प्रति) देव ! श्रीमत्पेरमभट्टसूनुः जगन्नाथपण्डित उदयपुरादागतः।

शाहजहानः : अये, जगन्नाथपण्डितः समायातः ? सौभाग्यं ननु मुगलशासनस्य यदेवंभूतः पण्डितप्रवरस्तत्सभाजयितुमायातः। अस्माभिरेव तत्सविधे निमन्त्रणं प्रहितमासीत्।

प्रतीहारी : युक्तम्, स भवत्पत्रमपि ददर्श—

शाहजहानः : प्रतीहारि, स्वपितृशासनेऽपि अस्माभिस्तस्य मृद्वीकारसझरीसमा कविता आस्वादिता। त्वरितं सादरं प्रवेशयैनम्। एवम्भूतस्य कविशिरोमणेः द्वारि स्थितिः अस्माकं गौरवं खण्डयति। गच्छ !

प्रतीहारी : यथाज्ञापयति देवः। (प्रयाति। पदध्वनिः) (पण्डितं प्रति) पण्डितवर, पातिसाहो भवन्तं सौत्सुक्यं प्रतीक्षमाणस्तिष्ठति। आगम्यताम्।

जगन्नाथः : मार्गं दर्शय !

प्रतीहारी : इतः इतः। पातिसाहो भवतां प्रशंसां करोति स्म। अथवा भवतां का प्रशंसा ? पाण्डित्यस्य प्रशंसा तु स्वस्यैव प्रतिष्ठा। अयमस्ति पातिसाहः, अग्रे आयान्तु। भवदागमनं प्रतीक्षमाणो विष्टरादुत्थाय भ्रमति।

जगन्नाथः : विजयताम् महाराजः।

शाहजहानः : (करे गृहीत्वा) अये, पण्डितप्रवर जगन्नाथ ! चिराद् दृष्टोऽसि। ननु कुशली भवान् ? अत्रागमने कष्टं तु नानुभूतम् ?

जगन्नाथः : देव, कष्टं किम् ? कष्टं तु भवते दत्तम् !

शाहजहानः : पण्डितवर, मैवम्। ननु वयं तु भवन्तमुपलभ्य धन्या स्मः। अस्मत्पितृचरणमहाप्रयाणे मुगलसभां परित्यज्य यदाप्रभृति भवान् प्रयातस्तदाप्रभृति एव भवादृशं पण्डित-मनुपलभ्य वयं केनापि सुकृतेनेव वञ्चिता आस्म। अधुना अत्रागमनेन भवतास्माकं प्रार्थनांगीकृता इति आह्लादस्य विषयः।

जगन्नाथः : भवत्पितृचरणश्रीनूरुद्दीनजहाँगीरस्य महाप्रयाणे आगरानगरे अव्यवस्था संवृत्ता। भवान् तु जानात्येव यत्साहित्यसर्जनं, पाण्डित्यसाधनं, काव्यप्रणयनादिकं च शान्तिमपेक्षन्ते। अत एवाहम् उदयपुराधीश्वरजगत्सिंहस्य सभायां गतः। तत्र च मया काव्यादिकं प्रणीतम्। कतिपयदिनपूर्वमेव भवत्संदिष्टमुपलभ्य मयात्रागमने मतिः कृता। अद्य च आगत्य भवते कष्टं दत्तम्।

शाहजहानः : अये नैवम्! कष्टं तु भवता उदयापुराधीश्वर-जगत्सिंहाय दत्तम् यो हि भवत्स्मृत्या निद्रामलभमानः यथाकथंचिद् रात्रिम् यापयन् स्यात्। ननु स भवत्प्रणीतं जगदाभरणं काव्यं स्मारं स्मारं कथमिव निद्रां लभेत ? पण्डितवर, श्रावय तु जगत्सिंहस्य वर्णनस्य कमप्यंशम् !

जगन्नाथः : परस्य नृपतेः विषये कथं नु शुश्रूषुर्भवान् ?

शाहजहानः : पण्डितवर, जानात्येव भवान् कवितायां परत्व-ममत्वभावना नैव भवति। यदि काव्यं काव्यमस्ति तर्हि तत् सार्वजनीनं भवति चेत्तत् कमप्यवलम्ब्य कृतं स्यात्। श्रावयतु किञ्चित्।

जगन्नाथः : वस्तुतः भवान् सहृदयः। श्रृणोतु—

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमाः
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन् वाचां विलासो मम ॥

शाहजहानः : सूक्तम्‥ ···

जग० : विद्राणेव गुणज्ञता समुदितो भूयानसूयाभरः
कालोऽयं कलिराजगाम जगतीलावण्यकुक्षिम्भरिः ।
एवंभावनया मदीयकविते मौनं किमालम्बसे
जागर्तु क्षितिमण्डलोपरि जगत्सिंहो धराधीश्वरः ॥

शाहजहानः : ननु धन्योऽयं जगत्सिंहोः यो हि भवल्लेखनीविषयः संवृत्तः, यश्च जरामरणादिभयविमुक्तेन यशःशरीरेण चिरकालं यावत्सृष्टौ स्थास्यति ।

जगन्नाथः : कवीनां सत्कारः सत्कर्तारममरीकरोत्येव ।

शाहजहानः : पण्डितवर, भवद्भिर्भोजनमपि कृतं न वा ? अहं तु भवदमृतकल्पानि वचांसि शृण्वन् भवद्भोजनादि-विषये विस्मृतिमेवापन्नः ।

जगन्नाथः : भोजनस्य न कापि चिन्ता । सूनृता वाणी एव तेषां भोजनम्, येन तेषां स्वाभिमानबुभुक्षा शाम्यति । सत्कार-जलेनैव तेषां तर्षः शाम्यते । तथापि-मत्पार्श्वे सर्वमपि अस्ति । उदयपुराधीश्वरेण अश्वरथे विविधपक्वान्नादिकं संस्थाप्याहं विसृष्टः । तत्रैव मदीयं काव्यादिकंमन्यदाव-श्यकं वस्तुजातं च सन्तिष्ठते ।

शाहजहानः : क्वासौ रथः ?

जगन्नाथः : राजभवनमारादेव तिष्ठति ।

शाहजहानः : प्रतीहारि, त्वरितमेव सारथेरनुरूपं स्वागतं विधाय कृतकशिपुं तं कुरु। पण्डितवर, भवदीयं वस्तुजातमपि भवत्कृते सुरक्षिते कक्षे यास्यति।

जगन्नाथः : मया तु विस्मृतमेव भवता सह वार्तालापे यत्सारथिरपि मया सह वर्तते! भवतु, अधुना भवानपि विश्रामं लभताम्। अहमपि शयनीयं गच्छामि।

शाहजहानः : बाढम्, प्रातःकाले सभायां भवन्तं द्रष्टुमुत्सुकाः स्मः।

जगन्नाथः : शुभा रात्रिः। प्रतोहारि निवासगृहस्य मार्गं दर्शयितुं कंचिद् भृत्यं प्रेषय।

प्रतोहारी : इत इतः पण्डितप्रवर, अयमत्र भवदाज्ञापालनोद्यतः भृत्यः।

भृत्यः : प्रणमामि पण्डितललामम्।

जगन्नाथः : शुभं भूयात्।

प्रतीहारी : अहं सारथेः व्यवस्थायै गच्छामि।

जगन्नाथः : बाढम्, साधय।

भृत्यः : इत इतः आगच्छतु। इदं भवत्कृते सुरक्षितं वासगृहम्।

जगन्नाथः : वाढम्। अहो, रमणीयं वासगृहम्।

भृत्यः : भगवन्, आसनम् सनाथीकरोतु। पादौ संवाहयामि?

प्रतोहारी : (प्रविश्य) भगवन्, रथादानीतम् इदं भवतां ग्रन्थजातम्!

जगन्नाथः : बाढम्, प्रतीहारि. गच्छ त्वमपि विश्रामं कुरु।

प्रतोहारी : यथाज्ञापयति भवान्।

जगन्नाथः : (स्वगतम् ग्रन्थं विलोकयन्) इयं गंगालहरी, इयञ्चामृतलहरी, इयं करुणालहरी, इयं च लक्ष्मीलहरी, इयं च सुधालहरी, । इमा सर्वा अपि मामकीनायाः देवरतेः

प्रमाणम्। इदं च जगदाभरणं श्रेष्ठ-गुणानां सम्मानस्य प्रमाणम्। भगवति गंगे !

स्मृतं सद्यः स्वान्तं विरचयति शान्तं सकृदपि
प्रगीतं यत् पापं झटिति भवशापं च हरति।
इदं तद् गंगेति श्रवणरमणीयं खलु पदं
मम प्राणप्रान्तर्वदनकमलान्तर्विलसतु ॥

(२ शाहजहानस्य राज्यसभा)

उद्घोषकः : सावहिता भवन्तु, महाराजाधिराजः सम्राट् शाहजहानः सभाम् प्रविशति।

सामन्ताः : विजयताम् महाराजः।

शाहजहानः : (उपविश्य सिंहासने) उपविशन्तु सामन्ताः। मन्त्रिवर, अद्यास्माभिः पण्डितवरो जगन्नाथः सभाजनीयः। कश्चिद् भृत्यस्तं सादरमानेतुं प्रेष्यताम्।

मन्त्री : यथाज्ञापति महाराजः।

शाहजहानः : ननु धन्योऽयं मुगलवंशः यस्मिन् भारतं शासति न केवलं शासनदृष्ट्या देशः समुन्नतः, अपि तु साहित्य-दृष्ट्यापि अस्य औदात्त्यं दृश्यते। लोकनायकस्तुलसीदासः, अब्दुलरहीम खानखाना, जगन्नाथपण्डिततुल्याश्च अनेके विद्वांसः कवयश्च मुगलकुले भारतं शासति भारतभुवं धन्यांचक्रुः - इत्यस्मत्कृते परमं सौभाग्यम्।

मन्त्री : निश्चप्रचमेवमेव। देवस्यापि तु कविषु कलाकारेषु च अतीव स्नेहः। तदैव तु निशीथेऽपि कवयः समाद्रियन्ते।

शाहजहानः : मन्त्रिवर ! अस्मन्मते तु मयूरसिंहासनादपि बहुमूल्यं कवेः सन्निधानम्। यतो हि मयूरसिंहासनमध्यास्य वयं बहिरंगदृष्ट्या शोभामहे किन्तु कविसान्निध्यमनुभूय वयमान्तरिकशोभामनुभवामः।

मन्त्री : युक्तं देव ।

प्रतीहारी : महाराज, पण्डितवरो जगन्नाथः सादरं दूतेन समानीयते ।

शाहजहानः : प्रतीहारि, क्वासौ ? अये, स आयाति । शोभनमस्य व्यक्तित्वं मे चेतो हरति ।
(जगन्नाथस्यागनम् । सामन्तेषु कर्णजापध्वनिः—
'अयं स जगन्नाथः । अयमेव स पण्डितः ?' 'आम्, अयमेव सः पण्डितः यं महाराज उदयपुरादाहूतवान्')

जगन्नाथः : जयतु दिल्लीवल्लभः । जयतु ।

शाहजहानः : आगम्यताम् पण्डितवर, स्वागतम् । इत आगम्यताम् ।

मन्त्री : पण्डितवर, महाराजेन भवते स्वसिंहासनसन्निधाने एव आसनं संस्थापितम् ।

शाहजहानः : नन्वत्र किमाश्चर्यम् ? मन्त्रिवर ! कविर्विद्वान् वा कदापि भूपतेर्न्यूनो नास्ति । राजा तु स्वदेशे एव पूज्यते किन्तु विद्वान् सर्वत्र पूज्यते । राजा तु दण्डबलेन शरीरे शासनं करोति किन्तु कविः वाग्बलेन हृदये । पण्डितवर ! वयं भवतां सन्निधानमुपलभ्य अनुगृहीताः स्म । इदमासनम्, गृह्यताम् ।

जगन्नाथः : अनुगृहीतोऽस्मि । एकवारं पुनरपि मुगलराज्यास्थाने समागत्य तत्साहित्यप्रेम अनुभवामि ।

शाहजहानः : पण्डितवर, अहं स्वपितृसभायाः स्मरामि यत्र भवन्मुखान्मया काव्यं श्रुतमासीत् । अधुना किमपि पद्यं श्रावयतु ।

जगन्नाथः : महाराज, आकर्ण्यताम्—

समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं
निवासः पद्मायाः सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥

शाहजहानः : साधु पण्डितवर, साधु । अन्या शुश्रूषा वर्द्धते ।

जग० : नीरान्निर्मलतो जनिर्मधुरता रामामुखस्पर्धिनी,
वासः किञ्च हरेः करे परिमलो गीर्वाणचेतोहरः ।
सर्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह
त्वं चेत् प्रीतिमुरीकरोषि मधुपे तत्त्वां किमाचक्ष्महे ।।

शाहजहानः : साधु, पण्डितवर ! वस्तुतः त्वां प्रति ममानुरागस्य अभिव्यञ्जनमेतत्पद्ययुग्मे दृश्यते । प्रीतोऽहम् । भवते यदपि साहाय्यं ग्रन्थालोचनाय, काव्यप्रणयनाय, पाण्डित्य-समर्जनाय च अपेक्ष्यते तत्सर्वमस्माभिः ससुखं दास्यते ।

जगन्नाथः : अहं संस्कृताग्रन्थानुशीलनेन साकमेव अरवी-पारसी भाषयोरप्यध्ययनं चिकीर्षुरस्मि । मानवभावानां सम्य-क्परिज्ञानाय-विविधभाषाणां साहित्यस्य तुलनात्मक-मध्ययनमावश्यकम् । कश्चिदेतद्भाषाविद् मह्यं नियोजनीयः ।

शाहजहानः : अवश्यमेव । भवान् भाषान्तरविज्ञानां विविध-धर्मानुयायिनां च विचारसारैः परिचितः सन् स्वविचारैरपि तेषां तुष्टिं करोतु ।

जगन्नाथः : तत्तु करिष्याम्येव । अधुना गमनाय अनुमतः स्याम् । भवन्तः शासनव्यवस्थामवलोकयन्तु । नाहं प्रत्यूहमुत्पा-दयितुमिच्छामि ।

शाहजहानः : यथा भवते रोचते ।

जगन्नाथः : शुभं भवते ।



('संस्कृतपण्डितः अरबीशिक्षां गृह्णाति-एतदाश्चर्यम्' 'कथं महाराजः सत्स्वपि अन्येषु अरवोफारसीकविषु अमुं जगन्नाथमेवं वहु मन्यते' 'श्रूयते, स अतीव कुशाग्र-बुद्धिरस्ति अतित्वरया विदेशीयामपि भाषां गृह्णाति'

'मौलविनोऽपि तस्य मेधां साश्चर्यमालोकयन्ति', 'नूनमयं पण्डितोऽस्मानधरीकरिष्यति', 'अये, श्रुतं भवता ? अद्य तु जगन्नाथपण्डितेन शास्त्रार्थे बहवो भाषान्तरविज्ञाः मतान्तरानुयायिनश्च विद्वांसो मूकीकृताः। अतएव शाहजहानमहाराजेन सः पण्डितराजपदवीदानेन सम्मानितः' 'राज्यसभायां शाहजहानमहाराजेन सहैव स तिष्ठति', 'अरे, जगन्नाथेन समं तु महाराजः चतुरङ्गमपि क्रीडति', 'तस्य तु राजभवनेऽव्याहतप्रवेशः' 'न केवलं सः राजकविः सभापण्डि ो वा अपितु स महाराजस्य अन्तरंगसखा अपि' 'अरे तस्य अनुपस्थितौ कथं गर्जनं तर्जनं कुरुथः ? तत्समक्षे तु न किमपि ब्रूत, यदि साहसमस्ति तर्हि तत्समक्ष तस्य असूयां कुरुत'। 'कोऽस्ति तत्तुल्योऽद्य साम्राज्ये, यो हि चतुर्मुखव्यक्तित्वेन मण्डितः स्यात् ?' 'तस्य कवितामाकर्ण्य सर्वेऽपि मूर्धानं धुन्वति' 'काव्यं तु स हेलयेव करोति' 'ननु निश्चयमेव स पण्डितराजः' 'अतीव रूपवानयं कविः यं दृष्ट्वैव कन्याः मन्मथाधिरूढा भवन्ति' 'श्रूयते लवंगी अपि तस्मिन् चित्तं निदधाति' 'यदि पातिसाहस्य कर्णयोरयमुदन्तः प्रहितो भवेत् तदा नूनं पण्डितराजः निर्वासितः स्यात्,' 'ननु लवगी तु महाराजस्य कुटुम्बकन्यैव' 'सम्म्राज्ञी अपि तस्यां बहु स्नेहं दधाति' - इति प्रशंसक-असूयक-तटस्थपण्डिताना ध्वनयः)

(३)

लवंगी : सखि, किमद्य मह्य कवितां न श्रावयिष्यसि ?

सखी : कथं न श्रावयिष्यामि लवङ्गि ! शृणु प्रत्यग्रां कविताम्...

कस्तूरिकातिलकमालि विधाय सायं
स्मेरानना सपदि शीलय सौधमौलिम्।

प्रौढिं भजन्तु कुमुदानि मुदामुदाराम्
उल्लासयन्तु परितो हरितो मुखानि ।।

लवंगी : शोभनम् । अतीव प्रभविष्णुतया प्रस्तौषि कवितां त्वम् ।

सखी : अन्यदपि श्रोष्यसि ?

लवंगी : नन्वत्र पि प्रश्नः ? उपकारायाप्यनुमतिं गृह्णासि ? ननु अमृतपूरितौ मे कर्णौ कुरु ।

सखी : शृणु

अयि मन्दस्मितमधुरं वदनं तन्वंगि यदि मनाक् कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हन्त साम्राज्यम् ।।

लवंगी : इमाः कविताः कुतः कुतोऽवधार्य आनयसि ?

सखी : तत एव यो ऽसौ अद्यत्वे ब्रूते—

यथा यथा तामरसेक्षणा मया
पुनः सरागं नितरां निषेविता ।
तथा तथा तत्त्वकथेव सर्वतो
विकृत्य मामेकरसं चकार सा ।।

लवंगी : मूढे ! शनकैर्वद ! कथं तारस्वरेण प्रलपसि ? यदि कश्चिच्छृणुयात् ?

सखी : मुग्धे ! कथं बिभेषि? एताः कविताः त्वद्विषये न रचिताः ! लवङ्गि, व्यर्थमेव अभिमानदोलां कथमारोहसि ?

लवंगी : हतके ! मया कदा प्रतिपादितं यदिमाः कविता मद्विषयिण्यः सन्ति ?

सखी : मिथ्यावादिनि ! तर्हि कथं शनकैर्वक्तुमादिशसि ? शृणु सत्यम् इदानीम् । अहं सडिण्डिमघोषमुद्घोषयामि यदिमाः कविता लवंगीमेवाश्रित्य प्रणीताः, अद्यैव प्रणीताः, तेनैव पण्डितराजेन प्रणीताः, यो ह्यद्यत्वे—

लवंगी : अलं क्रूरे असम्बद्धप्रलपितेन ! (सखीमुखं हस्तेन स्थगयति) अथवा वाक्यशेषं पूरय। किमद्यत्वे ?

सखी : यो ह्यद्यत्वे भणति :—

उपनिषदः परिपीता गीतापि च हन्त मतिपथं नीता ।
तदपि न हा विधुवदना मानससदनाद् बहिर्याति ।।

(लवंगी लज्जां आह्लादञ्च नाटयति)

कुत्र विलीनासि ? किम् विस्मृतं त्वया यदद्य सम्राज्ञाः पुरतस्तव नृत्याभ्यासः परीक्ष्यते। ननु नृत्यकाले तमेव स्मृत्वा पदभंगं मा कार्षीः अन्यथा—

लवंगी : अलं प्रतिक्षणं परिहासेन। चल सम्राज्ञीं प्रति प्रतिष्ठावः।

(४ राजप्रासादः। सम्राज्ञाः विश्राम कक्षः)

शाहजहानः : सम्राज्ञि, ननु कुशलिनी भवती ?

सम्राज्ञी : सर्वमपि कुशलं यदि भवन्तः प्रष्टारः। अद्यत्वे तु भवन्तः पण्डितराजस्य कवितामेवाभिलषन्ति न तु माम्। पण्डितराजस्य कविता तु मन्ये मदीया सपत्नी जाता।

शाहजहानः : (विहस्य) वस्तुतः सः करोत्येव एवंविधां कविताम् यां निपीय मृद्वीकारसझरीमपि नाद्रियते सहृदयः। अतीव मेधावी अयं जगन्नाथः यो हि सुकुमारवस्तुनि साहित्ये न्यायग्रहग्रन्थिले च तर्के समानाधिकारी। भवतीमपि तस्य कवितां श्रावयिष्यामि।

सम्राज्ञी : मया तत्कविता श्रुता वर्तते। अतीव मनोहारिणी।

शाहजहान : कदा श्रुता ? कस्य मुखेन ?

सम्राज्ञीः । लवंग्या श्राविता। सैव कुतश्चिच्छ्रुत्वा समायाता। इमं श्लोकं श्रावयति स्म—

नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि ।
यदि कोमलता तवाङ्गकानामथ का नाम कथापि पल्लवानाम् ।।

शाहजहानः : अये ! लवंगी तु नितान्तं मेधाविनी या हि पण्डितराजस्य कवितां भवत्सम्मुखे स्थापितवती। ननु सा स्वयमपि तु काव्यं करोति। संस्कृतेऽपि तस्या रुचिरस्त्येवाबाल्यादेव ! अस्तु, अन्यदपि किंचित्कथयति स्म सा ?

सम्राज्ञी : कथयति तु न स्म किन्तु व्यनक्ति स्म।

शाहजहानः : किम् ?

सम्राज्ञी : पण्डितराजे स्वकीयमनुरागम्। मया तु इदमपि ज्ञातं यत्सा कदाचित्पण्डितराजं संस्कृतकविताशिक्षायै प्रार्थितवत्यपि। प्रमत्ता इव संवृत्तास्ति सा। यदाप्रभृति पण्डितेन्दुर्विलोकितस्तदाप्रभृत्येव तस्या लोचनचकोराभ्यां चांचल्यमुररीकृतम्। इयं तस्या दशा। पण्डितराजस्य को मनोभावः इति भवन्तः जानन्तु।

शाहजहानः : हुं, इद रहस्यम् ! तदैव तु पण्डिराजोऽद्यत्वे रसराजकवितां करोति। मन्ये, गुरुजनभयं द्वयोरपि प्रीतिं समधिकतरां विदधाति। यद्यपि स्पष्टं तु पण्डितराजेन न भणितं किन्तु कविताद्वारा तस्य लवंगीप्रेम व्यज्यते - इति मे विश्वासः।

सम्राज्ञी : एवम् ? तदा तूभयनिष्ठं प्रेम !

शाहजहानः : प्रेम अपि कियच्चतुरम् - स्वकीयं क्रीडास्थलं सर्वत्रैव अन्वेषयति। प्रहरिभिः परिवृतेऽपि राजभवने प्रेमियुग्मं क्रीडां करोति। प्रेम्णि नापि राज्यांकुशः नापि गुरुजनांकुशः। यदि कोऽप्यंकुशस्तत्रारोप्यते तर्हि तस्य वृद्धिरेव भवति।

सम्राज्ञी : अस्य प्रेमियुग्मस्य किं भविष्यद् भवन्मते ?

शाहजहानः : सम्राज्ञि, द्वयोरपि मंगलमस्मत्प्रियम्। पण्डितराजोऽपि स्वकीयः, लवंगी अपि स्वकीया एव। आबाल्यादियं कन्याऽस्माभिः सुतेव परिपाल्यते। कोऽपि न जानाति यत् कस्येयं

सुता ? पयोमुखी बाला अधुना यौवने पदं दधाति। तस्याः प्रीत्यर्थं वयं सर्वमपि कर्तुं व्यवसिताः। किमु सा पण्डितराजस्य विषये अन्यदपि किंचित्कथयति स्म ?

सम्राज्ञी : कथमिदं सम्भाव्यते-यत्सलज्जा बाला वाचा सर्वमपि कथयेत् ? यो नाम प्रेमाभिभूतायाः आकारेण इंगितैः गत्या चेष्टया नेत्रवक्त्रविकारैश्च अन्तर्गतं मनो न वेत्ति-सः स्पष्टाभिधानेनैव किं ज्ञास्यति ? मया यज्ज्ञातमस्ति तत्प्रामाणिकम्। अहमिव भवन्तं सा पण्डितराज वीक्ष्य, अनुश्रुत्य सम्भाष्य च अन्यथैव संवृत्ता। तयोर्मेलनं प्रेमानुरागाभिज्ञैर्भवद्भिरवश्यमेव सम्पादनीयम्।

शाहजहानः : (सहास) यथा भवत्यै रोचते ! (गम्भीरः सन्) किन्तु पण्डितसमाजः कथमिव, पण्डितराजमनुज्ञास्यति यवनपालितां कन्यां ग्रहीतुम्-इति प्रश्नः। अथवा भवतु, यदि प्रकृष्टं प्रेम द्वयोस्तदा तु न कोऽपि तौ वारयितुं शक्नोति, यदि केवलं रूपासक्तिरेव तदा अन्यथा सम्भावना। गच्छामि विश्रामकक्षे। मया पण्डितराजः चतुरंगक्रीडार्थमामन्त्रितोऽस्ति।

सम्राज्ञी : विश्रामस्तु अत्रापि कर्तुं शक्यते ! किन्तु अद्यत्वे तु भवन्तः मत्तः दूरमेव तिष्ठन्ति। प्रातःकालेऽपि तस्यैव कविता, रात्रावपि। अधुना मध्याह्न-विश्रामवेलायामपि पण्डितराजेन सार्धं चतुरंगक्रीडा।

शाहजहानः : (विहस्य), सम्राज्ञि, ननु भवती तु मम मानसे सदैव तिष्ठति। किन्तु पण्डितराजः चतुरंगक्रीडायामतीव चतुरः; अतस्तेन साकं क्रीडायामतावानन्दानुभूतिर्जायते। अधुना अनुमतः स्याम् ?

सम्राज्ञी : साधु, अनुमताः। मयापि लवंगी आहूता वर्तते। मध्याह्न-विश्रामवेलायां मुग्धायास्तस्या वचनावलीः श्रुत्वा परमं

मोदं मदं च लभे। सापि अद्यत्वे काव्यनिर्माणे अतीव चतुरा इव लक्ष्यते। अद्य तस्याः काव्याभ्यासे नृत्याभासे च मया परीक्षा निर्धारितास्ति।

(ततः प्रविशति सखीसहिता लवङ्गी।)

लवंगी : (प्रविश्य) नमस्करोमि अत्रभवन्तौ।

सम्राज्ञी : अये ! लवंगी संप्राप्ता ?

शाहजहानः : लवंगि, तवैव चर्चा प्रवर्तते स्म ! (लवङ्गी स्तब्धतां नाटयति) अस्माभि; श्रुतं यत्त्वमद्यत्वे अतीव पटुः संजाता ? (लवङ्गी विवर्णतां नाटयति) काव्याभ्यासे नृत्याभ्यासे च। (लवङ्गी समाश्वस्ततां नाटयति) श्रावय तु किंचित् पद्यम्। (लवंगी संकोचं नाटयति)

सम्राज्ञी : ननु श्रावय ? किमर्थं लज्जसे ? त्वयि महाराजस्य अतीव वात्सल्यम् !

लवंगी : पद्यद्वयमद्यैव लिखितम्। कीदृशमिति तु भवन्त एव जानन्तु—

पंकज ! तव लघुजातिः, सन्ति गुणास्ते च मोदाद्याः।
कज्जल ! तव खलु जन्म, दीपात्तस्मिन् कलंकस्त्वम्॥
लोकेऽखिलवस्तूनां गुणाः क्रियाश्चैव पूज्याः स्युः।
नो जातिर्न च नाम कज्जलपंकेरुहाणामिव॥

सखी : (लवङ्गीं प्रति) अनया नीरसया अवकरोपमितया शब्दयोजनया न ते कवित्वं सेत्स्यति। ननु अन्यां काञ्चित् रसभावभरितां कवितां श्रावय। (शाहजहानं प्रति) महाराज ! अनया अद्यत्वे नवनवानि बहूनि रसभाव-भरितानि पद्यानि कण्ठीकृतानि। अहमपि अस्याः संसर्गेण काव्यज्ञा संवृत्तास्मि। कदाचिदावयोः काव्यपाठप्रतिस्पर्द्धा-मायोजयतु देवः।

शाहजहानः : शोभनः प्रस्तावः। सम्राज्ञि, भवती एतां काव्यपाठ-स्पर्धामायोज्यं मां सूचयतु। (लवगीं प्रति) लवङ्गि, वयं तवः काव्यपाठेन प्रभाविता स्मः।

सम्राज्ञी : वस्तुतः लवंगि, त्वं तु कवयित्री जायमाना दृश्यसे ? कः खलु तव काव्यशिक्षकः ?

शाहजहानः : सम्राज्ञि, चलाम्यहम् ! अयं तस्यागमनस्य समयः !

सम्राज्ञी : बाढम् ! संनिहितमेत्र भवतां विश्रामगृहम्। यदि तर्षादिकं बाधेत तर्हि आज्ञापयन्तु।

शाहजहानः : युक्तम् !

(५)

(शाहजहानस्य विश्रामगृहम्)

जगन्नाथः : (प्रविश्य) विजयताम् महाराजः !

शाहजहानः : स्वागतं पण्डितपते ! आस्यताम्। अद्यत्वे किं किं व्यवस्यते ?

जगन्नाथः : सद्य एव मया 'आसफ़विलासो' विरचितः।

शाहजहानः : गद्ये पद्ये वा ?

जगन्नाथः : द्वयेऽपि।

शाहजहानः : शोभनम् ! अन्यत् किं विरच्यते ?

जगन्नाथः : रसगंगाधरनामा साहित्यशास्त्रीयग्रन्थः प्रारिप्सितः। तत्कृते एव बहूनि पद्यानि लिख्यन्ते। स्वतंत्ररूपेणापि कानिचित्पद्यानि प्रणीतानि।

शाहजहानः : अपि श्रावयिष्यति भवान् पद्यमेकम् ?

जगन्नाथः : नूनम्, यदि शुश्रूषवो भवन्तः।

तन्मंजु मन्दहसितं श्वसितानि तानि
सा वै कलंकविधुरा मधुराननश्रीः।

अद्यापि मे हृदयमुन्मदयन्ति हन्त
सायन्तनाम्बुजसहोदरलोचनायाः ॥

(सम्राज्ञा: कक्षे सम्राज्ञी : लवंगि, शृणोषि पण्डित-राजस्य कविताम् ? लवंगी : अहं तु श्लोकस्पर्द्धार्थं श्लोकान् चिन्तयामि ।)

शाहजहानः : पण्डितराज, केयं सायन्तनाम्बुजसहोदरलोचना ?
(सम्राज्ञा: कक्षे : 'पातिसाहस्य प्रश्नमतिसावधानतया शृणोषि लवंगि' - इति सम्राज्ञा: ध्वनि:)

जगन्नाथः : कवे: सृष्टौ कल्पनासाम्राज्यम्-यद्बलेन स एवंविधां सायन्तनाम्बुजसहोदरलोचनां नयनपथमानयति ।

शाहजहानः : (स्वगतम्) गोपनचतुरोऽस्ति पण्डितराजः। (प्रकाशम्) अन्यामपि कवितां श्रावयतु ।

जगन्नाथः :

गुरुजनभयमद्विलोकनान्तः समुदयदाकुलभावमावहन्त्याः।
दरदलदरविन्दसुन्दरं हा हरिणदृशो नयनं न विस्मरामि॥

शाहजहानः: उत्तमम् ! प्रतीयते कोऽपि वास्तविकोदन्तो निबद्धोऽस्मिन् पद्ये (स्वगतं) सम्राज्ञी सत्यमेव भणति स्म ।
(सम्राज्ञा: कक्षे)

(**सम्राज्ञी :** लवंगि कीदृशं पद्यम् ?

लवंगी : मया तु किमपि न श्रुतम्'ः ।

सम्राज्ञी : मिथ्या वदसि ?

लवंगीः : युक्तम् ।)

शाहजहानः : पण्डितराज ! भवतां कवितामाकर्ण्य तु शुश्रूषा वर्द्धत एव नेयं शाम्यति। अन्यामपि कांचित् कवितां श्रावयतु।

जगन्नाथः :

इत एव निजालयं गताया वनितायाा गुरुभिः समावृतायाः।
परिवर्तितकन्धरं नतभ्रु स्मयमानं वदनाम्बुजं स्मरामि॥

शाहजहानः : पण्डितराज, क्वेदं लोकावेक्षणं क्रियते यस्य प्रतिफलनं काव्ये सञ्जायते ?

जगन्नाथः : महाराजेनाहं चतुरंगक्रीडार्थमाहूतोऽथवा पद्यश्रावणार्थम् ? मन्ये, हीयते क्रीडावेला। चतुररंगक्रीडी प्रारभ्यताम्।

शाहजहानः : ओः, वरम् (स्वगतं) शीलवानयं पण्डितराजो यो हि प्रियावृत्तान्तं स्पष्टतो नैव भणति (प्रकाशं) सज्जीभवतु भवान् चतुरंगक्रीडार्थम्। भवत एव प्रथमा गतिः।

जगन्नाथः : अयं पदातिः।

शाहजहानः : अयमश्वः।

जगन्नाथः : पुनरपि पदातिः।

शाहजहानः : अस्माकमपि पदातिः।

जगन्नाथः : अयमुष्ट्रः।

शाहजहानः : अयमश्वः।

जगन्नाथः : इदमाक्रमणम्।

शाहजहानः : ओः, इयं सुरक्षा।

जगन्नाथः : (सगुञ्जनं) पुनः पदातिः।

शाहजहानः : किं सगुञ्जनं मनस्यैव गीयते ? प्रकाशं श्रावयतु। चतुरंगक्रीडायाः कवितायाश्च रसः युगपदेव आस्वाद्येत।

जगन्नाथः : (स्वगतं) मत्कवितायामासक्तः पातिसाहोऽधुना चतुरंगगतिं नावधारयिष्यति, (प्रकाशम्) श्रावयामि।

तदवधि कुशली पुराणशास्त्र-
स्मृतिशतचारुविचारजो विवेकः।
यदवधि न पदं दधाति चित्ते
हरिणकिशोरदृशो दृशोर्विलासः॥

(सम्राज्ञाः कक्षे-सम्राज्ञीः ननु शृणोसि लवंगि ?

लवंगी : शृणोमि)

शाहजहानः : उत्तमम् (स्वगतम्) यथार्था अभिव्यक्तिः। (प्रकाशं) पण्डितराज, पुरस्काररूपेण किं दीयेत ?

जगन्नाथः : भवत्कृता प्रशंसैव पुरस्कारः। न हि वयं कवयो धन-वैभवमेव परमं पुरस्कारं मन्यामहे। अस्तु, भवता तु गतिरेव विस्मृता।

शाहजहानः : ओः! अधुना तु भवान् जेतव्यो विद्यते। अयं पदातिः।

जगन्नाथः : तर्हि अत्रभवन्तो मां जेतुकामाः स्वगतिकौशलेन। (स्वगतं) मां तु केवल सैव जेतुं शक्नोति यस्या प्रत्येक-मिंगितं मनसि स्मारं स्मारं मदाविष्ट इव भवामि। न जाने कदा सा नवनीतकोमलांगी—

शाहजहानः : किं चिन्तयति पण्डितराजः ? गतिं प्रत्युत्तरयतु।

जगन्नाथः : गतेरुत्तरमेव चिन्तयामि। अयमुष्ट्रः।

शाहजहानः : अधुना भवान् पराजितो भविष्यति।

जगन्नाथः : यदा भविष्यामि, तदा भविष्यामि। गृह्यताम्। इदमाक्रमणम्।

शाहजहानः : ओः विषमा गतिः प्रदर्शिता भवता। तर्षाकुलोऽहम्। पेयं वाञ्छामि। कः कोत्र भोः ? पेयम्।

(सम्राज्ञाः कक्षे सम्राज्ञोः-लवंगि, महाराजस्तर्षाकुलः संवृत्तः। दासी मया क्वचित्प्रहिता वर्तते। गच्छ, त्वमेव पेयं नय। ननु कथं लज्जसे ? गच्छ, तत्रैव तव पण्डितराजोऽपि। त्वरित गच्छ।

लवंगीः-यथाज्ञापयति सम्राज्ञी।)

जगन्नाथः : एकस्यामेव गतौ तर्षाकुलः संवृत्तः महाराजः ?

शाहजहानः : गृह्यतामुत्तरम्, इदमाक्रमणम्—

लवंगी : (प्रविश्य) महाराज इदं पेयम् ।

जगन्नाथः : (स्वगतम्) अधुना परास्तोऽसि । विषमा गतिः । न क्वचिदपि सुरक्षा । न क्वापि शरणम् ।

शाहजहानः : लवंगि, त्वमेव कथं पेयं नीत्वा उपस्थिता ?

लवंगी : महाराज, पयवाहिनी दासी सम्राज्ञ्या क्वचित् कार्यार्थं नियोजिता । तयैवाहमत्रभवद्भ्यः पेयं दातुं प्रेषिता ।

शाहजहानः : बाढम् देहि पेयम् । पण्डितराज ! गतिं प्रतिकरोतु । तूष्णीं कथं तिष्ठति भवान् ?

जगन्नाथः : अधुना त्वहं परास्तोऽस्मि । विवशोऽस्मि । विषमा गतिः प्रदर्शिता भवता । को नामास्या विषमाया गतेः पुरस्तात्परास्तो न स्यात् ? आत्मसमर्पणं करोमि ।

शाहजहानः : भवतु, भवानपि पानार्थी ?

जगन्नाथः : (स्वगतं) पानं तु करोम्येव-सौन्दर्यस्य न तु पेयस्य । (प्रकाशं) कथं पंक्तिभेदं कुर्याम् ? लवंगि, दीयताम् पेयम् ।

लवंगी : : (स्वगतं) अये पण्डितराजं वीक्ष्य शरीरे मनसि च अन्यदिव भवति । नापि स्थातुं नापि च गन्तुं मे शक्तिः ।

शाहजहानः : लवंगि, ननु पण्डितराजाय पेयं देहि—

लवंगी : : प्रस्तुतं पेयम् (पात्रकम्पनध्वनिः) ।

शाहजहानः : लवंगि, पण्डितराजाय पेयदानकाले तव हस्ते कम्पः कथं सञ्जायते ?

लवंगी : (स्वगतं) पातिसाहेन निगृहीतास्मि । (प्रकाशं) देव एकस्मिन् हस्ते पात्रं द्वितीये च चषकं निश्चलतया ग्रहीतुं न शक्नोमि । अत एव कम्पः ।

शाहजहानः : युक्तम् ! पण्डितराज ! पेयं कीदृशम् ?

जगन्नाथः : शीतलमपि, तर्षकरमपि । अतीव स्वादु ! (मुखशब्दः)

शाहजहानः : पण्डितराज, चतुरंगक्रीडायां पराजितो भवान् । अधुना दण्डनीयः स्यात् ।

जगन्नाथः : कथमिव ?

लवंगी : (स्वगतं) न जाने कं दण्डं दास्यति देवः पण्डितराजाय ।

शाहजहानः : पण्डितराज, कवितां श्रावयतु दण्डरूपेण ।

जगन्नाथः : (स्वगतं) इदं तु मामकीनमेव मनोगतं पातिसाहेनोद्गीर्णम् । (प्रकाशं) यथा देव आज्ञापयति । एष कवितां प्रस्तौमि । परं प्रथममहमन्यदपि पेयमभिलषामि ।

शाहजहानः : लवंगि, पण्डितराजाय अन्यदपि पेयमानय ।

लवंगी : यथाज्ञापयति महाराजः ।

जगन्नाथः : **इयं सुस्तनी मस्तकन्यस्तकुम्भा**
कुसुम्भारुणं चारुवासो दधाना ।
समस्तस्य लोकस्य चेतःप्रवृत्ति
गृहीत्वा घटे न्यस्य यातीव भाति ॥

लवंगी : (स्वगतं) कवितामाकर्ण्य मनश्चरणौ च पश्चादेव प्रयान्ति नत्वग्रे ।

शाहजहानः : सूक्तम् । पण्डितराज, वयं भवतः कविताकौशल निशम्य तुष्टाः यथाभिलषितं ते दास्यामः । ब्रूहि मनोगतम्

लवंगी : (प्रविश्य) इदं पेयम् ।

जगन्नाथः : (स्वगतं) कथं याचे ?

शाहजहानः : ननु ब्रूहि निःशङ्कम् ?

जगन्नाथः : (स्वगतं) अयमेवावसरो गुरुजनपराधीनां लवंगीं प्राप्तुम् (प्रकाशं) देव, यदपि याचे तद् दास्यसि ?

शाहजहानः : अवश्यम् । 'ननु दिल्लीश्वरोऽहम् ।

जगन्नाथः : तर्हि श्रूयताम्—

न याचे गजालिं न वा वाजिराजिं
न वित्तेषु चित्तं मदीयं कदाचित्।
इयं सुस्तनो हस्तविन्यस्तकुम्भा
लवङ्गी कुरङ्गीदृगङ्गीकरोतु ।।
इयं सुस्तनी मस्तकन्यस्तहस्ता
कुसुम्भारुणं चारु वासो वसाना।
अरंभासमानापि रम्भासमाना
लवङ्गी कुरङ्गीदृगङ्गीकरोतु ।।

लवंगी : (स्वगतं) अये कीदृशं शृङ्गारमुद्गिरति पातिसाहसमक्षं पण्डितराजः। न जाने देवः किं भणति? यदि स्वीकरोति तदा जीवनम्, यदि निषिद्ध्यति तर्हि मरणम्।

शाहजहानः : पण्डितराज, भवान् पण्डितः, लवंगी च यवन-पालिता। कथं भवान् तां कामयते ?

जगन्नाथः : (स्वगतं) इयं नवनीतकोमलांगी यदि मया प्राप्यते तर्हि स्वर्गराज्यमपि तिरस्करोमि। (प्रकाशं) सौन्दर्यं प्रेम च जातिविशेषं नाद्रियेते। यवनी वा स्यात् लवंगी अन्य-जातीया वा स्यात्-मन्मते तु सा केवलं लवंगी, निरुपाधि-र्लवंगी। अधुना किं गोपयामि? यदा प्रभृति इयं मया-वलोकिता तदाप्रभृत्यंवेयं मामकीनकवितायाः प्रेरणा सञ्जाता। अधुनेयं मम पत्नी भवतु इति कामये।

शाहजहानः : पण्डितराज, आश्चर्यकरी भवतो याचना। परं किमियमेकनिष्ठा रतिस्तु नास्ति? लवंग्या अभिमतमपि तु ज्ञेयम्। (लवंगीं प्रति) लवंगि, पण्डितराजस्य याचना तवाभिमता न वा? अस्माभिरियं याचना पूरणीया?

लवंगी : यदा देवेन प्रथमं वचो दत्तं तदा तु याचना पूर्णा एव।

शाहजहानः : (विहस्य) भवन्तावुभावपि चतुरौ। प्रेमपरीक्षायां

समुत्तीर्णो । पण्डितराज, भवते लवंगी प्रदत्ता । इयमस्मत्पालिता कन्या सुखिनी स्यात्। शुभं कामये भवतोः। लवंगि, धन्यासि पण्डितेन्द्रकल्पद्रुमं प्राप्य।

जगन्नाथः : **दिल्लीश्वरो वा जगदीश्वरो वा**
मनोरथं पूरयितुं समर्थः ।
अन्यैर्नृपालैः परिदीयमानं
शाकाय वा स्याल्लवणाय वा स्यात् !

नेपथ्ये : पण्डितानां ध्वनयः-'अब्रह्मण्यम् अब्रह्मण्यम् । तैलंगान्वये जगन्नाथेन कलंकायितम् यवनीपरिणयेन' 'क्व ब्राह्मणवंशः क्व च यवनीस्पर्शः ? किमु तस्य अन्यत्र विवाहो नैव भवति स्म ?''ननु राजसम्मानेनोपचितः सन् विमूढो जातः, 'पण्डितराजोपाधिलाभाभिमानिनो जगन्नाथस्य समाजात् वहिष्कारः क्रियताम् ।'

अपरो ध्वनि : अये पण्डितराजसदृशा मानवाः युष्माकं वचांसि नापेक्षन्ते । ते तु सार्वभौमाः युष्माकं वचांसि उपेक्षन्ते। यदि साहसश्चेत्तर्हि तत्समक्षं गत्वा तस्य बहिष्कारः कुरुत ।

प्रथमो ध्वनिः : गम्यते तत्सकाशमेव । तस्यैव द्वारि तस्य बहिष्कारं करिष्यते ।

(६ पण्डितराजगृहम्)

जगन्नाथः : लवंगि, वस्तुतः अद्य इदं गृहं गृहं संवृत्तम् यत्र त्वं गृहिणीरूपेण मयासादिता—

हरिणीप्रेक्षणा यत्र गृहिणी न विलोक्यते ।
सेवितं सर्वसम्पद्भिरपि तद् भवनं वनम् ।

लवंगी : पातिसाहेनापि आवयोः कामना पूरिता। अहं तु बिभेमि स्म। यदाप्रभृति मया भवतः कविता सखीमुखेन श्रुता

यदा चैकवारं भवान् विलोकितः संभाषितश्च तदाप्रभृत्येव अहं तु अवसरम् अन्वीक्षमाणा आसम् भवत्सान्निध्यं प्राप्तुम् । अधुना तु भगवता मम मनोरथः पूर्णः ।

जगन्नाथः : अहमपि त्वां वीक्ष्य प्रतिपलम् अनुचिन्तयामि स्म

आगतः पतिरितीरितं जनैः
शृण्वती चकितमेत्य देहलीम् ।
कौमुदीव शिशिरीकरिष्यते
लोचने मम कदा मृगेक्षणा ।।

लवंगी : अधुना नु भवच्चिन्तितं सर्वमपि नित्यमेव व्यवहार-परिणतिमेष्यते ।

जगन्नाथः : लवंगि, वस्तुतोऽहं धन्योऽस्मि यस्य त्वं गृहिणी ।

सानुकम्पाः सानुरगाश्चतुराः शीतशीतलाः ।
हरन्ति हृदयं हन्त कान्तायाः स्वान्तवृत्तयः ।।
लभ्यते पुण्यैर्गृहिणी मनोज्ञा
तया सुपुत्राः परितः पवित्राः ।

लवंगी : अलम् इदानीमेव अनया कल्पनया ।

(द्वारि खटखटायते । असूयकपण्डितध्वनिः - पण्डितराज, द्वारमुद्घाटय । वयमुच्चकुलोद्भवाः पण्डिताः यवन्या साकं तव विवाहं नानुमन्यामहे । तव ब्राह्मणसमाजतो बहिष्कारः क्रियते ।)

जगन्नाथः : लवंगि, दुर्भाग्यं भारतस्य यत्रैवंविधा प्रवृत्तयः वैर-भावं परिपोषयन्ति । अस्तु, द्वारमुघाट्य एतेभ्यः पण्डित-म्मन्येभ्यः सम्यगुत्तरं ददामि ।

(द्वारमुद्घाट्य) आगम्यताम् पण्डिताः । स्वागतम् !

असूयकपण्डितः : न वयं यवनीस्पर्शपांसुलस्य भवतो गृहं प्रविशामः । भवान् हि ब्राह्मणसमाजतो बहिष्कृतः इति निर्णयसूचनार्थं वयमत्र समुपस्थिताः । पण्डितराज, किमु

स्वजातौ भवान् पत्नीं प्राप्तुमसमर्थ आसीत् ? यदेवं यवनीं गृहीतवानस्ति ।

जगन्नाथः : 'कन्यारत्नं दुष्कुलादपि ग्राह्यम्' इति भवतामेव पण्डितानामुद्घोषः, 'उदारचरितानां तु वसुधैव कुटुम्बकम्'-इत्यपि भवतामेव विचारः । एवं स्थिते मया कतमोऽनर्थः सम्पादितः ? लवंगी रूपयौवनसम्पन्ना, सुशीला, पतिप्रेम-परायणा, प्रिया, प्रियवादिनी च । अन्यत् किं काम्यते पत्न्याम् ? पुनश्च भवन्मते वंशगतिस्तु पत्युः कुलानुसारेण न तु पत्न्याः ।

असूयकपण्डितः : वयं सिद्धान्तवादं न शृणुमः । यदस्माभिर्निर्णीतं तत्कथितम् । (सहागतान् पण्डितान् प्रति) चलन्तु सर्वे । समाजवहिष्कृतः -सन् पण्डितराजः पश्चात्तापवह्नौ ज्वलतु ।

सर्वे : ज्वलतु

जगन्नाथः : पण्डिताः, मदीयपाण्डित्येन खिन्ना भवन्तः अमुमवसरं प्राप्य मदीयं शोषणं कर्तुमुद्यताः । वाढम्, कुर्वन्तु भवन्तो मम बहिष्कारम् । अहं भवतः उपेक्षे । यदि शक्तिरस्ति तर्हि पण्डित्यबलेन मां पण्डितराजितो वहिष्कुर्वन्तु ।

पण्डितः : एवंविधपतितपण्डितेन साकं को नाम शास्त्रार्थं कुर्यात् ? धिक् पाण्डितराजम् ! गच्छामः (इति निष्क्रान्ता, पण्डिताः)

लवंगी नाथ ! मत्कृते भवता एवंविधस्तिरस्कारः सोढः ! मया मन्द-भाग्यया भवान् कियान् कलंकितः ?

जगन्नाथः : अयि मूढे । त्वमपि एवं भणसि ? किमेवं चिन्ता-कुलासि ? जीवनं सहर्षं यापय —

अयि मन्दस्मितमधुरं वदनं तन्वंगि यदि मनाक् कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हन्त साम्राज्यम् ।

लवंगी : (सोच्छ्वासम्, सहासम्) सौभाग्यं मे यत् पण्डितराजस्य कविताया विषयोऽहम् सञ्जाता ।

जगन्नाथः : लवंगि, विश्रामगृहे चलतु । तत्रैव त्वामवलम्ब्य विरचिता अन्या अपि कविताः श्रावयिष्यामि ।

लवंगी : चलन्तु ।

जगन्नाथः : तिमिरशारदचन्दिरचन्द्रिका-
कमलविद्रुमचम्पककोरकाः ।
यदि मिलन्ति कदापि तदाननं
खलु तया कलया तुलयामहे ॥

(७ पण्डितराजस्य अध्ययनकक्षः)

लवंगी : अये ध्यानमग्न तपस्विन् । इदं पेयम्, गृह्यताम् ।

जगन्नाथः : अये लवंगि ! त्वम् ? देहि पेयम् ! (पीत्वा) उत्तमम् । ननु त्वं तु सौन्दर्यपानस्य, पेयपानस्य युगपदेव कारणम् ।

लवंगी : भवतु, चिराल्लेखनीसमासक्तो भवान् । मन्ये, लेखनी तु मम सपत्नी संवृत्ता । किं लिख्यते ? किं च लिखितम् ?

जगन्नाथः : लवंगि, शोभनः प्रश्नः कृतः । इमास्तिष्ठन्ति मामकीना गंगालहरीप्रभृतिपञ्चलहर्यः । इदं जगदाभरणम् । लवंगि तव दर्शनात्पूर्वमेव प्रणीता एते ग्रन्थाः । शाहजहानराज भवने स्थित्वा अयमासफविलासो विरचितः । कैश्चिद्दिवसैश्च त्वामदिदश्य भामिनीविलासस्य शृङ्गार-विलासं लिखामि । कैश्चिचित्पद्यैस्तु त्वं परिचिता एवासि ।

लवंगी : सत्यं परिचितास्मि । न केवलमहमेव, मम सखी सम्राज्ञी चापि कैश्चित्पद्यै परिचिते आस्ताम् ।

जगन्नाथः : सत्यं भणसि ?

लवंगी : एकं पद्यं ते उभे अपि चारु स्मरतः यद् भवतैकदा मां प्रति श्रावितम्, मया च सखीं प्रति, सख्या च सम्राज्ञीं प्रति। सम्राज्ञा नैकवारं तत् श्रावयितुमहमाज्ञप्ता।

जगन्नाथः : किं तत् ?

लवंगी : नितरां परुषां सरोजमाला
न विचाराणि विचारपेशलानि।
यदि कोमलता तवाङ्गकाना-
मथ का नाम कथापि पल्लवानाम्।

(पण्डितराजः सस्पृहं शृणोति)

पण्डितराजः : अन्यान्यपि पद्यानि त्वद्विषये नित्यं रच्यन्ते।

लवंगी : किं किं लिखितम् ?

जगन्नाथः : श्रोतुकामासि ?

लवंगी : नूनम्।

जगन्नाथः : सायं श्रावयिष्यामि।

लवंगी : अधुनैव श्रोतुमिच्छामि।

जगन्नाथः : सर्वं त्वद्विषये एव लिखितम्। अनन्तरं श्रावयष्यामि।

लवंगी : नैव, अधुनैव श्रावयतु।

जगन्नाथः : भवतु, यदि दृढस्तवाग्रहस्तर्हि शृणु।

दरानमत्कन्धरबन्धमीष-
न्निमीलितस्निग्धविलोचनाब्जम्।
अनल्पनिःश्वासभरालसाङ्गं
स्मरामि सङ्गं चिरमङ्गनायाः॥

लवंगी : अलमलमनेन कीर्तनेन ? अयं कतमो ग्रन्थो लिख्यत ?

जगन्नाथः : अयं, लवंगि, रसगंगाधरः। अद्यत्वे अस्यापि निर्माणे लग्नोऽस्मि।

लवंगी : अस्मिन् किं लिख्यते ?

जगन्नाथः : लवंगि, अयं मे ग्रन्थः काव्यशास्त्रीयः। ये खलु साहित्यं केवलं ललनाखेलनमेव मन्यन्ते तेषां कृते एतदुत्तरम्। अस्मिन् न्यायरीत्या काव्यसिद्धान्ताः विवेच्यन्ते।

लवंगी : शोभनम्। अधुनाहमन्यस्मिन् कक्षे गच्छामि। भवान् यथेच्छं काव्यशास्त्राभ्यासं करोतु। भवन्मार्गे प्रत्यूहरूपेणावस्थातुं न मेऽभिलाषः। यदि काचिदाज्ञा स्यात्तदाकारयितव्यास्मि।

जगन्नाथः : गच्छ, विश्रामं कुरु।

लवंगी : गृहकार्याणि पूरयितव्यानि तिष्ठन्ति। भोजनादिव्यवस्थापि सम्पादनीया। विश्राम एव गृहस्थस्य नाधिकारोऽपि तु गृहव्यवस्थापि तस्याधिकारः।

जगन्नाथः : भवतु, साधय स्वकार्याणि। (लवंगी, गच्छति)

(अध्ययनकक्षात् जगन्नाथस्य ध्वनिः श्रूयते सहैव गृहकार्यव्यापृताया लवंग्या ध्वनिः महानसाच्छ्रूयते)

जगन्नाथ : **निर्माय नूतनमुदाहरणानुरूपं**
काव्यं मयात्र निहितं न परस्य किञ्चित्।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ?

लवंगी : अहो मे सौभाग्यं यस्याः पतिरेवंविधः पण्डितः कविः काव्यमर्मज्ञश्च। यथा काव्यम्, तथैव कण्ठोऽपि।

जगन्नाथ : **मननतरीतीर्णविद्यार्णवो जगन्नाथपण्डित नरेन्द्रः।**
रस गंगाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम्॥

लवंगी : भोजनं सम्पन्नम् । किन्तु कथं पत्युः काव्यशास्त्रसाधनायां विघ्नमुपस्थापयेयम् ?

जग० : **रसगंगाधरनामा सन्दर्भोऽयं चिरं जयतु । किञ्च कुलानि कवीनां निसर्गरम्यञ्चि रञ्जयतु ।**

लवंगी : अधुना तु भोजनं दातुं गच्छाम्येव । शरीरमाद्यं खलु धर्मसाधनम् ।

(८ पण्डितराजस्य विश्रामकक्षः)

कपटी पण्डितः : (द्वारि) पण्डिराज ! पण्डितराज !

जगन्नाथः : ननु पश्य लवङ्गि, कोऽस्ति द्वारि !

लवंगी : (गत्वा प्रतिनिवृत्य) कश्चित्पण्डितो भवन्तं द्रष्टुकामोऽस्ति ।

जगन्नाथः : सादरं प्रवेशयैनम् ।

लवंगी : (पण्डिममानीय) एते महानुभावाः समायाताः ।

जगन्नाथ : स्वागतं भवतः । आदिशतु किमर्थमागमनम् ?

पण्डितः : पण्डितराज, अस्माभिरद्य सायं यमुनातीरे एका विचार-गोष्ठी क्रियते यस्यां काव्यलक्षणमधिकृत्य विचारो विहितः स्यात् । अपि नाम अत्रभवांस्तस्यां समुपस्थातुं सुलभः स्यात् ?

जगन्नाथः : ननु आह्लादविषयोऽयं मे । मया सद्य एवेमं विषय-मधिकृत्य किञ्चिद्विचारितमप्यस्ति । 'रमणीयार्थ प्रति-पादकः शब्दः काव्यम्' इति मे काव्यलक्षणम् । विदुषां पुर इदमेव लक्षणं स्थापस्यामि ।

असूयकपण्डितः : (द्वारि खटखटा करोति) लक्ष्मीधर ! लक्ष्मीधर ! अरे किं पण्डितराजस्यान्तःपुरे तिष्ठसि ? बहिरायाहि । किमु शुद्धाशुद्धविवेकस्तव नितरां विलुप्तः ?

जगन्नाथः : पण्डितवर किमिदम् ? अयं तु स एव कुटिलाचार्यो

द्वारि भवन्तमाकारयति। भवान् किं तस्य सुहृद्वरः ?

कपटी पण्डितः : स हि अस्माकमुपदेष्टा। तस्याज्ञापालनेनैव अस्माकं योगक्षेमं सिद्ध्यति।

असूयकपण्डितः : (द्वारि) अरे! लक्ष्मीधर! कुत्र विलीनः ? कथं नायासि ?

कपटी पण्डितः : मया चल्यते। भवान् यथाकालं गोष्ठ्यामायातु। (बहिरागत्य) कुटिलाचार्य! मया भवत्सन्दिष्टं पण्डितराजाय निवेदितम्। स यथाकालं यथास्थानं विचारगोष्ठ्यां समुपस्थास्यति।

असूयकः : त्वया दूरत एव कथं न सूचितः पण्डितराजः ? किमु तत्र जलमपि गृहीत्वागतोऽसि ?

कपटी पण्डितः : जलादिग्रहणस्य भवता अवकाश एव कदा दत्तः? अनुपदमेव माम् आकारयितुं प्रवृत्तः।

असूयक : अलमधुनाधरोत्तरेण। इदानीं पश्य मे योगमैश्वरम्! पश्यामि, कैर्विद्वद्भिस्साकं काव्यलक्षणं विमृशति पण्डितराजः ? (कुटिलं हसति)

(९ यमुनातीरः)

पण्डितराजः : (स्वगतं) अत्र तु कोऽपि नास्ति ? इदमेव स्थानं विचारगोष्ठ्यर्थं निर्दिष्टमासोत्तेन पण्डितेन! (एकं पुरुषं विलोक्य) अयमेको जनो दृश्यते। अमुमेव पृच्छामि। (प्रकाशं) किं भोः भद्रपुरुष। किमु अद्य अत्र काचिद् विचारगोष्ठी संयोज्यते ?

पुरुषः : नाहं जानामि।

पण्डितराजः : (इतस्ततः परिक्रम्य) किं करोमि? नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ?

असूयकः : (आगच्छन्) पण्डितराज! किमन्विष्यतेऽत्र यमुनातीरे? किमु विचारगोष्ठ्यामागतोऽसि काव्यलक्षणविमर्शार्थम्!

इदानीं मत्कृपया त्वयतदर्थं कष्टं नैव सोढव्यं भविष्यति ! गच्छ ! गृहे गत्वा लवङ्ग्या साकं काव्यलक्षणं विचारय। कोऽपि विद्वान् तव च्छायामपि स्प्रष्टुं नानुमतो भविष्यति। (सव्यङ्ग्यं) काव्यलक्षणं विचारयितुं यमुनातीरे समायातो वराकः। (इति गच्छति)

जगन्नाथः : हुं, इयं ते अकारणाविष्कृतवैरदारुणस्य लीला ?

रे खल तव खलु चरितं
विदुषां मध्ये विविच्य वक्ष्यामि ।
अथवालं पापात्मन्
कृतया कथयापि ते हतया ।।

(१० पण्डितराजस्य विश्रामगृहम्। रुग्णा लवंगी पण्डितराजश्च)

जगन्नाथः : लवंगी, कीदृशी अवस्था ?

लवंगी : नाथ, दाहज्वरो महान् ।

जगन्नाथः : औषधं गृहीतम् ?

लवंगी : गृहतीम्। 'चित्रमीमांसाखण्डनं' सम्पूर्णम् ?

जगन्नाथः : सम्पूर्णम् ।

लवंगी : महान् खेदो यदहं भवतां शास्त्रसाधनायां सहयोगं न विदधामि। किं कुर्याम् ? रोगग्रस्तास्मि। ननु भोजनादेर्व्यवस्था तु रुचिरा भवताम् ?

जगन्नाथः : सर्वमपि व्यवस्थितं लवंगि, यदि त्वं स्वस्थतां भजसि ?

लवंगी : ह्यः पंडितानां समूहो द्वारे समागत्य किं कथयति स्म ?

जगन्नाथः : न किमपि, एवमेव प्रलपति स्म ।

लवंगी : किं गोपनेन ? मया श्रुतं सर्वमपि। मत्कृते भवानेवंविधं

तिरस्कारं सहते—इति ज्ञात्वा दुःखदावानलेन दह्यते मे हृदयम्। अहं तु परमेशं प्रार्थये यन्मां सः शीघ्रमेव संसारादुत्थापयेत्। मयि उपरतायां तु भवान् समाजे प्रतिष्ठां लप्स्यते।

जगन्नाथः : कमलिनि, अनभिज्ञैः बकैरवहेलिता सती कथं चेतो मलिनीकरोषि? एतेषां कूपमण्डूकानां क्षुद्रविचारैर्यदि विमनायमाना भवसि तर्हि खेदः। नन्वहं पण्डितराजस्तव सहजीवी। स्वस्था भव। औषधं गृहाण।

सखी : सखि, इदमौषधम्! (औषधं ददाति)

लवंगी : औषधं तु गृह्णामि। किन्तु वचनं मे दीयताम्।

जगन्नाथः : कीदृशं वचनम्?

लवंगी : मयि उपरतायां स्वजातीयया कयाचित् साकं भवान् विवाहं करिष्यतीति।

जगन्नाथ : अयि प्रमत्ते! किं प्रलपसि? नैवं भवितुं शक्यते।

लवंगी : अन्यदपि कामये।

जगन्नाथः : किम् तत्?

लवंगी : मय्युपरतायां मम स्मृत्या न खिद्यसे इति।

जगन्नाथः : अये, किमेवमसम्बद्धं प्रलपसि? किमप्यन्यद्विचारय।

लवंगी : शाहजहानसम्राजः पार्श्वे गमनस्यानुमतिर्लब्धा भवता न वा?

जगन्नाथः : किं भणामि लवंगि, औरंगजेबेन यदा प्रभृति सम्राट् बन्दीकृतस्तदाप्रभृत्येव सम्राजा साकं संवादो नाभूत्। आश्रयदाता वन्दी, आश्रयभूता च त्वं रुग्णा! कीदृशी विडम्बना?

लवंगी : श्रूयते सम्राडपि रुग्णः?

जगन्नाथः : सर्वेऽपि मम परिचिताः खिन्ना रुग्णा वा। एकोऽहमेव मन्दभाग्योऽस्मि यो रुग्णो नास्मि शरीरेण, किन्तु लवंगि, मनसाहमपि रुग्णः। कदाचित्तु अहमेकान्ते रोदिमि इमां दुरवस्थां निरीक्ष्य। अधुना कालः परिवर्तितः !

लवंगी : सर्वमक्षिणी निमील्य सोढव्यम्।

प्रशंसकपण्डितः : (प्रविश्य) वज्रपातः पण्डितराज ! वज्रपातः ! सम्राट् शाहजहानोः मृतः। यादृशी उदारता तेन प्रदर्शिता अधुना सा असम्भवा। अन्तिमदर्शनाय वहवो जनाः गच्छन्ति।

जगन्नाथः : हा कष्टम् ! मदीयः आश्रयदाता, मदीयं मित्रं, मदीयो हितैषी शाहजहानः दिवंगतः ? मृत्यो ! त्वं कमपि न क्षमसे ? लवंगि, त्वं विश्रामं कुरु। अहं दिवंगतस्य सम्राजोऽन्तिमं दर्शनं विधाय आयामि।

लवंगी : ननु अहमपि चलामि।

जगन्नाथः : मुग्धे त्वं दुर्बला, रुग्णा च। अत्रैव तिष्ठ।

लवंगी : नैवम्। सम्राट् मयि अत्यन्तं वात्सल्यं निदधाति स्म। अहं तस्यान्तिमं दर्शनं कर्तुम् अभिलषामि।

जगन्नाथः : यथा त्वमभिलषसि। एहि, चलावः।

सखी : अहमपि सहैव चलामि। रुग्णाया भवत्याः साहाय्यमाचरिष्यामि।

लवंगी : चलतु। (सर्वे गमनं रूपयन्ति)

(११ मार्गे)

जगन्नाथः : अपारो जनसमूहः। औरंगजेबेन अतीव उदारता प्रदर्शिता यत् शाहजहानस्यान्तिमदर्शनकारकाः न बन्दीकृताः।

लवंगी : शनैर्वदन्तु। कश्चित् गुप्तचरः शृणुयात्। व्यर्थमेव कष्टं स्यात्। अयं पुरतः स एव पण्डितः समूहेन सहितः समायाति (इति शंकिता जायते। सपण्डितसमूहोऽसूयको मिलति)।

असूयकपण्डितः : भणतु पण्डितराजः! कीदृशं स्वास्थ्यं श्रीमतः? कुत्र गच्छति भवान्? ननु अद्य तु लवंगी अपि सहैव। सह नाववतु सह नौ भुनक्तु! पण्डितानां राजन्। शोभतेतराम् अनया साकम् भवान्। धन्योऽसि।

जगन्नाथः : अरे शशकाः, कथं मृगेन्द्रस्याग्रे कूर्दनमुत्फालनं कुरुथ? मानवतामङ्गीकृत्य किञ्चित् ब्रूत।

पण्डितः : मृगेन्द्रस्याग्रे मानवता? मृगेन्द्रस्तु नरभक्षी। अत एव तस्याखेटः क्रियते नरैः सकौशलम्। पण्डितराज! अधुना तु भवतामाश्रयदाता पण्डितराजपदवीदाता च शाहजहानोऽपि दिवं गतः। अधुना कुत्र गमिष्यन्ति अत्रभवन्तः?

जगन्नाथः : (व्यंग्येन) भवच्चरणशरणं ग्रहीष्यामि, असूयाशिक्षां च ग्रहीष्यामि! पण्डिताः, विद्वान् सर्वत्र पूज्यते। ननु दुर्भाग्यं मे यत् शाहजहानः मृतः, किन्तु नाहं निराश्रितः। उदयपुराधीश्वरः प्राणनारायणो बहुधा मां प्रार्थयते स्वसभायामुपस्थातुम्।

पण्डितः : (सव्यंग्यम्) अहह! ननु पण्डितनरेन्द्र! तस्य क्षत्रियस्य सभायां राजकविरूपेण भवान् स्थास्यति; अनया लवंग्या सह। लवंगी तु तत्र व्याधिरस्ति व्याधिः। अधुना तु पण्डितराज! मालां गृहाण, गंगातटे च स्वगंगालहरीं पठ।

लवंगी : (मूर्च्छिता) नाथ मया साकं सर्वत्रैव भवान् अवमानं लभते। केयं मम मन्दभाग्यता?

पण्डितः : ननु अभिनयेऽपि कुशला लवंगी ?

जगन्नाथः : अरे मावनरूपधारिणो दानवाः । दूरीभवन्तु अन्यथा मत्तो दुष्टः कोऽपि न स्यात् ।

पण्डितः : त्वत्तः दुष्टोऽस्त्येव कः, यो हि यवनीपाशबद्धः सञ्जातः।

जगन्नाथः : अलं बहुजल्पितेन । अयमहं युष्माकं चिकित्सां करोमि पशुबलेन । (दण्डं गृहीत्वा) इदानीं कुत्र धावथ ? ('पण्डितराज ! पूर्वं तु लवंग्याश्चिकित्सां कुरु' इति ध्वनिं कुर्वन्तः पण्डिताः पलायिताः)

लवंगी : (नेत्रे उन्मील्य) नाथ !

जगन्नाथः : लवंगि, एतेषां प्रलापे उपेक्षाबुद्धिं कुरु। अकारणाविष्कृतवैरदारुणा एते ।

लवंगी : नाथ कष्टं मे । पण्डितानां व्यङ्ग्यवचांसि श्रोतुमसमर्था इवास्मि ।

(नेपथ्ये-लूनं मत्तमतंगजैः कियदपि च्छिन्नं तुषारार्दितैः)

लवंगी : नाथ ! मत्कृते भवता बहु कष्टं सोढम् !

(नेपथ्ये-शिष्टं ग्रीष्मजभानुतीक्ष्णकिरणैः भस्मीकृतं काननम्)

लवंगी : नाथ ! सम्राडपि गतः !

(नेपथ्ये-एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशः)

लवंगी : नाथ क्षन्तव्यास्मि, सुखी स्याः ।

(नेपथ्ये-हा कष्टं ललिता लवंगलतिका दावाग्निना दह्यते)

लवंगी : ह्री (हिक्का । मरणम्)

जगन्नाथः : लवंगि ! लवंगि ! प्रतिवचनं देहि। (रोदनम्) लवंगि,

अशरणं मां हित्वा कुत्र गताऽसि ? कथं न गिरमंगीकुरुषे ? (रोदनम्) अये क्षुद्रविचाराः ! युष्माभिर्मम लवंगी खादिता। विधे ! एकतो मम जीवनकाननस्य शान्तिः शाहजहानमृत्युना भग्ना, अपरतः क्षुद्रविचारैः लोकैः मम जीवनसुखं छिन्नम्, अस्मिन्नपि एषा लवंगी मृत्युदावानलेन कवलिता। (रोदिति)

(नेपथ्ये भैरवरागेण सकरुणं श्लोका पठ्यन्ते गायकेन)

निर्वाणमङ्गलपदं त्वरया विशन्त्या
मुक्ता दयावति दयाऽपि किल त्वयासौ।
यन्मां न भामिनि निभालयसि प्रभात-
नीलारविन्दमदभङ्गिमदैः कटाक्षैः॥

धृत्वा पदस्खलनभीतिवशात् करं मे
या रूढवत्यसि शिलाशकलं विवाहे।
सा मां विहाय कथमद्य विलासिनि द्याम्
आरोहसीति हृदयं शतधा प्रयाति॥

दैवे पराग्वदनशालिनि हन्त जाते
याते च सम्प्रति दिवं प्रति बन्धुरत्ने।
कस्मै मनः कथयितासि निजामवस्थां
कः शीतलैः शमयिता वचनैस्तवाधिम्॥

सर्वेऽपि विस्मृतिपथं विषयाः प्रयाताः
विद्यापि खेदकलिता विमुखीबभूव।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव॥

(१२ वाराणसी गङ्गातटः)

जगन्नाथः : (स्वगतम्) चिरात् दृष्टा भगवतो भूतभावनस्य नगरी वाराणसी ! इहैव मया कदाचित् शास्त्राण्याकलितानि, इहैव सर्वेऽपि नित्यविधयः संसेविता। निःश्वस्य परमद्य अत्रापि न शान्तिं लभे ! हृदयाधिदेवते लवङ्गि ! ननु पश्यसि स्ववल्लभस्य दशाम् ?

बटुः : (प्रविश्य) भगवन् ! प्रणमामि। किमु अहं पण्डितराज-जगन्नाथमहाभागानां दर्शनं करोमि ?

जगन्नाथः : पण्डिराजस्तु यदासीत् तदासीत्। अधुना तु अनाथो जगन्नाथ एव। को भवान्।

बटुः : अहं पिपठिषुरस्मि। मया भवल्लिखिताः रसगङ्गाधर-मनोरमाकुचमर्दन-शब्दकौस्तुभ चित्रमीमांसाखण्डनादयो ग्रन्थाः श्रुताः। तद्विषये विशेषतो ज्ञानमर्जयितुमिच्छामि मया श्रुतमासीत् यद्भवन्तः गंगातटमधिवसन्ति।

जगन्नाथः : सौम्य ! लप्स्यसे ज्ञानम्। किन्तु किं त्वं जानासि यदहं पण्डितैर्बहिष्कृतोऽस्मि। अपरंच उत्तरीया विद्वांसो दाक्षिणत्यं मामवहेलनया पश्यन्ति। त्वं चोत्तरीयोऽसि त्वमपि विद्याग्रहणात्पूर्वमेवावधारय यद्देवम्भूतस्य मम सकाशे स्थितिरुचिता न वा ?

बटु : अहं तु ज्ञानार्थी अस्मि। ज्ञानस्य सम्मुखे जातिव्यक्ति-वर्णोत्तरदक्षिणप्रभृतीनि तत्त्वानि न किमपि महत्त्वं धारयन्ति। विवाहादिकं व्यक्तिगतमेव तत्त्वम्। यदि समाजं कश्चित् युगलो न बाधते तर्हि तस्य बहिष्कारो व्यर्थ एव। अहं तु भवदीयजीवनेन नितान्तं प्रभावितोऽस्मि।

जगन्नाथः : सौम्य । प्रबुद्धोऽसि । त्वादृशं शिष्यं प्राप्याहं नितरां प्रीतोऽस्मि कामये च यत्त्वादृशाः युवकाः अस्यां पृथिव्याम् 'उदारचरितानां तु वसुधैव कुटुम्बकम्' इति भावनां वास्तविकरूपेण प्रसारयन्तु । अहमपि यावज्जीवं क्षुद्र-विचारैः साकं योत्स्ये ।

शिष्यः : भगवन् ! एतदेव भविष्यति । अधुना भवन्मुखेनैव भवन्नि-र्मितगंगालहरीम् अंशतः श्रोतुमिच्छामि ।

जगन्नाथः : अवश्यमेव श्रोष्यसि । लवंगी अपि गंगालहरी-मौत्सुक्येन शृणोति स्म । हा लवंगि, त्वं क्षुद्रविचारै-र्भक्षिता । किन्तु अहमपि एवमादर्शं पोषयिष्यामि यस्याग्रे जातिवर्णादिसंकुचितभावना न स्थास्यति ।

शिष्य : भगवन् । गगालहरीपदं श्रावयति स्म भवान् ।

जगन्नाथः : ओः ! चतुरोऽसि । शृणु—

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
विलोलद्वानीरं तव जननि तीरं श्रितवताम् ।
सुधातः स्वादीयः सलिलमिदमातृप्ति पिबतां
जनानामानन्दः परिहसति निर्वाणपदवीम् ।।

(इति भावविलीनो भवति)

शिष्यः : (स्वगत) अहो ! निमग्नोऽत्रभवान् गङ्गालहर्याम् ! (प्रकाशं) भगवन् अतीव आनन्ददायिनीयं लहरी । धन्यो-ऽस्मि यः श्रीमतां मुखादेवेमां श्रुतवान् । को नाम मानवो भवत्कवितामाधुरीं निपीय आनन्दमग्नो न स्यात् ?

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित् केषाञ्चित् न खलु विदधीरन्नपि मुदम् ।

ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न ये येषामानन्दं जनयति जगन्नाथभणितिः ॥

वाचकध्वनिः : एवंभूत आसीत् पण्डितराजो जगन्नाथः यस्य लोकोत्तरं व्यक्तित्वं पाण्डित्येन, कवित्वेन, विलासेन, ज्ञानेन निर्भीकत्वेन, औदार्येण च मण्डितं सत् सर्वदैव विश्वस्य मानवान् आह्लादयिष्यति ।

ससंगीतं गीयते :

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्यावयत् ।
विश्वमेकं कुटुम्बं - समालोकयत
भूतले भाति मेऽनारतं भारतम् !
वाजिराजि गजालिं च न्यक्कुर्वता
पण्डितेन्द्रेण यस्मिँल्लवङ्गी वृता ।
सुस्तनी मस्तकन्यस्तकुम्भा प्रिया
भूतले भाति तन्मामकं भारतम् ।
बुद्बुदाभा नृपा यत्र यातां लयं
यत्र विद्वान् कविश्चामरो राजते ।
त्यागिनो यत्र नैव म्रियन्ते क्वचिद्
भूतले भाति तन्मामकं भारतम् ।
शोषितो नत्र कश्चिद्भवेत्केनचित्
व्याधिना पीडितो नो भवेत्कश्चन
नाऽत्र कोऽपि व्रजेद् दीनतां हीनतां
मोदतां मे सदा पावनं भारतम् ॥

परीक्षिन्नाटकचक्रम्

रचयिता-पण्डित ओगेटि परीक्षित शर्मा। प्रकाशकः-ओगेटि अच्युतराम शास्त्री। प्राप्तिस्थानम्-पं० ओगेटि परीक्षित् शर्मा, जी ७, शिवकीर्ति, घोरपडी, पुणे-४११००१ महाराष्ट्र, (भारत)। प्रकाशनतिथिः-२१-१०-१९८३

पं० ओगेटि परीक्षित् शर्म-महाभागः संस्कृतगीतकारतया 'यशोधरा'-महाकाव्यकर्तृत्वेन च साम्प्रतिकसंस्कृतसाहित्यानुरागिणां शुभाशंसाः समर्जयं-स्तिष्ठति। 'परीक्षिन्नाटकचक्रेण' अयं महानुभावः साम्प्रतिसंस्कृतनाटककारेषु कामपि नूतनामभिख्यां भजते।

अस्मिन् नाटकचक्रे सप्तविंशतिनाटकानां संकलनमस्ति येषु चतुर्दश पौराणिकानि, षट् ऐतिहासिकानि सप्त च सामाजिकानि सन्ति।

लेखकस्य 'त्वमेवाहं त्वमेवाहं त्वमेवाहर्निशं मे', 'चल रे चल हस रे हस सर रे सर' प्रभृतीनि बहुधा काव्यगोष्ठीषु प्रस्तुतानि प्रसिद्धानि गीतान्यपि एतेषु नाटकेषु समाविष्टानि सन्ति।

डा० ग० बा० पलसुले-महाभागेन श्री जी० के० भट्टमहाभागेन चास्य नाटकचक्रस्य समीक्षणं प्रस्तावनायां कृतम्। एतेषां नाटकानां प्रयोगयोग्यत्वमस्ति। संवादेषु क्वचिदधिकबौद्धिकविचारविमर्शः शुष्कशास्त्रीयविवेचनमिव प्रतीयते यथा 'अपराजित' मिति नाटके नाट्य-कला-सौन्दर्यादिविमर्शः। एतेषु नाटकेषु राष्ट्रीयभावनां जागरयितुं नाटककर्ता सविशेषं प्रयतते किन्तु क्वचिदभिधायाः साम्राज्यं तत्र व्यञ्जनाया आवश्यकतां संकेतयति। यत्र भाषा पाणिनीयानुशासनं नानुसरति तत्र कवेः कथनमिदम्—

निन्दां प्रकुर्वन्तु मदीयसृष्टिं निरन्तरं शाब्दिकतत्त्वमग्नाः।
रसार्द्रचित्ताः प्रचुरं स्तुवन्तु वैविध्यपूर्णां सरसां सहर्षम्॥

एतेषां नाटकानां मञ्चप्रस्तुतयो भवन्तु; एतेषां वीडियोफिलमीकरणं भवतु, आकाशवाण्याः केन्द्रेभ्यश्च प्रसारणं भवतु, येन कवेः श्रमः सफलः स्यात् संस्कृतं च समधिकतरं लोकप्रियं स्यात्।

संस्कृतगीतमाला

रचयिता-डा० आ० न० वरखेडकरः। प्रकाशकः- भारतीयविद्याविकास-समितिः, १०-१०२/२, गोखलेनगरम्। रामन्थापुरम्, हैदराबादः ५०००१३

(आन्ध्रप्रदेशः) । मूल्यम् - ६.०० रूप्यकाणि । प्रकाशनवर्षम्-अक्टूबर १९८३ ।

यद्यपिताललयललितैर्गीतैः नृत्तनाट्यसंवादादिभिश्च विनायासं विनोदेन बाल-बालिकानां संस्कृताध्ययने सभिनिवेशं प्रवृत्तिं जनयितुं डा० वरखेडकर-महाभागेन 'संस्कृतगीतमाला' प्रणीता तथापि प्रौढगोष्ठीगरिष्ठानामपि कृते 'गणेशगद्यादिषु' प्रभूता सामग्री विद्यते । लोकप्रसिद्धलयानुसारं विरचितानि गीतानि लयपरिचितैः बालैरपि सुगमतया गातुं शक्यन्ते । दिङ्मात्रमुद्राह्लियते 'इस मिट्टी से तिलक करो ये धरती है बलिदान की' इति फिल्मगीत-ध्वनि-मनुसृत्य-रचितमेकं गीतमंशतः

धीरबालका वीरबालकाः स्वतन्त्रतापरिपालकाः ।
वीरजवाहरसमा नायका वयं भवाको बालकाः ।।
बभूव भव्यो भारतभूमौ सर्वचराचरपालको
लोकमनोगतशोकविमोको भारतरथसंचालको
वन्दे माधवम् वन्दे माधवम् ।।

परम्परां पालयन्नपि नूतनप्रयोगं कुर्वाणः डा०वरखेडकरमहाभागः संस्कृत-गीतमाला-ग्रथनार्थं सहर्षं वर्धाप्यते ।

विघ्नाधिराजशतकम्

रचयिता-श्री विठलदेवुनि सुन्दर शर्मा । प्राप्तिस्थानम्-श्रीमती विठल-देवुनि नागरत्नम्मा, १-९-१११२/जी/३, दयानन्दनगरम्, हैदराबादः-५०००४४ (आन्ध्रप्रदेशः) । मूल्यम् - १०-०० रूप्यकाणि । प्रकाशनवर्षम्-१९८४ ई० ।

श्रीनिवासशतक-देवीशतक-वीराञ्जनेयशतक-शम्भुशतक-छायापतिशतक-रचनानन्तरं श्री विठलदेवुनि सुन्दरशर्म-महाभागेन अष्टोत्तरशतवसन्ततिलकासु विघ्ननाशनिपुणस्य विनायकस्य अभ्यस्तशैल्या स्तुतिः कृता । 'विघ्नाधिराज विनमज्जनकल्पभूज' इति मकुटालंकृतेषु पद्येषु भगवतो गणेशस्य प्रभावो दिव्यचरितानि च कविना प्रसन्नशब्दैः वर्णितानि । तद्यथा—

व्यासश्चकार जयनाममहेतिहासं तल्लेखने स्वयमभूत्किल शक्तिमान्न ।
तच्च स्वयं लिखितवानसि लोकहेतोर्विघ्नाधिराज विनमज्जनकल्पभूज ।। (९६)

प्रसादगुणपूर्णेयं रचनां भक्तानां काव्यरसिकानां च कृते समानतया आह्लादवर्धिनी विभाति । रचनार्थं श्रीशर्ममहाभागो वर्धाप्यते ।

शीतलतृष्णा

लेखकः - श्रीकेशवचन्द्रदाशः। प्रकाशिका - लोकभाषाप्रचारसमितिः, ओडिशा, रामकृष्णानन्दवेदान्तभवनम् श्यामाकाली वीथिः, पुरी-७५२००१। मूल्यम् - ६-०० रूप्यकाणि। प्रकाशनवर्षम् - दिसम्बर १९८३ ई०। पृष्ठ-संख्या ७५। आकार : डिमाई।

अस्यां दीर्घकथायां ऋत्विक् नायकः। स चिन्तको दार्शनिको लेखकश्च। तस्य पत्नी ऋनी। सा तस्य साधनायां सहायिका किन्तु स तस्या अभिलाषान् न सम्यक् सनाथयति। पतिसेवापरायणा ऋती दिवंगता जायते। एकाकी ऋत्विक् यथाकथञ्चित् समयं यापयति। स ऋतीमवलम्ब्य किमपि लिखति। प्रसक्त्यानुप्रसक्त्या सुमति-मोहन-वसुमतीवृत्तान्तमपि स्मरति। अन्ते च परिवर्तनमिच्छति।

सरललघुवाक्यानि, 'फ्लेशबैक' पद्धतिः, सूक्तियोजना, वर्णनकौशलमित्ये-तदादिका विशेषता अस्या रचनाया आकर्षणं वर्द्धयन्ति। दिङ्मात्रमुदाह्रियते—

"इतः प्रभृति ऋत्विक् एकाकी। ऋतुः परिवर्तते। मासा क्षिप्राः। संवत्सराणि नवीभवन्ति। ऋत्विक् शीर्यते। सर्वत्र एकाकिताया हाहाकारम्। गृहं रिक्तम्। प्रकोष्ठं दूषितम्। पाठशाला विसज्जा। अलिन्दमावर्जनामयम्। उद्यानं स्थाणुमयम्। तुलसी निष्पत्रा। कलसी शून्या। भोजनं यत्र कुत्रापि। शयनं यदा कदापि।" (पृ० ६५)

श्रीदाशमहाभागस्य नैकाः रचना प्रकाशनं प्रतीक्षन्ते। आशासे ता अपि शीघ्रमेव पाठकानां पुरतः समागमिष्यन्ति। लेखको वर्धाप्यते।

(र० का० शु०)

देववाणी-परिषद्वार्ता

रसदर्शनस्य विमोचनम्

१४-३-१९८४ तारिकायां मोरीशसदेशस्य 'मोका'स्थ-महात्मा-गान्धी-संस्थान-सभागारे देववाणी-परिषत्प्रकाशितस्य किञ्च आचार्य श्रीरमेशचन्द्र-शुक्ललिखितस्य 'रसदर्शनम्' इत्येतन्नामकस्य ग्रन्थस्य समुन्मीलनं मोरीशसस्य प्रधानमन्त्रिणा श्रीमता अनिरुद्ध-जगन्नाथमहाभागेन कृतम्। अस्मिन्नवसरे तत्रत्य शिक्षामन्त्री श्री ए० परशुरामन्-महाभागः, तत्र भारतीयोच्चायुक्तः

श्रीप्रेमसिंह महाभाग:, महात्मगान्धिसंस्थानस्य निदेशक: श्री उत्तमविष्णुदयाल-महाभाग:, संस्कृत-सम्मेलनस्य आयोजन-समितेरध्यक्ष: श्रीचितलालरामचरण-महाभाग:, भारतसर्वकारस्य शिक्षामन्त्रालये उपपरामर्शदाता डा० सी० आर० स्वामिनाथमहाभागश्च स्वहस्ताक्षरै: ग्रन्थममुं समलंकृत्य देववाणी-परिषत्प्रकाशनानुष्ठानाय स्वशुभकामना अभिव्यक्तवन्त: । देववाणी-परिषदो महा-सचिवेन डा० रमाकान्तशुक्लेनोक्तं यद् रससिद्धान्तो हि सकलब्रह्माण्डे स्थितानां प्राणिनामेकात्मतां पोषयति; अनेकत्वे च एकत्वं द्रष्टुमना: तिष्ठति। परिषद: सहसचिवेन आचार्यरवीन्द्रनागर-महाभागेन विद्वद्भ्यो धन्यवादो व्याहृत: ।

डा० देवीदत्तशर्मा 'नेहरू' शिक्षावृत्त्या सम्मानित:

परमप्रमोदस्यायं विषयो यदस्मिन् वर्षे 'जवाहरलाल नेहरू स्मारक निधि' द्वारा 'जवाहरलालनेहरू' फैलोशिप-प्रदानेन सत्कृतेषु देशस्य मूर्धन्येषु त्रिषु विद्वत्सु अन्यतम: देववाणी-परिषद आजीवनसदस्य: किञ्च पंजाबविश्वविद्यालयस्य संस्कृत-विभागाध्यक्ष: प्रो० देवीदत्त शर्माप्यस्ति । डा० शर्ममहाभागस्य जन्म १९२८ तमे ईशवीयेऽब्दे नैनीतालस्य निकटस्थिते एकस्मिन् ग्रामे समभूत्। अस्य प्रारम्भिकशिक्षा संस्कृते पारम्परिकाध्ययनरूपेण जाता किन्तु प्राच्यपरीक्षाभि: साकमयमाधुनिकशिक्षामपि अगृह्णात् । फलतोऽनेन १९५३ तमे ईशवीयेऽब्दे प्रथमश्रेण्यां संस्कृते एम०ए० परीक्षा समुत्तीर्णा। १९५४ तमे ईशवीयेऽब्दे च वाराणसेयसंस्कृत विश्वविद्यालयात् साहित्याचार्य-पदवी प्राप्ता ।

एतदनन्तरमयं महानुभाव: अनुसन्धानकर्मणि संलग्न: । १९५८ तमे ईशवीयेब्दे च काशी - हिन्दूविश्वविद्यालयात् संस्कृत-विषये 'पी-एच०डी०" उपाधिं प्राप्तवान् । १९६२ तमेशवीयेऽब्दे चण्डीगढ़स्थ पंजाब विश्वविद्यालयस्य संस्कृत-विभागे प्राध्यापकपदे नियुक्तस्यास्य सम्पर्क: प्रसिद्धभाषाविदा पद्मभूषण डा० सिद्धेश्वरवर्ममहाभागेन जात: । तथा चायं भाषाविज्ञान-क्षेत्रे उल्लेखनीयं कार्यं व्यधात् । मध्यपर्वतीयभाषाणां ध्वनिप्रक्रिया-मवलम्ब्य कृतमस्य शोधकार्यं पञ्जाबविश्वविद्यालयेन १९७३ तमेशवीयेऽब्दे भाषाविज्ञानविषये पीएच०डी० उपाधिना सत्कृतम् । अथ चास्य प्रकाशितेषु भाषाविज्ञानशोधकार्येषु पंजाबविश्वविद्यालयेन अस्मै १९८४ तमेशवीये-ऽब्दे डी० लिट्० उपाधि: समर्पित: ।

१९३२ तमेशवीयाब्दादारभ्य पंजाबविश्वविद्यालयस्य संस्कृत - विभागे अध्यापनं प्रकुर्वाणो डा० शर्मा अद्यत्वे तत्रैव प्रोफेसर-विभागाध्यक्षत्वं बिभर्ति। अनेन महाभागेन संस्कृतसाहित्ये, संस्कृतभाषायां, भाषाविज्ञाने चोल्लेखनीयं अनुसन्धानकर्म कृतम्, यल्लक्ष्यीकृत्य तिब्बत-हिमालयीय-परिवारभाषासु संशोधनकार्यार्थं वर्षद्वयाय अयं महानुभावः अनया प्रतिष्ठितशिक्षावृत्त्या सम्मानितः। डा० शर्मा देशस्य प्रथमः संस्कृतज्ञः तथा च द्वितीयो भाषाविद् अस्ति यो हि इमां महनीयां शिक्षावृत्तिं लब्धुं सौभाग्यमश्नुते। अद्यावधि संस्कृतस्य भाषा-विज्ञानस्य च क्षेत्रे अस्य षोडश अनुसन्धानग्रन्थाः तथा च राष्ट्रीयासु आन्ताराष्ट्रिकासु च अनुसन्धान-पत्रिकासु शतप्रायाः शोधलेखाः प्रकाश्यं गताः। देववाणी - परिषदा १९८१ तमेशवीयेऽब्दे प्रकाशितः 'कालिदास की कला और संस्कृति (भाग २)' इत्येतन्नामा अस्य ग्रन्थः उत्तरप्रदेश-संस्कृत-अकादम्या पुरस्कृतोऽभूत्। देववाणी-परिषत्परिवारः एतत्सारस्वतसम्मानप्राप्त्यर्थं डा० शर्ममहाभागं भूयोभूयोऽभिनन्दति।

संस्कृत-वार्ता

डा० मण्डनमिश्रस्य नागरिकमभिनन्दनम्

२९-४-१९८४ ई० तारिकायां नवदिल्ल्या राष्ट्रीयसंग्रहालय-सभागारे राष्ट्रपतिपुरस्कृतस्य डा० मण्डनमिश्रमहाभागस्य भव्यं नागरिकमभिनन्दनमभूत्। अस्मिन्नवसरे देववाणी-परिषद्-दिल्लीप्रदेशसंस्कृतसम्मेलन-विश्वनाथयोगाश्रम-इन्द्रप्रस्थीयसंस्कृतपरिषद्-संस्कृतनाट्यमञ्च - अखिल भारतीय ज्योतिष-परिषत्प्रभृतिसंस्थाभिः डा० मिश्रमहाभागाय अभिनन्दनपत्रं समर्पितम्। डा० मण्डनमिश्राभिनन्दनसमितेरध्यक्षेण श्री कुलानन्दभारतीयेन, समारोह-मुख्यातिथिना सूचनामन्त्रिश्रीहरिकिशनलालभगतमहाभागेन समारोहाध्यक्षैः पण्डितकमलापतित्रिपाठिमहाभागैरन्यैश्चानेकैर्विद्वद्भिः समाजसेविभिरधि-कारिभिश्च डा० मिश्रस्य संस्कृतसेवा उपश्लोकिता:।

लक्ष्मणपुरे आकाशवाणी-संस्कृताकादमीभ्याम् अखिल-भारतीयं संस्कृतकवि-सम्मेलनमायोज्यते

२०४१ वैक्रमाब्दे श्रावण-कृष्ण-अष्टम्यां (२१-७-१९८४ ई० तारिकायां) सायं सार्धषड्वादनवेलातो लक्ष्मणपुरे (लखनऊनगरे) हिन्दी-संस्थान-भवने उत्तर प्रदेश-संस्कृत-अकादम्या आकाशवाण्याश्च संयुक्ततत्त्वावधाने अखिल-

भारतीय-संस्कृत-कविसम्मेलनं सम्पत्स्यते यत्र काव्यपाठाय इमे द्वादश कवयः समामन्त्रिताः सन्ति :—

आचार्यजानकीवल्लभशास्त्री (मुजफ्फरपुरतः), आचार्य आनन्द झा (दरभङ्गातः), आचार्य मायाप्रसाद त्रिपाठी (वाराणसीतः), डा० रमाकान्त शुक्लः (नयी दिल्लीतः), डा० श्रीनिवास रथः (उज्जयिनीतः), डा० भास्कराचार्य त्रिपाठी (रीवांतः), श्री प्रयागनारायण शास्त्री (प्रतापगढ़तः), डा० नलिनी शुक्ला (कानपुरतः), डा० राजेन्द्र मिश्रः (इलाहाबादतः) डा० प्रशस्य मित्र शास्त्री (रायबरेलीतः), श्री बाबू राम अवस्थी (लखीमपुर खीरीतः), आचार्य शारदाचरण दीक्षितश्च (आगरातः) ।

सागरविश्वविद्यालये संस्कृत-गोष्ठी

डा० हरिसिंह गौर-विश्वविद्यालयस्य संस्कृत-विभाग आगामिनि सितम्बर-मासे विश्वविद्यालयानुदानायोगसाहाय्येन 'इस्लामस्य संस्कृत-साहित्ये योगदानम्' इति विषयमवलम्ब्यैकां त्रिदिवसीयां सङ्गोष्ठीमायोजयति यत्र नैके विद्वांसो स्वविचारान् प्रकटयिष्यन्तीति विज्ञापयति सागरविश्वविद्यालय-संस्कृतविभागाचार्याध्यक्षो डा० राधावल्लभत्रिपाठिमहाभागः ।

केन्द्रीयसंस्कृतबोर्डस्य संगठनम्

केन्द्रीयशिक्षामन्त्रालयस्य तत्त्वावधाने केन्द्रीय - संस्कृतमण्डलस्य पुनर्गठनं सञ्जातम् । अस्य अध्यक्षपदं डा० डी० पी० चट्टोपाध्यायमहाभागः समलंकुरुते । जुलाईमासस्य सप्तदशतारिकायामस्य मेलनं भवति ।

साहित्यसङ्गमेन सर्वभाषाकविसम्मेलनमायोजितम्

नयीदिल्लीस्थ'साहित्यसङ्गम'-संस्थया १६-५-१९७४ तारिकायां सर्वभाषाकविसम्मेलनमायोजितं यस्मिन् संस्कृतरचना अपि प्रस्तुता अजायन्त । सम्मेलनाध्यक्षेण डा० रमानाथत्रिपाठि-महाभागेन छन्दोबद्धता संस्कृतकविताया उल्लेखनीया विशेषता संकेतिता ।



समीक्षार्थं प्राप्तानि पुस्तकानि

(१) श्रीराष्ट्रगुरुसहस्रनामस्तोत्रम्। ले० डा० शिवदत्तशर्मा चतुर्वेदः। प्रका० सस्कृत - परिषद्, पीताम्बर पीठ, दतिया (म० प्र०) मूल्यम् २-००

(२) श्रीदेवीसहस्रनामसंग्रहः(प्रथमो भागः)। सं० डा० शिवदत्तशर्मा चतुर्वेदः। प्रका० श्री पीताम्बरपीठसंस्कृतपरिषद्, दतिया (म०प्र०)। १९८४। मूल्यम् १५-००।

(३) प्रीतिपथे। ले० श्री भि० वेलणकरः। प्रका० देववाणी-मन्दिरम्, मुम्बई-४००००४। १९८२। मूल्यम् : १२-००।

(४) नाट्यकथासागर.। सं० श्री भि० वेलणकरः। प्रका० देववाणी - मन्दिरम्, मुम्बई ४००००४। १९८४। मूल्यम् १५-००

(५) सूत्रवाङ्मयदर्शनम्। सं० श्री० भि० वेलणकरः। प्रका० रा० ना० दांडेकर भंडारकर प्राच्यविद्या-संशोधन-मन्दिरम्, पुणे-४। मूल्यम् २०-००। १९८२।

(६) पुराणवाङ्मयपरिचयः। सं० श्री भि० वेलणकरः। प्रका० देववाणी - मन्दिरम्, मुम्बई ४००००४। १९८४। मूल्यम् १२-००।

(७) श्रीलोकमान्यस्मृति.। ले० श्री भि० वेलणकरः। प्रका० केसरी प्रकाशन पुणे ३०। १९७६। मूल्यम् ६-००।

(८) रंजनकथामाला। लेखिका डा० कमल अभ्यकर। प्रका० देववाणी - मन्दिरम्, मुम्बई ४००००४। १९८३। मूल्यम् ५-००।

शुभकामना:

देववाणी-परिषत्प्रकाशिता डा० शिवदत्तशर्मचतुर्वेदप्रणीता "स्फूर्ति-सप्तशती" राजस्थान-संस्कृत-अकादम्या अपि पुरस्कृता। डा० चतुर्वेदमहाभागेभ्यः शुभकामनाः समर्प्यन्ते।

बीस सूत्र की
सुनो कहानी,
गांव गांव को
बिजली पानी



अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

❀

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९

४ सम्पादक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या सांझेदार हैं अथवा जो इसकी सारी पूंजी के एक प्रतिशत से अधिक के हिस्सेदार हैं। — देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नई दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद, दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिताः ग्रन्थाः

१.	कर्णभूषणम् (डा० सी० आर० स्वामिनाथन्)	रु० ५.००
२.	श्रीबदरीशसुप्रभातम् („ „)	रु० १०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) („)	रु० ४०.००
४.	श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः)	रु० ३०.००
५.	सुगमरामायणम् („ „)	रु० ३५.००
६.	श्रीमदप्पयदीक्षितचरितम् (डा० हरिनारायण दीक्षितः)	रु० २०.००
७.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डा० रमेशचन्द्र शुक्लः)	रु० ३५.००
८.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
९.	आभाणकमञ्जरी („ „)	रु० १५.००
१०.	मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा)	रु० २०.००
११.	रघुवंश : एक विश्लेषण („ „)	रु० २०.००
१२.	अभिज्ञानशाकुन्तल : एक विश्लेषण („)	रु० २०.००
१३.	कालिदास की कला और संस्कृति (भाग २) („)	रु० ६०.००
१४.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
१५.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („)	रु० ३० ००
१६.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरिपादः)	रु० ४०.००
१७.	अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः)	रु० २०.००
१८.	भट्टनायक और अभिनवगुप्त की साधारणीकरण-विषयक अवधारणा (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१९.	अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण-विमर्श (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२०.	साधारणीकरण : प्राच्य और प्रतीच्य चिन्तन : (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
२१.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
२२.	संस्कृत साहित्य में राष्ट्रिय भावना (भाग १) (डा० हरिनारायण दीक्षित)	रु० ५०.००
२३.	संस्कृत साहित्य में राष्ट्रिय भावना (भाग २)	रु० ७०.००
२४.	„ „ „ (भाग ३)	रु० ५०.००
२५	(सम्पूर्णग्रन्थः एकस्मिन् पुटबन्धे)	रु० १५०.००
२६.	साहित्यकौतुकम् (काव्यम्) (पं० टी०वी० परमेश्वर अय्यरः)	रु० ४०.००
२७.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २० ००
२८.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२९.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
३०.	श्रीबदरीशतरङ्गिणी (काव्यम्) श्रीसुन्दरराजः	रु० २०.००
३१.	सुरश्मिकाश्मीरम् („) („)	रु० ५.००
३२.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० ६.००
३३.	श्रीउच्छिष्टमहागणपतिकल्पः (डा० सी० आर० स्वामिनाथन्)	रु० ८.००
३४.	पण्डितराजीयम् नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

षष्ठवर्षं चतुर्थोऽङ्कः

१५ अक्तूबर १९८४

प्रधानसम्पादकः

डा० रमाकान्तशुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः



प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

परामर्शदातृमण्डलम्

विषय-सूची

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20 (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad) + Postage charges

'देववाणी-परिषद् दिल्ली'-कृते डा० रमाकान्त शुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९ 'इति मुद्रणालये मुद्रापयित्वा '६ वाणी विहार, नई दिल्ली-११००५९' तः प्रकाशितम् अर्वाचीनसंस्कृतम् (६/४)। प्रधान सम्पादकः— डा० रमाकान्त शुक्ल:। प्रकाशनतिथिः १५-१०-१९८४।

सम्पादकीयम्

अनेनाङ्केन अर्वाचीनसंस्कृतस्य षष्ठवर्षपूर्तिर्भवति। अयञ्चाङ्कस्तस्यां वेलायां प्रकाश्यते यदा संयुक्तराष्ट्रामेरिकायां विश्वसंस्कृतसम्मेलनस्य षष्ठं महाधिवेशनं समायोज्यते यस्मिन् नानादेशेभ्य आगता विद्वांसो विविधेषु विषयेषु विचारं कुर्वन्ति। एतेषाँ समेषामपि समभिनन्दनं कुर्मः अधिवेशनस्य च साफल्यं कामयामहे।

अन्ताराष्ट्रिक संस्कृत सम्मेलनेभ्यः किमपेक्ष्यते-इति विषयः संयोजकानां पुरतस्तिष्ठति। किमु देशाटनमेव एतेषामायोजनानां प्रयोजनम्? उताहो अतीतस्य चिन्तनमेव एतेषां प्रयोजनम्? अथवा अन्यदपि किञ्चिदपेक्ष्यते? वस्तुतः कस्यामपि भाषायां कियती अभिव्यञ्जनाशक्तिरस्ति कियाँश्च भावराशिरासीदस्ति तथा भवितु शक्नोति, कियत्या शीघ्रतया सा भाषा शृण्वतां पठतां च श्रुतिनेत्रपथं प्रयाति, पुनश्च तत्प्रेरणया विश्वस्मिन् कीदृशी भावना जागर्ति-इत्यादिप्रश्नानामुत्तरमेतादृशैः सम्मेलनैर्लब्धु शक्यते। तत्तद्देशे प्रतिष्ठिता समीक्षासरणिः कृति-विशेषं यदा पश्यति तदा विविधभाववृत्तीनां परिचयो लभ्यते श्रोतृभिः। पुनश्च नवीनदृशा किमपि पर्यालोचयितुं प्रवर्तन्ते विद्वांसः। एवं सम्मेलनदिवसेषु आयोजनस्थलं विदुषामेकं नीडमिवाभाति। यदि सत्त्वगुणस्य साम्राज्यमेतेषु अधिवेशनेषु न भवति तर्हि आयोजनं न सफलं भणितु शक्यते। यदि विसृष्टिवेलायाम् अतिथीनाम् आतिथेयानाञ्च नेत्राणि प्रेमाश्रुविलन्नानि न भवन्ति, यदि वा मनांसि परस्परं प्रेमबन्धने न बद्धानि भवन्ति तर्हि को लाभ एतादृशैरायोजनैः? नूनं संस्कृतायोजनेषु प्रायो विदुषां सात्त्विकभावो वर्द्धत एव।

पुनश्च, राजनीतिकैर्यानि सम्मेलनानि समायोज्यन्ते तत्र कामं कूटनीतिरन्तर्निहिता भवतु किन्तु साहित्यिकैरायोज्यमानेषु सम्मेलनेषु मानवीयभावना सर्वोच्चतया अपेक्षिता। साहित्यं नाम पर्यायो मेलनस्य, सामञ्जस्य। भाषापि भवति माध्यममैक्यभावस्य। यदा कश्चिज्जर्मनदशीयोऽमेरिकादेशीयो रूसदेशीयो वा विद्वान् संस्कृतं ब्रूते तदा संस्कृतज्ञा असंस्कृतज्ञाश्च भारतवासिनः प्रसन्नतया तं प्रति आकृष्टा भवन्त्येव। एवमेव यदा तदनभिज्ञाः पुरुषास्तां भाषामधीत्य तदभिज्ञानां समक्षे तां ब्रुवते तदापि मनसोरन्तरालो विलीयते। किन्तु भाषामात्रं नैक्यभावप्रवर्तकम् यतो हि गुप्तचराः शत्रवश्चापि समानां भाषां प्रयुञ्जते, न च तत्र विलोक्यते सद्भावो भावैक्यं वा। अतो भाषया साकं

सद्भावोऽपि यदि वर्धते तथा भाषाया अन्वर्थता । इत्थं भाषा-साहित्ययो: परीक्षा भवति । यां भाषामधीय साहित्यं (मेलनं) जागर्ति सा नूनं विश्व-कल्याणकारिणी । नूनं संस्कृतभाषा एवमेवाद्यापि तिष्ठति । वर्तमाने विघटनप्रधानेऽपि युगे सा सर्वमङ्गलमाङ्गल्यमाकांक्षति, अद्यापि सा विश्व-बन्धुत्वं गायति, अद्यापि ततो भक्तिभावो नैव विलोपमेति, अद्यापि तत्र काव्यस्यात्मा रस: कथ्यते, अद्यापि सा **'परस्य न परस्येति ममेति न ममेति चे'**ति सिद्धान्तं न जहाति; अद्यापि का अवसादं नोरीकुरुते; कष्टकालेऽपि सा आनन्दगीतानि गायति; अद्यापि सा विश्वस्य सन्नायकानां चरितानि गायति, अद्यापि प्रकृत्या: सौन्दर्यं दिदृक्षति, अद्यापि सा आत्महत्याप्रवृत्तिं नाङ्गीकरोति । एता: सर्वा अपि प्रवृत्तय: कस्यचिद्भूभागस्यैव कृते न, अपि तु समस्तस्यापि भूमण्डलस्याथवा ब्रह्माण्डस्य कृते ग्राह्या: सन्ति । एतद्विषये विद्वांसो विचारयन्तु विचार्य च संस्कृतामृतं अविश्वासविषदग्धाय जगते प्रददतु । आशासे, संस्कृतस्य **'ॐ शान्ति'** रिति द्विशब्दं मन्त्रं मनसि निधाय फिलाडेल्फियाधिवेशनं जगति आनन्दं संचारयितु समर्थ भविष्यति ।

परन्तु एका न्यूनता संकेतनीयास्ति । संस्कृतस्य स्वारस्यं तदवधि आस्वादयितुं न शक्यते यदवधि संस्कृतं मूलरूपेण न स्वीकृतं स्यात् । तदर्थं विदुषां प्रयत्ना अपेक्षिता: । अद्यापि संस्कृतविचाराणां सद्य: प्रत्यंकनाय संस्कृताशुलिपिकारा अपेक्षिता: सन्ति । देववाणी-परिषदा संस्कृताशुलिपे: सूत्रपात: कृत: किन्तु तस्या विकासार्थं सर्वकाराणां, धनिनां विद्यासेवकानां च सम्मिलिता: प्रयत्ना अपेक्ष्यन्ते । यद्येकोऽपि संस्कृताशुलिपिकार: प्रतिवर्ष समुत्पद्यते तर्हि कैश्चनैव वर्षै: संस्कृतमाध्यमेन सन्देशप्रेषणं, विचाराणां सद्य: प्रत्यंकनं च सम्भवं भविष्यति । इत्थं च विश्वस्यैकताया: सूत्रं संस्कृतं बहु-जनहिताय बहुजनसुखाय च सेत्स्यति । **'संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्'** इति कालिदासोक्तिं स्मरन् पुन: विदुषामाह्वानं करोमि संस्कृतस्य संरक्षणाय, वर्धनाय मानवताय प्रयोगाय च । सफलं भवत्वधिवेशनम् !

अर्वाचीनसंस्कृतस्य निश्चिततिथिषु प्रकाशने ये केऽपि जना: कारणीभूता: सन्ति तेभ्य: सर्वेभ्योऽपि कृतज्ञतां व्याहराम: ।

रमाकान्त शुक्ल:

(रमाकान्त शुक्ल:)

प्रधानसम्पादक:

१५-१०-१९८४ ई०

'अभिशापम्'

(ध्वनिनाटकम्)

प्रणेता :

डा० रमाकान्त शुक्लः

पात्र-परिचयः

नटी	:
सूत्रधारः	:
सुरेन्द्रः	: देवराजः
वृषपर्वा	: दानवराजः
बृहस्पतिः	: देवानां पुरोहितः (गुरुः)
शुक्राचार्यः	: दानवानां गुरुः
कचः	: बृहस्पतेः पुत्रः
देवयानी	: शुक्राचार्यस्य पुत्री
मदिरा	:
व्योमचारी वियद्गतिकः	: विमानचरिणौ देवौ
दूतः	: वृषपर्वणो दूतः
द्वारपालः	: वृषपर्वणो द्वारपालः
प्रतीहारीः	: सुरेन्द्रशिविरद्वाररक्षिका
धूम्राक्षः	: दानवः
अंगारकः	: ,,
पिंगाक्षः	: ,,
लोहिताक्षः	: ,,

रमाकान्तशुक्लप्रणीतं ध्वनिनाटकम्

अभिशापम्

'देवान् दैत्यांश्च जीवानयमहमखिलान् मृत्युवक्त्रं नयामी'
त्युच्चैरुद्घोषयन्तं जगदिदमभितो भाययन्तं करालम् ।
उन्मत्तं कालकूटं प्रसृमरमखिलं स्वीयकण्ठे नियच्छन्
कुर्यान्नित्यं शिवं वो भुजगपरिवृतो नीलकण्ठो महेशः ॥

(१)

(नान्द्यन्ते)

सूत्रधारः : आर्ये ! आर्ये ! इत आगम्यताम् ।

नटी : आर्य ! इयमस्मि ! भणतु, किमर्थमाहूतास्मि ।

सूत्रधारः : नन्वार्ये ! विस्मृतं त्वया यदद्यास्माभिः शुक्लोपाह्वरमाकान्तग्रथितवस्तुना नवेन 'अभिशाप'-नामधेयेन ध्वनिनाटकेनोपस्थातव्यम् ।

नटी : कथं विस्मृतं स्यान्मया ? सर्वमपि सज्जम् । किन्त्वार्य, भवता मम प्रश्नस्योत्तरं नैव दत्तमधुनावधि !

सूत्रधारः : कः सः प्रश्नः ?

नटी : कथं प्रतिभावतापि नाटककारेण 'अमंगलसूचकं' नाम अस्य नाटकस्य कृतम् ?

सूत्रधारः : अपि मुग्धे ! 'अभिशाप' इत्यनेन नामधेयेनैव कथं शंकितासि ? अमंगलादपि मंगलस्य व्यञ्जना सम्भवा । ननु स्मरसि पुष्पदन्तस्य वचनम् ?

नटी : किं तत् ?

सूत्रधारः : भगवन्तं भूतभावनं स्तुवन् कविः कथयति—

'श्मशाने श्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिता भस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमंगल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद ! परमं मंगलमसि ॥'

एवमेवास्य नाटकस्य विषये त्वयावधार्यम्। अभिशाप-नामधेयमपीदं जगत्यै वरदानरूपम्।

नटी : कथमिव ? सविस्तरं भणतु।

सूत्रधारः : अपि वावदूके ! सर्वमपि अभिधयैव न भणितव्यम्। नाटकान्ते सर्वमपि उद्घाटितं भविष्यति। इदानीं नटान् आदिश नाट्यप्रस्तुत्यर्थम्।

नटी : आर्यपुत्र, सर्वेऽपि सज्जाः सन्ति। ननु भवानेव आकारयतु तान्।

सूत्रधारः : भो भो मत्सहयोगिनः ! स्वकर्तव्यपालनाय सज्जीभवत।

(नेपथ्ये)

(समवेतस्वरेण देवाः—वयं सज्जाः स्मः। असुरान् चूर्ण-विचूर्णान् कर्तुं भवतो देवेन्द्रस्याज्ञां प्रतीक्षामहे ! शस्त्र-सम्पाताय आदेशो दीयताम्।)

सूत्रधारः : अये ! ममादेशं सुरेन्द्रस्यादेशं मन्वाना एते देवाः युद्धक्षेत्रे मामुत्तरयन्ति। नूनं त्रिलोक्यैश्वर्यप्राप्तिमूलं देवदानवयुद्धमासन्नम्।

(२)

(देवकटके)

सुरेन्द्रः : गुरुदेव बृहस्पते ! इमे सर्वेऽपि मामकीनाः सैनिका युद्धार्थं सन्नद्धास्तिष्ठन्ति। आशीर्वादो दीयताम् यद्भवत्कृपया समरजयिनो भवेम।

बृहस्पतिः : विजयस्व शतक्रतो ! स्वपराक्रमेण शत्रून् जय ।

सुरेन्द्रः : सेनापते ! अपि शस्त्रसम्पाताय सर्वे सज्जाः ?

सेनापतिः : अथ किम् ? अन्वादेशमेव सर्वेऽपि रणांगणे स्वपराक्रमं शस्त्रकौशलं च दर्शयितुकामास्तिष्ठन्ति ।

सुरेन्द्रः : तदा तूर्यनादो विधीयताम् । शंखाः, भेर्यः, पणवानकगोमुखाः झंझाम्लातकढक्काः हन्यन्ताम् । युद्धनाटकस्य मङ्गलध्वनिः क्रियताम् ।

सेनापतिः : यथाज्ञापयति भवान् ।

(तूर्यध्वनिः । भेरीपणवानकगोमुखादिध्वनिः)

(३)
(दानवकटके)

वृषपर्वा : गुरुदेव शुक्राचार्य ! देवै रणदुन्दुभिस्ताडितः ।

शुक्राचार्यः : वृषपर्वन् ! वर्धापनम् । शत्रुकृतं युद्धाह्वानं ननु वीराणां मोदवर्धनम् । असुरेन्द्र ! शत्रुकृताक्रमणस्य समुचितमुत्तरं दातुं स्वयोद्धॄन् आदिश । मनस्विना शत्रोरुपरि स्वयमाक्रमणं न करणीयम्, किन्तु यदि शत्रुस्तस्मिन्नाक्रमणं करोति तदा तेन तस्याक्रमणस्य समुचितमुत्तरमवश्यमेव दातव्यम् । विजयस्व रणे !

वृषपर्वा : सेनापते ! शत्रुमनोऽभिलाषविध्वंसको रणदुन्दुभिध्वनिर्विधीयताम् । अस्माकं सर्वेऽपि रणशौण्डा असुरसैनिका युद्धरसं पातुमनुमन्यन्ताम् !

सेनापतिः : यथाज्ञापयति असुरेन्द्रः ।

(रणदुन्दुभिध्वनिः)

(रणक्षेत्रे । शस्त्रसम्पातध्वनिः । गजचिक्कारध्वनिः । हयह्रेषाध्वनिः । वीराणां कोलाहलः । 'वराका देवाः ! अधुनैव दिवं यास्यथ' इत्यसुरध्वनिः, 'अरे शुक्राचार्य-

शिष्याः ! अधुनैव कथावशेषाः क्रियध्वे' इतिसुरध्वनिः, 'इष्टं स्मर ! इयं तव प्राणान्तवेला' 'छिन्द्धि' 'भिन्द्धि' इतियोद्धृध्वनिः। युद्धकोलाहलः। स्वरविलयः)।

(४)

(सुरेन्द्रयुद्धशिविरे)

सेनापतिः : विजयताम् सुरेन्द्रः। देवसेनया असुराः पंचत्वं प्रापिताः।

सुरेन्द्रः : पराजिता असुराः? निष्कण्टका वयम्? त्रैलोक्य-स्वामिनो वयम्?

सेनापतिः : अथ किम्? भवद्द्वेषी वृषपर्वा शोकाम्बुधौ निमज्जति। शुक्राचार्यस्तं सान्त्वयति।

सुरेन्द्रः : सदृश खलु देवसैनिकानाम् संवृत्तम्। नन्दन्तु देवाः। वर्धन्ताम् अस्मत्सैनिकाः। सेनापते! सैनिकानां विजयोत्सवः समायोज्यताम्।

सेनापतिः : यथाज्ञापयति देवः।

(५)

उद्घोषकः : भो भो विजयिनो देवाः! तत्रभवता देवराजेन शक्रेण भवन्तो विजयलाभेऽभिनन्दिताः, आमन्त्रिताश्च युद्धशिविरे एव समायोज्यमाने विजयोत्सवे समुपस्थातुम्। तत्राप्सरोभिर्दिव्यं नृत्यं प्रस्तोष्यते।

सैनिकानां समवेतध्वनिः ('शोभनम्! शोभनम्!' 'चलतु मित्र! युद्धश्रमं (परिहरामः' आदि।

(सुरेन्द्रशिविरे नृत्यध्वनिः। नृत्यान्ते)

सुरेन्द्रः : भो भो समवेता विजयिनो देवसैनिकाः। युष्माकं रण कौशलस्य, युष्माकमुत्साहस्य युष्माकं जागरूकतायाश्च-

परिणामोऽयं यदद्य वयमसुरान् पराजित्य विजयश्रिय-मालिङ्गामः।......

प्रतीहारी (प्रविश्य) : जयतु जयतु देवः। असुरशिविराद् वृषपर्वणः सन्देशमाहृत्य दूतः समायातः।

सुरेन्द्रः : असुरशिविराद् दूतः ? क्वासौ ?

प्रतीहारी : अस्मच्छिविरद्वारमध्यास्ते। इदं तेन भवदर्थं पत्रं प्रदत्तम्।

सुरेन्द्रः : (पत्रं गृहीत्वा वाचयति) "इतोऽसुरशिविरादसुरेन्द्रो वृष-पर्वा सुरेन्द्रं विज्ञापयति यद् वीरा जयपराजयाभ्यामन्तरा युद्धभूमिं न परित्यजन्ति। भवतः सैनिका जयपराजययो-र्निश्चयं विनैव रणांगणाद् विनिवृत्ताः। अस्माकमसुर-सैनिकास्तान् रणाजिरे प्रतीक्षमाणास्तिष्ठन्ति। एतै-रस्माकं भवत्सैनिकानां जयपराजयनिर्णायकं युद्धं स्यादथवा युद्धं विनैव भवता पराजयः स्वीकार्यः, अस्माकं शासनं च मौलिमालाभिर्लालनीयम्। (बृहस्पतिं प्रति) सुरगुरो ! कोऽयमसम्बद्धप्रलापः ? कथमस्माकं सैनिकैर्हता असुरा अद्यापि जीवन्ति ? (सेनापतिं प्रति) सेनापते ! किम्वलीक-विजयसूचनादानेन विप्रलब्धाः वयम् ?

बृहस्पति : अत्राहं कांचिद् दूरगामिनीं मायां तर्कयामि।

सेनापतिः : देव ! यद्यसुरा रणांगणमधितिष्ठन्ति तर्हि वयमपि स्वबलं पुनः परीक्षितुमुत्सुकाः स्मः ! विजयोत्सवं परित्यज्य इदानीमेव युद्धप्रयाणाय सज्जा वयम् ! दूत-द्वारेण युद्धसन्देशो वृषपर्वणः सकाशे प्रेषणीयः।

सुरेन्द्रः : युक्तम् प्रतिहारि ! दूत आहूयताम् !

प्रतीहारी : यथाज्ञापयति देवः।

(निर्गता। प्रविश्य)

एष दूतः। भवत्सन्देशं प्रतीक्षते।

सुरेन्द्रः : असुरदूत ! भवता मद्वचनादसुरेन्द्रो वृषपर्वा विज्ञापनीयो यद्देवाः कदापि जयपराजयाभ्यां विना युद्धाजिरान्न पलायन्ते, कान्दिशीका वा भवन्ति। श्व एव भगवति विरोचने समुदिते देवदानवबलपरीक्षणं भविता। श्वो युद्धक्षेत्रे चिरनिद्रातः पूर्वमिदानीं निजान्तिमनिशायामसुरसैनिका विश्राम्यन्तु।

(६)

(वृषपर्वणः शिविरे)

द्वारपालः : जयतु जयतु असुरेन्द्रः। असुरदूतः सुराणां युद्धशिविरात्प्रतिनिवृत्तो दानवेन्द्रं दिदृक्षति।

वृषपर्वा : त्वरितं प्रवेशयैनं द्वारपाल !

द्वारपालः : (पुनः प्रविश्य) - जयतु जयतु दानवेन्द्रः। अयमसुरदूतः।

दूतः : जयतु जयतु असुराधिपः। अत्रभवन्तमसुरेश्वरं वृषपर्वणं प्रति विज्ञापयति सुरेन्द्रो यद्देवाः जयपराजयाभ्यां विनां युद्धभूमिं न परित्यजन्ति, अतः प्रातःकाले सुरासुरबलयोः परीक्षणं भविता।

वृषपर्वा : (सव्यंग्यं, साभिमानं) ह ह ह ! प्रातःकाले सुरासुरबलयोः परीक्षणं भविता ! मुग्धोऽसि सुरेन्द्र ! केवलमसुराणामेव बलं परीक्षितं भवेत्, मृतानां देवानां बलपरीक्षणं कथं संभवेत् ? असुराः अमराः सन्ति, गुरुवरशुक्राचार्यस्य कृपया ! (शुक्राचार्यं प्रति) असुरगुरो भगवन् भार्गव ! किमस्मासु भवत्प्रसादमतिशेतुं सुराः प्रभविष्यन्ति ?

शुक्राचार्यः : कदापि न। मच्छिष्या असुराः कदापि मर्तुं नार्हाः।

मद्वशंगता संजीविनी विद्या। तान् सदैव संजीवयिष्यति। पश्यामि सुरगुरोर्बृहस्पतेर्विद्यावलम् श्वो रणांगणे! मच्छिष्यहेतिदलितान् अमरान् कथममरीकरिष्यति स वराक इति दर्शनीयमस्ति! व्यपनयामि तस्य बृहस्पतित्वम्। वृषपर्वन्!

वृषपर्वा : आज्ञापयतु भगवान् काव्यः।

शुक्राचार्यः : श्वो मयापि युद्धक्षेत्रे भाव्यम्। यदि देवा असुरान् घातयन्ति तदाहं तान् संजीविन्या विद्यया पुनरपि उज्जीवयिष्यामि।

वृषपर्वा : अनुगृहीतोऽस्मि भवदाशिषा। श्वो मया साकमेव भवन्तो युद्धक्षेत्रे स्थास्यन्ति।

(७)

(सुरेन्द्रसेनाकटके)

सुरेन्द्रः : सेनापते!

सेनापतिः : आज्ञापयतु देवराजः।

सुरेन्द्रः : समुदेति भगवान् विरोचनः। तूर्यनादः क्रियताम्। देवानां पराक्रमरसमास्वादयन्तु दानवाः। देवानां विजयवैजयन्ती आकाशे अव्याहता उल्लसतु। अपि किं वैमानिका देवाः पुष्पवृष्ट्यर्थमाकाशे यथादेशं तिष्ठन्ति?

सेनापतिः : सुरपते! ते स्वनियोगमशून्यं कुर्वन्ति।

सुरेन्द्रः : भगवन् बृहस्पते! मम सेनायै स्वाशिषम् आशंसतु।

बृहस्पतिः : सर्वथा भद्रं भूयात् पुरन्दरबलस्य।

सुरेन्द्रः : सेनापते! युद्धारम्भाय दुन्दुभिस्ताडितः स्यात्। अद्य जयपराजयाभ्यां विना युद्धस्थलं नैव परित्याज्यम्।

सेनापतिः : यथाज्ञापयति देवः। (सशस्त्रसम्पातं युद्धध्वनिः)

(८)

(आकाशे)

वियद्० : मित्र व्योमचारिन। अस्माभिर्देवानां विजये पुष्पवृष्टिः करणीया विद्यते। इदं युद्धं प्रारब्धम्। एते देवा स्वायुधैरसुरान् प्रहरन्ति। असुरा अपि वलिष्ठाः सन्ति। देवांस्ते इदानीं धर्षयन्ति !

व्योम० : मित्र वियद्गतिक ! पश्य पश्य ! सुरैरसुरा निपात्यन्ते। वर्षय वर्षय पुष्पाणि ! सुराणां विजयो भवति।

वियद्० : व्योमचारिन् ! पश्याश्चर्यकम ! एते असुरा भूमौ पतिताः पुनरप्युत्तिष्ठन्ति। एष शुक्राचार्यो जलमुपस्पृश्य तान्संजीवयति।

व्योम० : अये सत्यम् ! कथमुत्थायोत्थाय एते असुरा देवान् धर्षयन्ति।

वियद्० : हा हन्त ? नासोरसीमनि स्थिता प्रायशो देवा असुरैर्हताः। युद्धक्षेत्रे असुरश्चैकोऽपि निहतो न दृश्यते।

व्योम० : पश्य, अयम् असरो देवेनानेन निपातितः।

वियद्० : अरे रे पश्य, अयन्तु पुनरपि उत्थितः। अयंच शुक्राचार्यो जलमुपस्पृश्य कामपि मायामाचरति।

व्योम० : देवबलं हीयते। शक्रोऽपि बृहस्पतिना साकं चिन्ताचुम्बित इव लक्ष्यते।

वियद्० : इदानीं पुष्पवृष्टेः किं भविष्यति ?

व्योम० : मित्र विमानमवतारय ! अल्पीयांसो हि देवा अवशिष्टाः। गत्वा शक्रं निवेदयावः शुक्राचार्यकृतां मायाचेष्टाम्।

वियद्० : पश्य, देवाः कान्दिशीकाः संवृत्ताः। असुराः सर्वेऽपि यथावस्थिताः साट्टहासं विजयश्रियमनुभवन्ति।
(अट्टाहासध्वनिः)

व्योम० : सत्यमेव भणसि सखे! एहि, शक्रं प्रति चलावः।

(९)

(सुरेन्द्रसेनाशिविरे)

व्योम० : जयतु जयतु देवः!

सुरेन्द्रः : कथं जयतु अयं मन्दभाग्यः सुरेन्द्रपदवाच्यो जन्तुः? ह्य एव विजयिनी देवसेना अद्य विनष्टा। न केवलं पराजयोऽपितु प्रणाशोऽपि संवृत्तः। अमरा मृताः, असुराश्च यथावत्तिष्ठन्ति।

व्योम० : देव! अत्र शुक्राचार्यः कारणं प्रतीयते। वियद्गतिकेन साकं मया विमानस्थेन दृष्टं यदुशनसा जलमुपस्पृश्य मृता असुरा वारंवारमुज्जीविताः। नूनं सः कामपि अमोघां विद्यां जानाति येन मृता अपि दानवाः पुनरुज्जीवन्ति।

वियद्० : सत्यं भणति व्योमचारी, देव! मयाप्येवमेवावलोकितम्।

सुरेन्द्रः : (निःश्वस्य) हुं! सुरगुरुं पृच्छामि! भगवन् वृहस्पते! मृतानामसुराणां पुनरुज्जीवने किं कारणं स्यात् भवन्मतेन?

बृहस्पतिः : शतक्रतो! तं श्रुतु मयाप्यासीद्यदुशनाः मृतसंजीविनीं विद्यां जानाति किन्त्वद्य तु अवलोकितमेव। नूनं शुक्राचार्यसिद्धा मृतसंजिविनी विद्यैव असुराणां पुनरुज्जीवने हेतुः।

सुरेन्द्रः : हा हता स्मः ! इदानीं वयं कदापि विजयमुखं नैव द्रक्ष्यामः । असुरा एव त्रैलोक्यशासका भविष्यन्ति । भीतभीता इव देवा इतस्ततः शरणं मार्गयिष्यन्ति । भगवन् बृहस्पते !

बृहस्पतिः : कथनीयं भणतु सुरेन्द्रः ।

सुरेन्द्रः : अपि नाम भवद्भिः सा संजीविनी विद्या उपासिता स्यात् ?

बृहस्पतिः : मघवन् ! अशक्यमेतत् । न हि शुक्राद् ऋते कश्चित्तां विद्यां वेत्ति । अहं शुक्रश्च नित्यमन्योन्यप्रतिस्पर्धिनौ । नाहं तं गुरुरूपेण स्वीकर्तुं पारये । विना च गुरुसेवां विद्या नोपलभ्यते ।

सुरेन्द्रः : दुर्दिनानि समागतानि देवानाम् ! कथं सुराणामस्तित्व-मवशिष्येत ?

व्योम० : देव ! उपाय एको मयोत्प्रेक्ष्यते तद्विद्योपार्जनस्य ।

सुरेन्द्रः : कः स उपाय ? भण व्योमचारिन् !

व्योम० : देव ! भगवतो बृहस्पतेः ज्येष्ठपुत्रः कचः शुक्राचार्यस्य शिष्यतां गृहीत्वा विद्यां साधयितुं क्षमः स्यात् ।

सुरेन्द्रः : भगवन् बृहस्पते ! अस्मिन् विषये भवतः किं मतम् ?

बृहस्पतिः : नाहं तस्य विद्यार्जनमार्गे प्रत्यूहीभवामि । यदि सः शत्रुपुरीमधिष्ठाय मत्प्रतिपक्षादपि विद्यां जिघृक्षति तर्हि न मम कापि हानिः । विद्यार्जनं हि ब्राह्मणानां प्रथमं कर्तव्यम् । किन्त्वस्मिन् विषये कच एव प्रष्टव्यो न त्वहम् । युवा हि पुत्रः स्वविषये निर्णयं कर्तुं प्रभुर्भवति ।

सुरेन्द्रः : तर्हि कचमेव विमृशामः ।

(१०)

(कचावासे)

सुरेन्द्रः : ब्रह्मन् ! अभिवादये !

कचः : (स्वगतं) अये ! सपरिकरः सुरेन्द्रः ? (प्रकाश) स्वागत सुरेन्द्रपरिकराय ! किं भवतः प्रियमुपकरोमि ?

सुरेन्द्रः : कच ! भवत्येवायत्तमस्माकं कल्याणम्। ब्रह्मचारिन् ! उत्तारय विपद्ग्रस्तान् देवान् !

कचः : स्पष्टं भणतु भवान् ! का समस्या ?

सुरेन्द्रः : देवदानवययुद्धे देवानां महती हानिः संवृत्ता। दानवाश्च शुक्राचार्यस्य विद्यावलेन मृता अपि पुनर्जीवन्ति। असुरा अजेयाः संवृत्ताः ! भवान् अस्माकं साहाय्यमाचरतु। कच ! देवान् संजीवयतु भवान् !

कचः : कथमहं देवान संजीवयेयम् ?

सुरेन्द्रः : अमिततेजसि ब्राह्मणे शुक्राचार्ये संजीविनी विद्या निवसति। भवान् विप्रवरं तमुपसेव्य छलेन तां विद्यां गृह्णातु। न तत्सकाशे स्वगोत्रकुलनामादि कीर्तनीयम्।

कचः : शतक्रतो ! असदृशं खल्विद ब्राह्मणकुमारस्य। देवानां कल्याणाय शुक्राचार्याद् विद्यां ग्रहीष्यामि किन्तु विनयेन, गुरुशुश्रूषया, परिप्रश्नेन, न तु छलेन। छलगृहीता विद्या न सफला भवति ! अहं नामकुलगोत्रादि संकीर्त्यैव शुक्राचार्यं प्रसादयिष्यामि विद्यां चाहरिष्यामि।

सरेन्द्रः : कच ! अस्मत्सम्बन्धपरिज्ञाने कदाचिच्छुक्राचार्यो भवते विद्यां न दद्यादिति विचार्य मया स्वगोत्रकुलनामादेर्गोपनं प्रस्तावितमासीत्। अत्र पुनर्विचारयितुं प्रार्थ्यते भवान्।

कचः : पुनर्विचारस्यावकाश एव नास्ति। विद्यादानं विद्याग्रहणं च सात्त्विकानुष्ठाने स्तः। तत्र छलप्रयोगो विघ्नस्वरूपः। नाहं तत्र राजनीतिं प्रयोक्तुं गच्छामि। कामं भवतु शुक्राचार्यो मत्पितुर्बृहस्पतेः प्रतिपक्षी, दानवानां च गुरुः,

अहं तु विद्यार्जनाय तं शुद्धेनैव चेतसा आराधयिष्यामि।

सुरेन्द्रः : यथा रोचते भवते। वयं तु भवन्तं संजीविनीविद्यासमलंकृतं द्रष्टुकामाः स्मः। भवता वृषपर्वनगरे शुक्राचार्यो द्रष्टव्यः। तेनैव साकं तस्य प्रियसुता देवयानी अपि निवसति। अहं विश्वसिमि, यद् भवान् असुरगुरुं शुक्राचार्यं तत्सुतां देवयानीं च स्वशीलदाक्षिण्यमाधुर्यैराचारेण दमेन च प्रसाद्य संजीविनीं विद्यामवश्यमेव संसाधयिष्यति।

कचः : भवदिच्छा सफला स्यात्। अहं पितुराशिषं गृहीत्वा असुरेन्द्रपुरं प्रति अद्यैव प्रतिष्ठे।

(११)

(वृषपर्वनगरे)

कचः : इदमसुरेन्द्रपुरम्। अहो भव्यता दानवेन्द्रनगरस्य! अयं चाश्रमः शुक्राचार्यस्य। तदुपसर्पामि। इयं कन्या किमु देवयानी एवास्ति? (प्रकाशं) नमस्करोमि कल्याणीम्। अपि नाम शुक्राचार्यपादा आश्रममधितिष्ठन्ति?

देवयानी : स्वागतं भवते। किन्नामधेयं भवन्तं जानीयाम्।

कचः : आचार्यपादानां शिष्यतां कामयमानं ब्राह्मणकुमारं मामवगच्छतु अत्रभवती। अपि नाम तेषां दर्शनं सुलभम्?

देवयानी : क्षणं विश्रम्यताम्! अहं भवदागमनं पित्रे निवेदयामि।

(१२)

(शुक्राचार्यकक्षे)

देवयानी : तात! कश्चिद्विप्रबटुः भवन्तं द्रष्टुम् आश्रमद्वारमधितिष्ठति। भवतः शिष्यतामभिलषति।

शुक्राचार्यः : कि नामधेयः? कुतः समायातः? कस्य सुतः?

देवयानी : इति तु सर्वं मया न पृष्टम्। परं सोऽत्यन्तं सौम्याकृतिस्तेजस्वी च वर्तते। नामधेयादिकं प्रष्टव्यं किम्?

शुक्राचार्यः : अधुना किं प्रक्ष्यसि? अहमेव तं सौम्याकृतिं तेजस्विनं च पश्यामि। चल! (पादुकाध्वनिः)

(१३)

(आश्रमद्वारे)

शुक्राचार्यः : (स्वगतं) यथार्थमाह देवयानी। महानुभावोऽयं विप्रकुमारः। (प्रकाश) कस्त्वं वटो?

कचः : ऋषेरङ्गिरसः पौत्रः, साक्षाद्बृहस्पतेः पुत्रो नाम्ना कचोऽहमाचार्यपादान् सादरमभिवादये।

शुक्राचार्यः : बृहस्पतेः पुत्रः? कथमत्रागमनं तव?

कचः : भगवन्! भवच्छिष्यतां कामयमानोऽस्मि।

शुक्राचार्य : सकलविद्यागुरो बृहस्पतेरात्मजः सन्नपि मच्छिष्यतां कथं कामयसे? त्वया तु स्वयमेव सकलविद्यालिंगितेन भाव्यम्।

कचः : भगवन्! मया स्वपितुरनेका वेदवेदांग-साहित्य-संगीतादिका विद्या गृहीताः सन्ति। किन्तु भवान् ततोऽप्यधिकं सिद्धविद्य इति सर्वजगच्छ्रुतिगोचरो विषयः। अतोऽत्रभवान् मां शिष्यत्वेन परिग्रहीतुं सादरमभ्यर्थ्यते।

ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरौ।
अनुमन्यस्व मां ब्रह्मन् सहस्रं परिवत्सरान्॥

शुक्राचार्यः : (स्वगतं) बृहस्पतेरयं पुत्रः सत्यवाक् स्पष्टवाक् च प्रतीयते। सहस्रवर्षपर्यन्तं ब्रह्मचर्यं धारयितुं संकल्पशीलः। विद्यादानयोग्यं पात्रम्। भवतु मत्परिपंथिनः पुत्रः। यदि सत्पात्रमस्ति तदा मच्छिष्यतामर्हति।

(प्रकाशम्) कच ! ते वचः प्रतिगृह्णामि । देवयानि !

देवयानी : का आज्ञा तात ?

शुक्राचार्य : अयं कचकुमारोऽस्मदाश्रमे स्थित्वा ब्रह्मचर्यं चरिष्यति। अस्यातिथ्यं क्रियताम् । (स्वगतं) पश्यामि कथं सहस्रवर्ष-पर्यन्तं ब्रह्मचर्यं चरति । विद्या गुरुविनयवृत्त्यातिविषमा भवति । किन्तु यद्ययं ब्रह्मचर्यव्रतं सम्यक् परिपालयति तदास्य यौवनं मत्प्रभावात् स्थास्नु भविष्यति । न तत्र सहस्रवर्षानन्तरमपि जरागमनं भविष्यति (प्रकाशं) कच ! त्वया नित्यमेव आश्रमगावश्चारणीयाः । नित्यमेव अग्निहोत्रार्थं समिधः समाहरणीयाः । भगवान् भूतभावनः समर्चनीयः । मदनुपस्थितौ मत्सुताया देवयान्या आज्ञा पालनीया । सहस्रवर्षानन्तरं तव पात्रतां परीक्ष्य तुभ्यं विद्यां दास्यामि ।

कचः : अनुगृहीतोऽस्मि । यथादेशं ब्रह्मचर्यं चरिष्यामि ।

(१४)

(शुक्राचार्याश्रमः । प्रातकाले चटकानां कलरवः)

कचः : गुरुसुते ! सुप्रभातम् । इमा आचार्यवरस्य कृते अग्निहोत्र-समिधः सन्ति । एतानि विल्वपत्राणि । एतानि च पूजार्थं कुसुमानि ।

देवयानी : शोभनम्

कचः : इदानीमहमपि महेशानं समर्चयामि । पुनश्च गाश्चारयितुं वनं यास्यामि । (स्वकुटीरे गच्छति, तत्र च शम्भुं पूजयति)

ॐ नमः शंभवाय च मयोभवाय च,
नमः शंकराय च मयस्कराय च,
नमः शिवाय च शिवतराय च ।

ॐ त्र्यम्बकं यजामहे
सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्यो
र्मुक्षीय मामृतात् ॥

देवयानी : अहो जलधरस्तनितगंभीरघोषः कचस्य !

(कचः भगवन्तं सस्वरं स्तौति)

शंकरं शंप्रदं सज्जनानन्ददं
भावगम्यं परेशं महेशं भजे ।
नीलकण्ठं महाकालकालं विभुं
निर्विकल्पं निरीहं कृपालुं भजे ।
कम्बुकुन्देन्दुकर्पूरगौरं शिवं
पापनाशं वरेण्यं हरं सन्दधे ।
रुद्रमोंकारमूलं भवं कामहं
विश्वनाथं विभूत्यङ्गभूषं भजे ॥

देवयानी : अहो एकाग्रध्यानपरता कचस्य ! अहो स्वरलहरी कचस्य !

(१५)

(शुक्राचार्याश्रमे)

कचः : देवयानि ! अहं गाश्चारयितुं वनं गच्छामि ।

(गोप्रणोदनध्वनिं करोति । गवां वत्सानां च ध्वनिः । घण्टिकाध्वनिः)

देवयानी : गच्छ ! कदा प्रत्यागमिष्यसि ?

कचः : सूर्यास्तवेलातः पूर्वमेवागमिष्यामि ।

(गोरम्भाध्वनिः, गोप्रयाणध्वनिः)

(१६)

(उपाश्रमं प्रत्यावर्तनमार्गे)

कचः : हो हो ! कपिले ! इतः इतः । श्यामे ! इतः इतः । हो वत्स ! इतः इतः ।
(गोरम्भाध्वनिः घण्टिकाध्वनिः)

देवयानी : प्रतिनिवृत्तोऽसि कच ! गोचारणात् ?

कचः : आम् ! इमा आचार्यपादानां सायंतनस्य यज्ञस्य कृते समिधः । एतानि च फलानि भवत्यै समुपाहृतानि ।

देवयानी : अये मत्कृते कथं कष्टमनुभवसि ?

कचः : न हि कष्टमनुभवामि । गुरुसुतायाः प्रसादने आनन्दमनुभवामि !

देवयानी : कच ! त्वया या शम्भोः स्तुतिः कृता आसीत् तामहमपि शिक्षितुमिच्छामि । अपि शिक्षयिष्यसि माम् ?

कचः : अवश्यमेव ! ननु सौभाग्यं मे ।

देवयानी : तर्हि तातपादानां सायंतनयज्ञसमाप्तावेव शिक्षय । अहं स्तुतिमिमामुपवीणयिष्यामि ।

कचः : अपि भवत्याः सकाशे वीणा वर्तते ?

देवयानी : आम्, वर्तते । अहं जानाम्यपि वीणां वादयितुम् किंचित्किंचित् ।

कचः : शोभनम् । अहमपि किंचित् किंचित् वीणावादनं जानामि ।

देवयानी : तर्हि अद्य शम्भुस्तुतिं शिक्षयिष्यसि ?

कचः : अवश्यमेव । शुभः कल्पः ।

(१७)

(शुक्राश्रमे)

शुक्राचार्यः : वत्से देवयानि ! सायन्तनस्य अग्निहोत्रस्य व्यवस्था संजाता ?

देवयानी : संजाता तात ! इमाः समिधः। इदमाज्यम्। इमानि पात्राणि। अयमाहवनीयोऽग्निः। इदम् हव्यम्। सर्वमपि सन्नद्धं तिष्ठति। कचेन मया च सर्वा व्यवस्था कृता।

शुक्राचार्यः : शोभनम् ! युवामपि अग्निहोत्रवलायां मामुपतिष्ठतम्।

देवयानी : युक्तम्। कृतगोचारणोऽयं कचोऽपि स्नात्वा आयात्येव।

कचः : (प्रविश्य) प्रणमामि आचार्यपादान्।

शुक्राचार्यः : तपोनिष्ठो भव। एहि, अग्निहोत्रं कुर्मः।

(सर्वे मन्त्रं पठन्ति)

"उपत्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमोऽभरन्त एमसि।"

ॐ अग्नये स्वाहा !

देवयानी : तात ! कचकृता परेशस्तुतिरतीव हृद्या। न श्रोष्यसि किमु ?

शुक्राचार्यः : कथं न श्रोष्यामि ?

देवयानी : अहं वीणावादनं करिष्यामि।

शुक्राचार्यः : अवश्यं कुरु।

देवयानी : अहमपि तां स्तुतिं कण्ठस्थां करिष्यामि।

शुक्राचार्यः : अवश्यं कुरु।

देवयानी : कच ! आरभ्यताम् शंभुस्तुतिः।

(कचः 'शङ्करं …'इत्यादि शम्भुस्तुतिं गायति। देवयानी वीणां वादयति)

शुक्राचार्यः : साधु गीतम् ! साधु वादितम् !

देवयानी : कच ! अधुनाहं गायामि स्तुतिमिमाम्। त्वं वीणां वादय।

कचः : यथाज्ञापयति कल्याणी।

(देवयानी गायति। कचो वीणां वादयति)

शुक्राचार्यः : साधु गीतम् ! साधु वादितम् ! इदानीं गोशालायां दीपज्वालनं कुरुतम् । अहमपि ध्यानस्थितो भवामि ।

उभौ : यथाज्ञापयति भवान् ।

(अन्तरालसूचकं संगीतम्)

(१८)

(प्रातःकाले शुक्राश्रमे)

देवयानी : किं चलितोऽसि कच ! गाश्चारयितुम् ?

कचः : आम् देवयानि ! किं न पश्यत्यत्रभवती गवां समूहम् ? परमद्यैव कथं पृच्छति भवती ? अहं तु नित्यमेव गाश्चारयितुं वनं गच्छामि । अद्यावधि तु भवत्या कदापि न। पृष्टोऽहम् ?

देवयानी : न जानासि ? अद्य ब्रह्मचर्यव्रतं चरतस्ते पञ्चशतवर्षाणि व्यतीतानि । न जाने किमिव हि मम मनोऽद्य त्वां वनं प्रेषयितुं नेच्छति । इच्छामि यदत्रैवाश्रमे स्थित्वा त्वं गीतेन वीणावादनेन च भगवन्तं शम्भुं प्रसादयेः ।

कचः : कल्याणि ! सायंकालेऽवश्यमेव यथाभवदादिष्टं समाचरिष्यामि । इदानीं गावो वनं प्रति चलिताः सन्ति तासां रोधो नोचितः स्यात् ! तर्हि अनुमन्यस्व मां गाश्चारयितुम् ।

देवयानी : (समानमिव) यथा ते रोचते तथा कुरु । किन्त्वद्य शीघ्रमेव प्रतिनिवर्तस्व ।

कचः : यथाज्ञापयति कल्याणी ।

(१९)

(सांयकाले शुक्राश्रमे)

देवयानी : तात ! तात ! अनिष्टं मे प्रतिभासते ।

शुक्राचार्यः : कोनाम तवानिष्टं कर्तुं क्षमते ? ब्रूहि ! किमेवं कातरासि ?

देवयानी : तात ! भवता अग्निहोत्रमाहुतम्, सूर्यश्चास्तं गतः, गावश्चागोपा एवाश्रमं समागताः, किन्तु कचो नैव दृश्यते ।

शुक्राचार्यः : किं ब्रवीषि देवयानि ?

देवयानी : सत्यं ब्रवीमि तात ! अवश्यमेव कचो व्यापादितो वा मृतो वा स्यात् । तात ! कचं विनाहं न जीविष्यामि ! (रोदिति)

शुक्राचार्यः : वत्से ! असुरगुरोः भार्गवस्य शुक्राचार्यस्य सुता भवन्त्यपि रोदिषि ? यदि कचो मृतोऽस्ति तर्हि अयमहं द्रागेव संजीविनीविद्यां प्रयुज्य तं पुनः संजीवयामि। कृतान्तोदरादपि तं निःसार्य त्वत्सम्मुखं क्षणेनैवोपस्थापयामि।

देवयानी : तात ! प्रयुज्यताम् संजीविनी, मज्जीवनाय । अन्यथाहमपि जीवितं त्यक्ष्यामि ।

शुक्राचार्यः : वत्से समाश्वसिहि ! इयं त्वं कचं स्वसम्मुखे पश्यसि। (शुक्राचार्यः संजीविनी प्रयुङ्क्ते) 'वत्स कच ब्रह्मचारिन् ! अत्रागम्यताम्' ।

(कुक्कुराणां जम्बुकानां च उदरशूलजन्यध्वनिः)

कचः : अयमहं प्रणमामि कचो भगवन्तम् असुरगुरुम् !

देवयानी : (हृष्ट्वा) कच ! कुत्रासीः त्वमेतावत्कालपर्यन्तम् ? कस्माच्चिरायितोऽसि ? अधुना कुतः प्रादुर्भूतोऽसि ?

कचः : भार्गवि ! भवत्यानुमतोऽहं प्रातः गाः नीत्वा वनमगच्छम् । भवदादेशनुसारं वनादद्याहं सायंकालात्पूर्वमेव आश्रमं प्रति प्रस्थितः । समिधः, कुशाः, काष्ठभारं च

गृहीत्वाहं श्रमभारार्तः सन् मार्गे वटवृक्षं समाशिश्रियम्। गावश्चापि सर्वा वृक्षच्छायां समाश्रिताः। तदानीमेव केचिदसुरातस्त्र समागताः—

(फ्लेशबैक्पद्धत्या)

पिंगाक्षः : कोऽसि रे वटच्छायावलम्बी त्वम् ?

कचः : अहं बृहस्पतिसुतः कचोऽस्मि।

लोहिताक्ष : सुराणामस्मद् द्वेषिनां गुरोर्बृहस्पतेः पुत्रः ? सर्पसुतोऽसि ! (पिंगाक्षं प्रति) पिंगाक्ष ! समाप्यैनं खड्गेन ! न जाने कदा किमस्माकमनिष्टमाचरेत् ?

कच : मा मा मां मारयतु।

लोहिताक्ष : शत्रुं यदि न हन्मस्तदा किं मित्रं हन्मः ? पिंगाक्ष ! मां दयां कुरु ! पातय खड्गमस्य स्कन्धे।
(पिंगाक्षः खड्गं चालयति ! कचस्य ग्रीवा कृत्ता)

पिंगाक्षः : लोहिताक्ष ! पश्य सर्पकुमारस्य खण्डद्वयं संवृत्तम्। (अट्टहासं करोति)

लोहिताक्षः : पिंगाक्ष ! खण्डद्वयेनैव कार्यं न सेत्स्यति। अस्य मांसं खण्डशः कृत्वा पेषीकृत्वा च शालावृकेभ्यो जम्बुकेभ्यश्च समर्पणीयम्। एते समायान्ति आघ्रात-मांसाः कुक्कुराः शृगालाश्च।
(कुक्कुराणां शृगालानां च ध्वनिः)

पिंगाक्षः : (मांसखण्डान् पेषीकुर्वन्) हा हा हा ! यथेच्छं भुज्यताम् सुरगुरुसुतस्य मिष्टं मांसं भोः शालावृकाः !
(कुक्कुरध्वनिः)

लोहिताक्षः : पिंगाक्ष ! इदानीं कृतकार्या वयम् ! प्रस्थानं कुर्मः। बृहस्पतिसुतः कचः, सोऽपि वृषपर्वणो नगरस्य समीपस्थ एव वने ! असुरा यथा श्वसन्त्येव नात्र। हुं—(प्रस्थिताः)

(फ्लैशसमाप्तिः)

कचः : किञ्चित्कालानन्तरमेव भार्गवेण महात्मनाहमाहूतः। तदैव कुकुराणां शृगालानां चोदरेभ्यो निःसृत्याहमत्र संजीवितः सन् समायातः।

देवयानी : जीवामि ! तात ! अद्यप्रभृति कच आश्रमे एव स्थित्वा ब्रह्मचर्यव्रतं पालयतु। गोचारणाय अपरः शिष्यो नियुज्यताम्।

कचः : अलं भयेन ! प्रतिदिनं तु एवं न भवति। अद्यावधि पञ्चशतवर्षेषु कदापि नैवं संवृत्तम्।

देवयानी : तूष्णीं भव ! अद्य प्रातरपि मम निषेधमुल्लंघ्य वनं प्रस्थितः आसीः। तस्य फलं भुक्तम् त्वया मया च। इदानीं त्वामाश्रमाद् वहिर्न प्रेषयिष्यामि। (शुक्राचार्यं प्रति) तात ! आज्ञापयैनमत्रैव स्थित्वा ब्रह्मचर्यं पालयितुम्।

शुक्राचार्यः : उचितं भणति देवयानी। कच ! त्वया आश्रमें स्थित्वैव गोसेवा कार्या। अद्यप्रभृति त्वं गोचारणाय वने न गमिष्यसि। देवयान्या साकं स्वाध्यायस्त्वया कर्त्तव्यः। आश्रमपादपानां सेचनं पोषणं च कर्त्तव्यम्। यदा देवयानी त्वां वहिराश्रमं प्रेषयेत्तदैव त्वमितो वहिर्गच्छेः। अपि गृहीतोऽर्थस्त्वया ?

कचः : यथादिशति भार्गवः। आज्ञा गुरूणां परिपालनीया।

शुक्राचार्यः : देवयानि ! कचस्य कृते मंगलाचारं कुर्याः !

देवयानी : मया प्रथममेव एतत्कृते विचारितमासीत्। अद्यास्य पंचशतवर्षाणि व्यतीतानि तपश्चरतः।

(मांगलिकध्वनिः)

(२०)
(देवयानी-कुटीरे)

(प्रातःकालीनपक्षिध्वनिः)

कचः : देवयानि ! मया स्वाध्यायः कृतः। गावोऽपि सेविताः। आश्रमपादपा अपि सिक्ताः। अन्यत्किमनुष्ठेयम् ?

देवयानी : कच ! अविदूरस्थ एव सरसि कमलानि विकसितानि सन्ति। कतिपयानि कमलानि आनेतुमर्हसि। अतिदूरं मा गाः। अहमद्य कमलवलिना शंभुमर्चयितुमिच्छामि।

कचः : पूजायै कश्चिद्विशिष्टावसरोऽस्ति ?

देवयानी : अद्य मम जन्मदिवसोऽस्ति।

कचः : वर्धापनम। अयमहमनुपदमेवायामि कमलानि गृहीत्वा। अहमपि भगवतो भूतभावनस्य विशेषस्तुतिं करिष्यामि।

देवयानी : शोभनम् ! न नु शीघ्रमेव आगच्छेः।

(२१)

देवयानी : (स्वगतं) प्रातःकाले कचः कमलानि आहर्तुं समीपस्थं तडागं गत आसीत् किन्तु इदानीं यावन्न प्रतिनिवृत्तः। किं नाम कारणं भवेत् ! किमु चिरकालात् आश्रम-परिधिगतः पंजरबद्धः केसरी इव सः अद्य उन्मुक्तं वातावरणं लब्ध्वा वनश्रियं द्रष्टुं दूरङ्गतो भवेत् ? नहि तेनैतादृशेन प्रमादिना भाव्यम्। स तु मज्जन्म-दिवसोपलक्ष्ये शम्भोर्विशिष्टां स्तुतिं कर्तुं भणति स्म। कुत्र नु खलु गतो भवेत् ? अथवा दानवानां हस्तेषु तु न पुनरपि निपतितो भवेत्। तातपादं पृच्छामि। इदानीं तु अस्तंगमनवेला समायाति। सोऽपि सायंत-नाग्निहोत्राय सज्जो भवेत्। (गच्छति)

(२२)

(शुक्राचार्यकुटीरे)

दवयानी : तात ! कचोऽद्य पुनः क्वचिद्विलुप्तः ।

शुक्राचार्यः : किं भणसि देवयानि ?

देवयानी : सत्यं भणामि तात ! प्रातर्मदर्थं कमलान्याहर्तुं गतः किन्त्वधुनावधि न निवृत्तः । धिङ् मज्जन्मदिवसम् यत्कृते मया कमलबलिना भगवान् भूतभावनः समर्चनीयः संकल्पित आसीत् ।

शुक्राचार्यः : पुत्रि ! न त्वया स्वजन्मदिवस उपालब्धव्यः । अहमधुनैव संजीविन्या विद्यया कचमत्रोपस्थापयामि ।

(सञ्जीविनीं प्रयुङ्क्ते)

'वत्स ! कच ! बृहस्पतिसूनो ! यत्र कुत्राप्यसि, द्रागेवात्र एहि ।'

(समुद्रवीचिनां गर्जनम्)

कचः : अयमहं प्रणमामि गुरुवरं भगवन्तम् असुरगुरुं कवितनयं भार्गवं शुक्राचार्यम् !

देवयानी : कच ! मामाश्रमपदे विहायाद्य क्व, पलायितोऽभूः ?

शुक्राचार्यः : वत्स कच ! अद्य केन गृहीतस्त्वम् ? सुस्पष्टं वद !

कचः : भगवन् । यदाहं देवयान्यै कमलान्याहर्तुमाश्रमात्किञ्चिद्दूरमेव गत आसम् तदा दानवैरहं गृहीतः—

(फ्लैशबैकपद्धत्या)

अंगारकः : क्व प्रयासि रे बृहस्पतेः पुत्रक ! चिराद् दृष्टोऽसि ।
(दानवः) शुक्राचार्यस्य संजीविनी त्वां कदापर्यन्तं पुनरुज्जीवयिष्यति । गुरोः भीता वयमाश्रमं न प्रविशामः—इत्यस्यायमाशयस्तु नास्ति यत्त्वमव-

ध्योऽसि संवृत्तः ! अद्य तव प्राणान्तो भविता । इष्टं स्मर !

कचः : व्रतस्थोऽहम् । न मां व्यापादयन्तु भवन्तः । अहं देवयान्यै कमलानि आहर्तुमागतोऽस्मि । मयि तत्र न सम्प्राप्ते तस्याः जन्मदिनपूजा न सम्पद्येत ।

अंगारकः : अरे, तस्या जन्मदिवसपूजा अस्माभिः सम्पाद्यते तव मरणदिनसम्पादनेन ! अस्माभिर्ज्ञातमस्ति यत्त्वं संजीविनीं विद्यां सिसाधयिषसि ? न वयं दानवा इमां विद्यां शत्रुहस्ते समर्पयिष्यामः । इयं विद्यास्माकं कल्याणायैवास्मद्गुरोः सकाशे स्थास्यति ।

कचः : विद्यादानं नाद्यैव करिष्यते आचार्यपादैः । पूर्वं तु मया सहस्रवर्षपर्यन्तं ब्रह्मचर्यव्रतं पालनीयमस्ति । अद्य मां गुरुसुतायै कमलानि दातुमनुजानन्तु भवन्तः । पुनः कदापि स्वेष्टं पूरयन्तु ।

अंगारकः : अतीव बुद्धिमानसि देवगुरोरात्मज ! न वयं स्वशत्रुं हस्तगतमेवं मुंचामः । अयं त्वमस्माभिः व्यापाद्यसे ।

(कण्ठरोधध्वनिः)

धूम्राक्ष ! मृतमिमं कचं पेषयित्वा समुद्राम्भसि मिश्रय ।

धूम्राक्षः : यथाज्ञापयति भवान् ।

(मांसकुट्टन ध्वनिः)

कचः : अंगारक ! अयं समुद्राम्भसि मिश्रितः कचदेहः । (समुद्र-ध्वनिः)

(फ्लैश समाप्तिः)

होरात्रयं मया समुद्रांभसि लीनेन व्यतीतम् । इदानीमेव भवताहमाहूतोऽभूवम् । तदनुसारं समुद्राम्भसो निर्गत्याहं भवत्पुरः समागतोऽस्मि ।

देवयानी : दिष्ट्या पुनरागतोऽसि। कथं मया मन्दभाग्यया त्वं कमलान्याहर्तुं प्रेषित आसीः।

कचः : क्षन्तव्योऽस्मि देवयानि ! समये कमलान्यानेतुं न क्षमोऽभवम्।

देवयानी : भवतु। न कमलानि आहृतानि, त्वमागत-इत्येव बहुतरम्। मत्कृते त्वया कानि कानि कष्टानि न सोढानि !

कचः : न किमपि कष्टं सोढम्। भवत्याः कृपया तु अहं पुनरुज्जीवामि।

देवयानी : इदानीं सहस्रवर्षपूर्तिं यावत्त्वया आश्रमे एव स्थातव्यम्। न कुत्रापि गन्तव्यम्।

कचः : यथेच्छति कल्याणि।

(अन्तरालसूचकं संगीतम्)

(२३)

(कचकुटीरे)

(प्रसन्नतासूचकं संगीतकम्)

देवयानी : ब्रह्मन् ! नमस्ते ! किं जानासि यदद्य तव ब्रह्मचर्यव्रतं पूर्णं भवति। सहस्रवर्षपर्यन्तं त्वया ब्रह्मचर्यं सम्यक् परिपालितम्। अद्य तातस्तुभ्यं विद्यां दास्यतीति मन्ये। कच ! वर्धापनम्।

कचः : अनुगृहीतोऽस्मि देवयानि ! सहस्रं वर्षाणि दिनत्रयमिव व्यतीतानि। अत्र कारणम् आचार्यपादानां भवत्याश्च अनुग्रह एव। अद्याहं गुरुपूजार्थं वनान्तात् पुष्पाणि आनेष्यामि। वस्तुतो गुरुप्रसादादेवाहमद्य पूर्णव्रतो भवामि।

देवयानी : कच ! त्वया आश्रमाद् बर्हिर्न गन्तव्यम् ।

कचः : देवयानि ! न भेतव्यम् । इदानीं यावत्सुरक्षितोऽस्मि । अग्रेऽपि गुरोरनुग्रहेण सुरक्षित एव स्थास्यामि । अद्य मया आचार्यपादाः विविधैः पुष्पैरवश्यमेव पूजनीयाः सन्ति । शीघ्रमेव प्रतिनिवर्त्स्ये पुष्पसम्भारं गृहीत्वा ।

देवयानी : तर्हि मत्कृतेऽपि पुष्पाणि समानय । (स्वगतं) अहमपि पुष्पहारं निर्माय सम्पूर्णव्रतस्य तव सम्मानं करिष्यामि ।

कचः : यथाज्ञापयति अत्रभवती ।

(२४)

(देवयानी कुटीरे)

(पादुकाध्वनिः)

शुक्राचार्यः : देवयानि ! कचः क्वास्ते ? अद्य तस्मै मया संजीविनी विद्या देयास्ति । नियमस्थितनेन तेन सहस्रवर्षाणि व्यतीतानि ।

देवयानी : तात ! मयापवारितोऽपि स भवत्पूजार्थं पुष्पाणि आहर्तुं वनान्तं गतः । भणति स्म यद् गुरोः कृपया सर्वमपि भद्रं भविष्यतीति ।

शुक्राचार्यः : वत्से ! अहमद्यापि तस्यानिष्टमुत्प्रेक्षे ।

देवयानी : पितः ! मा मैवं भणतु । अनिष्टमपवारयतु ! यतः कुतोऽपि कचं समाहूय अत्रोपस्थापयतु ! तात ! (रोदिति)

शुक्राचार्यः : वत्से ! धैर्यं धर ।

देवयानी : पितः ! कचं विनाहं न जीवेयमिति सत्यं ब्रवीमि । अधुनैव तमाहूय तस्मै विद्यां ददातु । यदि सोऽन्यथागतिं प्राप्तस्तदाहमपि जीवितं त्यक्ष्यामि (रोदिति) ।

शुक्राचार्य :

बृहस्पतेः सुतः पुत्रि ! कचः प्रेतगतिं गतः ।
विद्यया जीवितोऽप्येवं हन्यते करवाणि किम्?
मैवं शुचौ मा रुद देवयानि
न त्वादृशी मर्त्यमनुप्रशोचते ।
यस्यास्तव ब्रह्म च ब्राह्मणाश्च
सेन्द्रा देवा वसवोऽथाश्विनौ च ।
सुरद्विषश्चैव जगच्च सर्व-
मुपस्थाने संनमन्ति प्रभावात् ।
अशक्योऽसौ जीवयितुं द्विजातिः
संजीवितो वध्यते चैव भूयः ॥

देवयानी-मैवं भणतु तातः ।

यस्याङ्गिरा वृद्धतमः पितामहो
बृहस्पतिश्चापि पिता तपोनिधिः ।
ऋषेः पुत्रं तमथो वापि पौत्रं
कथं न शोचेयमहं न रुद्याम् ?
स ब्रह्मचारी च तपोधनश्च
सदोत्थितः कर्मसु चैव दक्षः ।
कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये
प्रियो हि मे तात कचोऽभिरूपः ॥

शुक्राचार्यः-किं करवाणि ? असंशयं मामसुरा द्विषन्ति

ये मे आगतान् शिष्यान् सूदयन्ति ।
अब्राह्मणं कर्तुमिच्छन्ति रौद्रा-
स्ते मां यथा व्यभिचरन्ति नित्यम् ।
अप्यस्य पापस्य भवेदिहान्तः
कं ब्रह्महत्या न दहेदपीन्द्रम् ?

एते जाल्मा असुराः स्वराजनीतौ विद्यामपि कर्षयन्ति। धिगेतान्। परन्तु वत्से। त्वं शोकं मा गाः। अहमधुनैव कचं समाह्वयामि—

(संजीविनीं प्रयुङ्क्ते—'वत्स! कच ? अत्रागच्छ'। (कचो विद्ययोपहूतः सन् शुक्राचार्यजठरादुत्तरं ददाति)

कच : प्रसीदतु भगवन्! भवत्पुत्रोपमः कचोऽहमित एव भवज्जठराद्भवन्तमभिवादये !

शुक्राचार्यः : (स्वगतं) आश्चर्यम्। कचो मम जठरादुत्तरं ददाति। कथं तत्रास्य गमनं घटितम्? (प्रकाशं) कच! त्वं केन पथा ममोदरे उपनीतस्तिष्ठसि ? सत्वरं ब्रूहि !

कचः : (उदरात्) भगवन्! भवतः प्रसादान्मां स्मृतिर्न जहाति। यथा यच्च वृत्तं तत्सर्वं स्मरामि। परं भवत उदरं-विदीर्याहं बहिरायातुं नेच्छामि। यतो ह्येवं मे तपसः क्षयो भवेत्। गुरुघ्नतायाः पातकं कदापि न स्वीकरिष्ये अतः क्षन्तव्योऽस्मि भवत आह्वाने यन्नाहं भवत्पुरः समुपतिष्ठामि।

शुक्राचार्यः : दूरे तिष्ठतु बहिरागमनम् प्रथमेतत्तु ब्रूहि कथं त्वम् ममोदरे संप्रविष्टः इति ?

कचः : भगवन्! अहं स्वब्रह्मचर्यव्रतस्यान्तिमे दिने गुरुपूजार्थं देवयान्याः कृते च पुष्पाण्याहर्तुमाश्रमाद् बहिरगच्छम्। किन्तु नातिदूरे एवाहं दानवैर्निगृहीतः

(फ्लेशबैकः)

दानवः : क्व चलितोऽसि रे बृहस्पतितनय ?

कचः : अहं गुरुपूजार्थं पुष्पाण्याहर्तुं प्रस्थितोऽस्मि।

दानवः : श्रूयतेऽद्य तव ब्रह्मचर्यव्रतस्यान्तिमो दिवसः ?

कचः : सत्यं भणति भवान्।

दानवः : तव जीवनस्याप्यन्तिमो दिवसोऽस्त्यद्य । वारद्वयं शुक्राचार्यकृपया जीवितोऽसि किन्त्वस्मिन् वारे त्वं पुनः संजीवितो नैव भवितासि ।

कचः : भवन्तो मां वारम्वारं कथं मारयन्ति ? अहं तु भवतां किमप्यनिष्टं नाचरामि ।

दानवः : किमस्मात्परमस्माकमनिष्टं स्याद् यत्त्वं देवानाम्-अस्माकं शत्रूणां-सुरक्षायै संजीविनीं विद्यां ग्रहीतु-कामोऽसि ! न वयं त्वां सफलं दिदृक्षामः । अद्यैवं मारितः स्याः यथा न पुनरुज्जीवितो भविष्यसि ।

कचः : भो दानवाः ! मा मैवं कुर्वन्तु । मया गुरुचरणा वन्द-नीयाः सन्ति । मया गुरुसुतायै पुष्पाणि दातव्यानि सन्ति ।

दानवः : अस्माभिरपि कृतान्ताय तव जीवनं दातव्यमस्ति । असुरनगराद्वहिः शुक्राचार्यसाधिता विद्या नैव यास्यति । अयं म्रियसे त्वम् !

(कण्ठरोधध्वनि । हस्तपादप्रक्षेपध्वनिः)

(आश्वस्य) मृतोऽयं कचः । अधुनास्य देहो दग्ध्वा चूर्णयितव्यः । अयं चिताग्निः प्रज्वाल्यते (काष्ठक्षेपण-ध्वनिः) । अयं दह्यते कचः (अर्चिध्वनिः) अचिरादेव भस्मनि परिणतः स्यात् । किन्तु समुद्र जलादपि यदा कचदेहकणाः परस्परं संयुज्य जीवितास्तदेदानीमपि कचस्य पुनर्जीवनं कथं न शंकितं स्यात् ? को नु उपाय-स्तिष्ठति येन शुक्राचार्योऽप्येनं पुनरुज्जीवयितुं न शक्नुयात् ?

(घूर्णयन्ती मदिरा समुदेति)

मदिरा : उपायश्चिन्त्यते ? अहमस्म्युपायः ।

दानवः : सुन्दरि ! का त्वम् ? कुतूहलं वर्धयसि ?

मदिरा : मूर्खाः। नावगच्छथ माम्? अहमस्मि मदिरा। अहमस्मि वारुणी। अहमस्मि सुरा। मत्कृपया यूयं स्वोद्देश्ये सफलाः भवितुमर्हथ।

दानवः : कथमिव?

मदिरा : मयि कचस्य भस्म सम्मिश्र्य मां शुक्राचार्यं पाययथ। स्वास्थ्यवतां स्वास्थ्यं, बलवतां बलं, स्मृतिवतां स्मृतिं, विवेकिनां विवेकम्, उदाराणामौदार्यं, विद्यावतां विद्यामह हेलयैव हर्तुं क्षमा! जीवितानां मारणायाहममोघोपायोऽस्मि। मयि कचस्य भस्म मिश्रितं यदि स्यात्तदा कचः पुरुज्जीवयितुमेव नेच्छेत्। नापि मां निपीय शुक्राचार्यस्तमौदार्येण पुरुज्जीवयितुकामः स्यात्। मूर्खा दानवाः। मां शरणं गच्छथ। अहं मदिरा। अहं वारुणी! अहं सुरा! (समदं हसति)

दानवः : युक्तं भणसि मदिरे! अद्यावधि क्व स्थिता आसीः? अद्य वयं त्वां शरणं गच्छामः। त्वयि कचस्य भस्म मिश्रयित्वा वृषपर्वणः सभायां स्थिताय शुक्राचार्याय त्वां दास्यामः।

(फ्लैशबैकसमाप्तिः)

कचः : भगवन्! मम भस्म दानवैर्मदिरायां मिश्रितम्। तच्च स्वर्णपात्रे निधाय मधुरपेयच्छलेन भवते दत्तम्। इदानीमहं भवता आहूतो भवदुदरात्प्रतिब्रवीमि! प्रभो! अहमत्रैव स्थित्वा कष्टानि सहे! किन्तु गुरोरुदरविदारणं न करोमि।

शुक्राचार्यः : दुष्टे मदिरे। त्वया गुरुशिष्यौ द्वावपि स्वसम्पर्केण संकटं प्रापितौ। (निःश्वस्य) वत्से देवयानि! अधुना

तव किं प्रियं करवाणि ? कचस्य जीवनं मम वधेनैव संभवति। मद्गतः कचो मत्कुक्षिभेदनं विना न बहिरागन्तुं शक्नोति।

देवयानी : (रुदती) तात ! कचस्य नाशो भवतश्चोपघातः- शोकाग्निकल्पौ द्वावपि मां दहेताम्। कचस्य नाशेऽहं जीवनपर्यन्तं शान्तिं न लप्स्ये, भवतश्चोपघातेऽहं जीवितुं न शक्नोमि। किमर्थं जीवाम्यहं मन्दभाग्या ? अहमपि गरलं निपीय जीवनं समापयामि।

शुक्राचार्यः : दानवैर्यदाचरितं तत्त्वाचरितमेव। कथम् अहमपि मदिरां निपीय स्ववर्चो विस्मृतवान् ? देवयानि ! शोकं मा गाः अहमधुनैवं तव जीवनं रक्षामि। अहमधुनैव कचं स्वोदराद्बहिरानयामि। उदरस्थायैवाहं सञ्जीविनीं विद्यां ददामि। सिद्धविद्योऽयं ममोदरं विदार्य बहिरागत्य मां विद्याप्रयोगेण पुनर्जीवयिष्यति। (कचं प्रति)

'संसिद्धरूपोऽसि बृहस्पते सुत !
यत् त्वां भक्तं भजते देवयानी।
विद्यामिमां प्राप्नुहि जीविनीं त्वं
न चेदिन्द्रः कचरूपो त्वमद्य ॥

न निवर्तेत् पुनर्जीवन् कश्चिदन्यो ममोदरात्।
ब्राह्मणं वर्जयित्वैकं तस्माद्विद्यामवाप्नुहि ॥

पुत्रो भूत्वा भावय भावितो मा-
मस्मद्देहादुपनिष्क्रम्य तात।

समीक्षेथा धर्मवतीमवेक्षां
गुरोः सकाशात् प्राप्य विद्यां सविद्यः ॥

कचः : (उदरात्) अयमहं संजीविनीं विद्यां गृह्णामि ! भगवन् यथाभवदादिष्टमधुनैव समाचरामि !

(विस्फोटोपमध्वनिः)

देवयानी : (स्वगतं) आश्चर्यम् ! पौर्णमास्यां निशामुखे प्राच्यां दिशि यथा नवेन्दुरुदेति तथैव गृहीतसंजीविनीविद्योऽयं कचस्तातोदरान्निष्क्रान्तः। इदानीं च विद्यया तात संजीवयति। नाहमस्मिन् कर्मणि विघ्नमुत्पादयामि। तूष्णीमेव तिष्ठामि।

कचः : साक्षाद्ब्रह्मराशे ! गुरो शुक्राचार्य ! उत्तिष्ठतु भवान्। एष प्रणमामि भवन्तं भवच्छिष्योऽहं कचः।

शुक्राचार्यः : (उत्थाय) वत्स ! चिरंजीव ! सिद्धविद्योऽसि !

कचः : आचार्यपाद ! यदपि मत्काशे दृश्यते तत्सर्वमपि भवतोऽनुग्रहस्यैव फलम्। गुरुरेव हि शिष्यस्य माता पिता च भवति—

यः श्रोत्रयोरमृतं संनिषिञ्चेद्
विद्यामविद्यस्य यथा ममायम्।
तं मन्ये पितरं मातरं च
तस्मै न द्रुह्येत् कृतमस्य जानन् ॥

ऋतस्य दातारमनुत्तमस्य
निधिं निधीनामपि लब्धविद्याः ।
ये नाद्रियन्ते गुरुमर्चनीयं
पापाँल्लोकांस्ते व्रजन्त्यप्रतिष्ठाः ।।

भगवन् ! लब्धविद्येन मया गुरुदक्षिणा भवते कथं समर्पणीया स्यात् ?

शुक्राचार्यः : वत्स ! शिष्येण गुरवे दक्षिणावश्य देया स्यात् । अद्य मया सुरापानाद् वंचना संज्ञानाशश्च प्राप्तौ । विद्यावतां विद्यासाधकानां च कृते सुरापानमत्यन्त-महितकरम् । यदि त्वं मह्यं दक्षिणां दित्सुरसि तर्हि प्रतिज्ञा क्रियताम् यत्कदापि सुरां न पास्यसि यतो हि ममेयं भविष्यवाणी—

'यो ब्राह्मणोऽद्यप्रभृतीह कश्चि-
न्मोहात् सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्मा ब्रह्महा चैव सः स्या-
दस्मिंल्लोके गर्हितः स्यात् परे च ।।'

वत्स ! यथा त्वं गर्हितो न स्यास्तथा प्रतिजानीहि ।

कचः : आचार्यपाद ! अयमहमङ्गिरसः पौत्रो बृहस्पते पुत्रो भवतः शिष्यः कचः प्रतिजाने यत्कदापि सुरापानं न करिष्ये ।

शुक्राचार्यः : प्रीतोऽस्मि । अधुना दानवास्ते भीतिमुत्पादयितुं न समर्थाः । सहस्रवर्षाणि तपश्चरित्वाधुना त्वं मत्तुल्य-

प्रभावोऽसि संवृत्तः। महात्मासि! ब्रह्मभूतो ब्राह्मणोऽसि। यथेष्टं स्थानं वस ! अहमिममुदन्तं दानवेभ्यो दातुं वृषपर्वणः सभायां गच्छामि !

देवयानी : (सोल्लासं) अहो ! कचः सिद्धविद्योऽस्ति संवृत्तः ! तातोऽपि संजीवितः। मुदो न मान्ति मे मनसि। अहमद्य त्रिलोक्यां प्रसन्नतमा बालास्मि । कचो मामिदानीमाकारयिष्यति । अहमपि तं वर्धापयिष्यामि।

(प्रसन्नताद्योतकं क्षिप्रं वीणावादनसंगीतम्)

(२५)

कचः : देवयानि ! नमस्करोमि अत्रभवतीम्। सहस्रवर्षपर्यन्तं भवत्याः मत्कृते बहु कष्टं सोढम् । भवत्प्रेरणयैव गुरुपादैरहं वारंवारं संजीवितः। इदानीं समावृतव्रतोऽहं गुरुणा त्रिदशावासं प्रस्थातुमनुज्ञातोऽस्मि। शब्दाः न सन्ति मत्पार्श्वे यैर्भवत्याः कृतज्ञतां व्यक्तीकरामि। इदानीं भवत्यपि अनुमन्यताम् मां त्रिदशपुरीं गन्तुम्।

देवयानी : कच ! इदानीं यावन्मया स्वमनोगतं भवते न निवेदितम्। किन्तु त्वयि त्रिदशपुरीं प्रति यातुकामे सति कथं मौनमाकलयेयम् ?

कचः : ननु भणतु स्वमनोगतम् गुरुपुत्री।

देवयानी : किमु वाचा प्रकाशनीयमेव स्यात् ? कच ! इदानीं यावद्भवतो भक्ताहम् अस्मात्परं पूज्यबृहस्पतेः पुत्रवधूः भूत्वा तत्सेवां कर्तुम् अर्हामि किम् ?

कचः : भद्रे ! भवती मत्कृते माननीया गुरुसुतास्ति। न भवत्यायं प्रस्तावः करणीयः।

देवयानी : कच ! न त्वं मम पितुः पुत्रोऽसि ! मया साकं तव विवाहो न अयुक्तः स्यात्। त्वयि मे निश्चला प्रीतिरस्तीति निवेदयन्त्यपि अहं भृशं लज्जे। कथं शपथैस्त्वयि स्वभक्तिं प्रीतिं च विभावयानि ? धर्मज्ञ कच ! न मामनागसं त्यक्तुमर्हसि !

कचः : शुभव्रते ! माम् अनियोज्ये नियोगे कथं नियुनंक्षि ? त्वं मह्यं गुरोर्गुरुतरासि। विशालाक्षि ! यत्र भवत्या उषितं तत्रैव काव्यस्य कुक्षावहमप्युषितोऽस्मि। अतो भवती धर्मतो मे भगिनी अस्ति। धर्मभावना अस्माद्विवाहान्मां रुणद्धि।

देवयानी : कच ! अतीव धार्मिको भवसि। सनातनं धर्मं कैतवप्रोज्झितं प्रेमाणं तिरस्कृत्य आरोपितां रूढिं ख्यापयसि ? उपरिष्टादत्यन्तं विनीतो मधुरश्च दृश्यसे किन्तु चेतसि अत्यन्तं निष्ठुरोऽसि। वंचक ! इदान समुतचिमनुनयं त्यक्त्वा यद् ब्रवीमि तच्छृणु—

'यदि मां धर्मकार्यार्थे प्रत्याख्यास्यसि याचितः।
ततः कच न ते विद्या सिद्धिमेषा गमिष्यति ॥'

(आघात-संगीतम्)

(किञ्चिद्विरामानन्तरम्)

कचः : देवयानि ! मया तव प्रत्याख्यानं कस्मादपि दोषान्न

कृतमपितु 'त्वं मम गुरुसुतासी' ति कृत्वा कृतम्। अस्मिन् विषये गुरुणापि अहं नानुज्ञातोऽस्मि। देवयानि! आर्षं धर्मं ब्रुवाणोऽहं त्वया कामतः शप्तोऽस्मि न तु धर्मतः। त्वं धर्मस्य फलं कामरूपेणेच्छसि। देवयानि! तव शापमहमंगीकरोमि। परं शृणु, तवापि कामना सफला न भविष्यति। 'ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति।' अपि च देवयानि!

'फलिष्यति न ते विद्या यत्त्वं मामात्थ तत्तथा।
अध्यापयिष्यामि तु यं तस्य विद्या फलिष्यति॥'

एषोऽहं त्रिदशालयं गच्छामि।

देवयानी : हा तात! भवतः शिष्येणातिदुष्करमाचरितम्। ('ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति' इत्यस्य प्रतिध्वनिः) भवता यस्मै विद्या दत्ता तेन मह्यं शापो दत्तः। (मूर्च्छिता)

(२६)

(सुरनगरप्रत्यावर्तनमार्गे निःशब्दता)

कचः : (स्वगतं) सहस्रवर्षाणि व्यतीतानि यदाहमनेन मार्गेण असुरेन्द्रनगरमागच्छम्। कियत् परिवर्तनं संवृत्तम्! तस्मिन् दिने मार्गपार्श्वस्थिताः पादपाः मामाकारयन्त इव दृश्यन्ते स्म किन्त्वद्यैते वृक्षा मौनमाकलय्य मामधिक्षिपन्त इव लक्ष्यन्ते! देवयानीं शप्त्वा मया स्वतपसो

हानिरेव कृता । का आवश्यकतासीत् प्रतिशापदानस्य ? यदि देवयान्याहं शप्तस्तदा मया दोषेण दोषस्य प्रतिवादो नैव कर्त्तव्य आसीत् ? कथं नु चैतत्संवृत्तम् —विभावयन्नपि न विभावयामि ?

मदिरा : (साट्टहासं) विभावयितुमिच्छसि ?

कचः : कासि त्वम् !

मदिरा : विस्मृतोऽसि माम् ? सर्वात्मना मयि विलीयापि मां न प्रत्यभिजानासि ? कच ! अहं मदिरास्मि अहं वारुणी! अहं सुरा !

कचः : ओः ! तर्हि त्वमेवासि अस्य दुःखान्तनाटकस्य सूत्रधारिणी ? तवैव प्रभावादेतत्संवृत्तम् ? एकवारं त्वयि मम भस्म किं मिश्रितम्, त्वया चिरकालं यावन्मम मनःसन्तुलनमेव नाशितम्, मम स्वभावे परुषता समानीता, मम विवेको नाशितः, धैर्यधुरीणस्यापि मम धैर्यं विलोपितम् । त्वत्सम्पर्कात्पूर्वं मया कदापि देवयानी नापमानितासीत् किन्तु त्वत्सम्पर्कादूर्ध्वं मया सा वराकी अभिशप्ता । महिममयी नारीशक्तिरेव अधिक्षिप्ता । ओः देवयानि ! भृशमनुतप्तोऽस्मि ! त्वया मत्कृते किं किं न कृतम् ? परं मया त्वयि दारुणमाचरितम् । क्षमस्व मां देवयानि ! क्षमस्व !

मदिरा : ऋषिपुत्र ! विस्मर देवयानीम् । इयमहं त्वां विनोदयामि ।

कचः : दूरमपेहि दुष्टे !

मदिरा : किमिति ?

कचः : तव चिन्तनमपि जनस्य कृते अभिशापः, का वार्ता सम्पर्कस्य। त्वया सह किंचित्-कालसम्पर्काद् यदा सिद्धविद्यस्यापि मम स्वभावोऽसन्तुलितः संजातस्तदा तेषां का दशा स्यात् ये अनिशं तव प्रभावे तिष्ठन्ति ! किं न जानासि गुरोः शुक्राचार्यस्य मर्यादाम् ?

मदिरा : का सा मर्यादा ?

कचः : इयं सा विश्रुता मर्यादा
(शुक्राचार्य ध्वनिः)

यो ब्राह्मणोऽद्यप्रभृतीह कश्चि-
न्मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्मा ब्रह्महा चैव सः स्याद्
अस्मिँल्लोके गर्हितः स्यात् परे च ॥



हरियाणा-संस्कृत-साहित्य-सौरभम्

(विंशशताब्दीयसंस्कृतसाहित्याय हरियाणाप्रदेशस्य योगदानम्)

(पं रामेश्वरदत्त शर्मा, संस्कृत प्रवक्ता, राजकीय स्नातकोत्तर महाविद्यालयः भिवानी (हरियाणा) १२५०२१)

हरियाणा-प्रदेशोऽसौ, प्रथितः शौर्य-सम्पदि ।
साहित्ये संस्कृतौ कृष्यां ललिते च कलाविधौ ॥१॥
वावदूकत्वमेवैषाम् अनर्गल वदन्ति ये ।
'हरियाणा-प्रदेशीयाः पण्डताः सन्ति रंगडाः ॥२॥
बभूवुरथ विद्वांसो, लेखकाः कवयो बुधाः ।
प्राथसत् कोऽपि नेहेत्थं, प्रथयेयुरिमे यतः ॥३॥
इति ज्ञात्वा प्रवृत्तोऽहम्, पाययितुं बुधान् सुधाम् ।
भाषा-भावविहीनोऽपि, कथ्य-तथ्यविलेखने ॥४॥
भाति पुण्यतमा प्रान्ते 'भिवानी' नगरी, यतः ।
'हीरादासो'[1] यशो लेभे, 'दादूरामोदयेन' वै ॥५॥
चतुर्विंशति-सर्गेषु निर्ममे काव्यमुत्तमम् ।
आदिकाव्यमिदं प्रान्ते, रामायणञ्च भारते ॥६॥
तत्रैवास्थानमास्थाय, 'सीताराम'[2] सुधीर्महान् ।
'वाराणस्याश्च' विद्वद्भ्यो 'निजविद्वत्त्व-कारणात् ॥७॥

---

१. 'दादूरामोदयमहाकाव्यम्' स्वामी हीरादास सं० १९४७, प्र० गंगाविष्णु खेमराज श्री वेंकटेश्वर प्रेस बम्बई, पृ० १५७

२. साहित्योद्देशः विद्यामार्तण्ड पं० सीताराम शास्त्री, संवत् १९८०, प्र० शंकरलाल शिव नारायण तिवाड़ी, सागू व्राड़ी (मारवाड़) पृ० २५६.

उपाधिमाददे श्लाघ्यम्' 'विद्यामार्तण्ड' नामकम् ।
'साहित्योद्देश' ग्रन्थञ्चालिखद् बालहितेच्छया ॥८॥
'रिटोली' ग्राम-सौभाग्यम्, छज्जूराम:[3] सुधी-श्रुत: ।
उपाधिनादृतो विज्ञैर्विद्यासागर-संज्ञया ॥९॥
पञ्चसर्गात्मकं काव्यम् 'महीपाल' कथानकम् ।
सुलतानचरित्राख्यं, रचयामास य: पुरा ॥१०॥
'शिवकर्णामृतं' तस्य 'परशुरामदिग्जयम्' ।
महाकाव्ये च शोभेते, यथा चन्द्रदिवाकरौ ॥११॥
'दुर्गाऽभ्युदय' नाम्नाऽन्यत्, सप्ताङ्कैर्यद् विभाजितम् ।
नाटकं, 'विबुधैतिह्यं' 'रत्नावली' च राजते ॥१२॥
आचार्यत्वं, कवित्वञ्च, पण्डितेऽस्मिन्नशोभत ।
'साहित्यबिन्दु' नामाऽस्य, साहित्येऽपि महीयते ॥१३॥
'बास' वासी तपोऽभ्यासी, 'वनमाली'[4] च दासक: ।
'वृन्दावन' प्रवासी सन्, मध्वाचार्यपथानुग: ॥१४॥

---

३. (१) सुलतानचरितम् पं० छज्जूराम विद्यासागर, संव० १९४७, स्वयं, देहरादून
(२) शिवकथाऽमृतम्, : समः, सं० १०३१, स्वयं, बगीची माधोदास-दिल्ली, पृ० २१३
(३) परशुरामदिग्विजयमहाकाव्यम्, समः, सं० २०२५, साहित्य भण्डार मेरठ, पृ० ११२
(४) दुर्गाभ्युदयनाटकम्, समः, सं १९८८, गयादत्त प्रेस क्लौथ मार्केट दिल्ली, पृ० ७४
(५) विबुधरत्नावली, समः, सं० २०११, -सुमेर प्रकाशन, दिल्ली पृ० १८८
(६) साहित्यबिन्दुः, समः, सं० २०१८, मेहरचन्द लक्ष्मणदास दिल्ली पृ० २३१

४. (१) श्रीकृष्णानन्दमहाकाव्यम्, श्रीवनमालिदास शास्त्री, सं० २०३१, स्वयं-कृष्णानन्द स्वर्गाश्रम वृन्दावन (यू०पी०) पृ० १८३

'कृष्णानन्दं, 'हरिप्रेष्ठं' काव्यं सख्यसुधाकरम् ।
अन्या अपि कृती रम्याः प्राणैषीच्चाथ भूयसीः ॥१५॥
'माधवाचार्य'[5] नामासीत्, शास्त्रार्थिषु महारथी ।
'कौल' ग्रामे जनिं लब्ध्वाः 'दिल्ल्या' मुवास सन्ततम् ॥१६॥
'कवीरचरितं' तस्य, 'टुडेस्मृति' प्रहासकम् ।
त्रीणि पुस्तानि विद्यन्ते, परतत्त्वविवेचनम् ॥१७॥
'बरला' ग्राम-वास्तव्यः, शिवरामो[6] विचक्षणः ।
प्रणिन्ये लघु काव्यं यो, हरियाणीयवैभवम् ॥१८॥
जन्मनालङ्कृतः 'पञ्चाब्' 'हरियाणा' च कर्मणा ।
'सत्यदेवेन'[7] वैद्येन, 'भिवानी' धामवासिना ॥१९॥
'सत्याग्रहस्य नीत्याख्यं, पञ्चांध्याय्या न्यवध्यत ।
भाष्यं 'विष्णुसहस्रस्य', 'श्रीनाडीतत्त्वदर्शनम्' ॥२०॥

---

(२) श्रीहरिप्रेष्ठमहाकाव्यम्, समः, सं० २०३३ समः-पृ० २५८
(३) श्रीसख्यसुधारकरः समः, सं० २०३२, समः पृ० ६०
(४) श्रीवनमालिप्रार्थनाशतकम्, श्रीराधारमणशतकम्, श्रीभक्तनाम मालिका, अनेकविधस्तोत्राणि च, समः, सं० २०३२ समः पृ० १३६

५. (१) कबीरचरितम् पं० माधवाचार्य, धर्मधाम, धर्म प्रैस, कमला नगर दिल्ली, समः
(२) टुडे स्मृतिः समः
(३) परतत्त्वदिग्दर्शनम् समः

६. हरियाणावैभवम्, शिवराम शास्त्री, सं० २०१६, स्वयं मनमोहन प्रिंटिंग प्रैस, दिल्ली, पृ० १०१

७. (१) सत्याग्रहनीतिकाव्यम्, पं० सत्यदेव वासिष्ठ, सं० २०१५, स्वयं, गुरुकुल झज्जर, पृ० २३४
(२) विष्णुसहस्रनामसत्यभाष्यम्, समः, सं० २०२६ देवसदनमहम दरवाजा भिवानी, पृ० १२४१
(३) नाडीतत्त्वदर्शनम्, समः सं० २०२४, स्वयं देवसदन महमगेट भिवानी, पृ० २३६

रोहतकान्तिके ग्रामे, 'छोटी घिलौड' नामके।
'हजारीलाल'[८] उद्भूतो विंशतिकृतिकारकः ॥२१॥
'पञ्चापीयधराजातो, 'हरदत्तो'[९] द्विजोत्तमः।
प्रणीय कीर्तिमापेदे '[अ]रथल-वोहर' आश्रमे ॥२२॥
अष्टादश शतैः श्लोकैः, 'मस्तनाथस्य वृत्तकम्'।
सार्धद्विशतपद्यानि, 'श्रेयोनाथ'स्य योगिनः ॥२३॥
'अम्बाला' कवि-मूर्धन्य-'श्रीविद्याधर'[१०] शास्त्रिणः।
'मुक्तक चैव मञ्जरं'पाञ्चजन्यञ्च नाटकम् ॥२४॥
आधुनिक - समस्यानां, समाधानात्मकं परम्।
कोमलाङ्गुलिसुश्लोकैः आकारयति पाठकान् ॥२५॥
'यमुनानगरे' ख्यातः, 'सत्यदेवः'[११] समाहितः।
सर्वात्मना हुतात्मा यो, देववाणी विवृद्धये ॥२६॥

---

८. (१) शिवप्रतापविरुदावली, पं० हजारीलाल, सं० २०३०, स्वयं, प्रेमनगर, रोतहक, पृ० २२
(२) संस्कृतमहाकविदिव्योपाख्यानम्, समः, सं० २०२८ समः पृ० ४०
(३) इन्दिराविजयप्रशस्तिशतकम्, समः, सं० २०३३ समः पृ० ३८
(४) महर्षिदयानन्दप्रशस्तिशतकम्, समः सं० २०२६, समः, पृ० २७
(५) कादम्बरीशतकम्, समः, सं० २०२८, समः, पृ० १७
(६) सगुणब्रह्मस्तुतिशतकम्, समः, सं० २०३२, समः, पृ० ६०
(७) श्रीपरशुरामविजयवैजयन्ती, समः, सं० २०३६, समः, पृ० ३६
(८) रामहृदतीर्थमाहात्म्यम्, समः, सं० २०३८, समः, पृ० १८

९. श्रीमस्तनाथचरितम्, पं० हरदत्त शास्त्री, सं २०२७ महन्त श्रेयोनाथ योगी अरथल बोहर (रोहतक) पृ० ३८४

१०. (१) मुक्तकमञ्जरम् (काव्यम्) डा० विद्याधर धस्माना, सं० २०३२, २८५ महेश नगर, अम्बाला छावनी, पृ० १२०
(२) पाञ्चजन्यम् (एकांकीनाटकसंग्रहः), समः, सं० २०३२, समः, पृ० ७२

११. संस्कृतं कुराणम्, सत्यदेव वर्मा, सं० २०४१' २६९१ लक्ष्मी पब्लिकेशन्स बारादरी, बल्लीमारान, दिल्ली

अनूदितं 'कुरानम्' हि, देववाण्यां विपश्चिता।
आविशा विविधाः सन्ति, कृतयोऽस्याऽप्रकाशिताः ॥२७॥
ग्रामणी 'छिछड़ानायां', 'चन्द्रभानु'[१२] व्यधत्त वै।
'गाङ्गेयाख्यं महाकाव्यम, अर्धमुद्रितभागकम् ॥२८॥
'शंकरलाल[१३] शर्माऽपि, 'डेरोली नांगले' मतः।
'ऋतुविहार' काव्यं हि, 'राजस्थाने' जुगुम्फ सः ॥२९॥
'वल्लवगढ़' भालेन्दुः, प्रज्ञाचक्षुश्च 'लक्ष्मणः[१४]।
लघूनि पञ्च काव्यानि, युक्तियुक्तपदानि वै ॥३०॥
प्रणीय च मुदाऽमन्दमानन्दमनुमन्यते।
कवयितुं नवं काव्यं, नेत्रिणः प्रेरयत्यसौ ॥३१॥
'राधाकृष्णो'[१५] य आचार्यो, 'लुहारी'ग्राम - भूषणः।
:हर्याणवैभवं काव्यम्, चतुःसर्गेषु सृष्टवान् ॥३२॥
'इन्दिरायाः प्रशस्ते'स्तु 'शान्ति राठी[१६] विधायिका।
लेखिकाऽस्ति न वा चान्यो ? विवादोऽत्र विजृम्भते ॥३३॥

---

१२. गाङ्गेयमहाकाव्यम् चन्द्रभानु शास्त्री, सं० २०३६, स्वयं, तुलसी निकेतन छिछड़ाना जिला सोनीपत, पृ० १६९

१३. ऋतुविहारः, वैद्य शंकरलालशर्मा, २०१६, सूर्य प्रैस रत्नगढ़ (राजस्थान) पृ० ११२

१४. (१) कालरात्रिः, श्री लछमन सिंह अग्रवाल, सं० २०३२, बल्लवगढ़, (हरियाणा) पृ० १२
(२) राष्ट्रदर्पणः, समः, समः सं० २०३७, समः, पृ० ३०
(३) विज्ञानगीतम्, समः सं० २०३८, समः, पृ० २६
(४) कुटुम्बिनी, समः, सं० २०३९, समः, पृ० २४
(५) पद्यपुष्पवाटिका, समः, सं० २०४०, समः पृ० १९

१५. हरियाणावैभवम्, आचार्य राधाकृष्णः, सं० २०३२ धनश्याम शर्मा अम्बाला छावनी, पृ० १०४

१६. इन्दिराप्रशस्तिशतकम्, शान्ति राठी, सं० २०३७, मदनलाल जैन, सोनीपत पृ० ११६

'रामेश्वरस्य'[१७] मन्दस्य, 'भकलाना'स्ति जन्मभूः।
अध्यापनञ्च छात्राणां, संस्कृतसेवने रुचिः ॥३४॥
न्यबध्न तु सोऽपि 'वृत्तन्तु, 'हर्याण संस्कृत'स्य हि।
सर्वं तद् यद् विलेख्यं वै, मन्दाक्रान्त सुगुम्फितम् ॥३५॥
केवलं पद्य-निर्माणे, पुस्तगा न हि पण्डिताः।
गद्ये 'मदनलाले'[१८] स्म, भाति विचारवीथ्यपि ॥३६॥
'ववान्या'मदभुतो विज्ञो, गौरीशकर[१९] भिक्षुकः।
सिद्धान्तपदार्थानां, लक्षण संग्रहं न्यधात् ॥३७॥
'वारणा' ग्राम सम्भूतो, भिक्षारामो[२०] बधाहृतः।
'पाणिनेः' सूत्रजालन्तु समकैप्सीत् स्वसूत्रकैः ॥३८॥
'शिवनारायणः'[२१] शास्त्री, 'गतौली' ग्राम भूसुरः।
टीकया शोभयामास, 'सांख्यतत्त्वस्य' कौमुदीम् ॥३९॥
यत् किमपि मयाऽलेखि, सर्वं तद् तै प्रमाणितम्।
निर्णयन्तु समीक्ष्येदं, पण्डिताः किमु रंगडाः[२२] ? ॥४०॥
साक्ष्यं मान्याः! यदिच्छन्ति, निःसङ्कोचं लिखन्तु माम्।
यथाशक्ति हि सेविष्ये, हरियाणाहितेप्सया ॥४१॥



---

१७. **हरियाणासंस्कृतवृत्तम्** रामेश्वर दत्त शर्मा, सं० २०३९, हरियाणा संस्कृत सम्मेलन, ३ विकास नगर भिवानी, पृ० १९६

१८. **विचारवीथी (निबन्धमाला)** डा० मदन लाल वर्मा, सं० २०४०, मन्थन पब्लिकेशन, २२ आर माडल टाउन, रोहतक, पृ० १००

१९. **सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः**, भिक्षु गौरी शंकरः, सं० १०१६ ज्योतिष प्रकाशन प्रैस काशी, पृ० ३०२

२०. **शब्दज्योत्स्ना (सन्ध्यन्तः प्रथम भागः)**, भिक्षाराम शास्त्री, सं० २०१५ कुरुक्षेत्र विश्वविद्यालय कुरुक्षेत्र, पृ० २०

२१. **सांख्यतत्त्वकौमुद्यां सारबोधिनी**, सं० १९९७, निर्णय सागर प्रैस बम्बई

२२. **रंगड़ः**, तस्करो लुण्ठको हिंसको यायावरो भवति। केचन पण्डिताः प्रायेण हरियाणापण्डितान् 'रंगड़'शब्देन अवमानयन्ति, तान् प्रत्येषयत्नः।

कश्चित्

(गजलगीतिः)

[ज्ञानोपाह्व डा० बच्चूलाल अवस्थी, सागरः (म०प्र०)]

पुरा सापाङ्गभङ्गं स्वाङ्गमाजोगुप्यते कश्चिद् ।
पुनः स्मेराननं भ्रूभ्रामणैश्चोकुप्यते कश्चित् ॥
असौ तूष्णीकता, ते विभ्रमाः, सा चंक्रमा दृष्टिः ।
परिष्वङ्गेषु लीलालोचनैर्लालप्यते कश्चित् ॥
न विस्मर्तुं न वा स्मर्तुं यथावत् पारये किञ्चित् ।
स्वयं सन्ताप्य सावज्ञं मुधा तातप्यते कश्चित् ॥
भ्रमं स्वप्नं सुषुप्तं वा तुरीयं वाभिमन्येरन् ।
मदीयां चेतनां सर्वात्मना लोलुप्यते कश्चित् ॥
क्षणास्ते हन्त तप्ते सैकते पाथःकणा जाताः ।
न मे रोरुष्यते कश्चिन्न वा तोतुष्यते कश्चित् ॥



प्रियया विना !

(गजलगीतिः)

(डा० विन्ध्येश्वरी प्रसाद मिश्रः 'विनयः')

अद्य मे चेतो मुदं तनुते न हन्त, यया विना ।
किं करोमि सखे ! कथं जीवामि तत्प्रियया विना ।।
निर्भरं चुम्बतितरां प्रियमम्बरं ननु चन्द्रिका
किन्तु मे हृदि सैव कृष्णा शर्वरी नु तया विना ।।
मन्दमन्दमुपैति गन्धवहोऽलिगुञ्जितमञ्जुलः
प्रीयते न मनस्तथापि विलासवल्लभया विना ।।
सा भृशं सम्पीडिता रुद्धा वसत्यलकासु भोः !
तत्प्रियो नु भ्रमामि पर्वत-पर्वते प्रभया विना ।।
अस्य शापस्यावधिर्वद पूर्णतामेष्यति कदा ?
मानसं रमते मनागपि नो सुमञ्जुलया विना ।।



प्रकाशन-चर्चा

रंजनकथमाला (प्रथमं पुष्पम्) : ले० डा० कमल अभ्यंकर। प्रका० देववाणीमन्दिरम्, मुम्बई, ४००००४। १९८३। मूल्यम् ५-००।

अस्यां पुस्तिकायां त्रिंशत्संख्याकाः लघुकथाः सुबोधभाषायां लिखिताः सन्ति। बालानां कृते एतासां विरचनं सञ्जातम्। संस्कृते बालसाहित्यमपि विरच्यते-इत्यस्य प्रमाणमियं रञ्जनकथामाला। कांगो-कोरिया-लोककथाधारेणापि द्वे कथे अत्र निबद्धे। द्वित्रिमिनटपर्यन्तकालेनैव कथा पूर्यते। नूनमयं प्रयासोऽभिनन्दनीयः। यदि संस्कृतानुरागिणः स्वबालकान् इमाः कथाः श्रावयेयुस्तदा नूनमेव ते क्रीडासक्ता एव संस्कृतेन परिचिता भविष्यन्ति।

पुस्तकान्ते मराठी-हिन्दी भाषयोः संस्कृतशब्दानामर्थं दत्त्वा लेखिका बालानां कृतेऽपरामपि सुविधां समुपस्थापितवती।

शिष्टहास्यमेतासां कथानानां जीवातु-भूतम्। असमासा अत्यल्पसमासा वा बालस्तरानुसारिणी भाषा सर्वत्र दर्शनीया। उदाहरणार्थमेका कथा "अलं ते भयेन" इति शीर्षका अविकलरूपेणात्र समुपस्थाप्यते :—

अलं ते भयेन

"अथ एकदा कश्चित् प्रियावियुक्तः प्रियकरः स्वदुरवस्थां प्रति दुःखम् अकरोत्। स्वसुहृदम् अवदत्, "अहम् अहर्निशं मत्प्रियाम् अनुस्मरामि। एवं किल कथयन्ति, यत् यदि कोऽपि कमपि वस्तुजातं सततं चिन्तयति, तर्हि कालान्तरेण सः एव तद्वस्तुरूपत्वं गच्छति। मद्वल्लभायाः सततम् अनुस्मरणात् अहम् क्वचित् नारीरूपतां गमिष्यामि इति मे भीतिः। अतः दुःखितोऽहम्" इति।

तस्य सुहृद् तम् कामिनम् अवदत् "रे मित्र, अलं ते भयेन। यतः तथा संजाते अपि, त्वां सततम् अनुस्मरन्ती ते वल्लभा पुरुषरूपा भवेत्" इति।

डा० कमल अभ्यंकरमहाभागा अस्याः कृतेर्विरचनार्थं देववाणी-मन्दिराध्यक्षः संस्कृतसेवापरः श्री भि० वेलणकर महाभागश्चास्याः प्रकाशनार्थं भूयो भूयोऽभिनन्द्येते।



देववाणी-परिषद्वार्ता

(१) देववाणी-परिषदो नवमः सङ्कल्पनादिवससमारोहः सम्पन्नः

२१.८.१९८४ ई० तारिकायां नवदिल्ल्याः 'रामायण-विद्यापीठे' देववाणी-परिषदो नवमः सङ्कल्पना-दिवसः ससमारोहं सम्मानितोऽभूत्।

अस्मिन्नवसरे मुख्यातिथिना डा० कर्णसिंह-महाभागेन परिषत्प्रकाशितो डा० हरिनारायणदीक्षित-लिखितश्च 'संस्कृत-साहित्य में राष्ट्रिय भावना' इत्येतन्नामको ग्रन्थः समुन्मीलितः संस्कृत-नाट्यकलाकाराश्च समभिनन्दिताः। तेनोक्तम् यत् संस्कृत नाम कस्यचित् धर्मविशेषस्य वर्णविशेषस्यैव वा भाषा नास्ति, अपितु मानवमात्रार्थं महानुपहारोऽस्ति। संस्कृत-साहित्यं राष्ट्रभक्ति-भावनां विश्वमङ्गलमूलकमानवीयभावनां च जागरयितुमद्भुतां शक्ति निदधाति।

कार्यक्रमस्य प्रारम्भः श्रीमती शीला घोषाल-कु० मोमिता घोषालाभ्यां मनोहरस्वरेण प्रस्तुतया भारती-सुरभारतीवन्दनया सञ्जातः। भारत सर्व-कारस्य योजनायोगे संयुक्तसचिवेन लब्धप्रतिष्ठेन संस्कृतकविना श्री श्रीसुन्दर-राज-महाभागेन देववाणी-परिषदः संस्तवः स्वरचितेषु संस्कृतपद्येषु प्रस्तुतः।

परिषदो महासचिवेन डा० रमाकान्तशुक्लेन विज्ञापितं यत्परिषदा अद्यावधि चत्वारिंशत्प्रायाः संस्कृत-ग्रन्थाः प्रकाशिताः सन्ति; प्रतिवर्षं च संस्कृतनाट्यसमारोह-कविसम्मेलनाक्षरश्लोकादिसमायोजनद्वारा परिषद् जनेषु संस्कृतं प्रति रुचिं, जागरयितुं यथाशक्ति प्रयतते।

समारोहस्याध्यक्ष्यं परिषदध्यक्षैराचार्य रमेशचन्द्र शुक्ल महाभागैः कृतम्। तैः परिषत्प्रकाशिता ग्रन्था अपि मुख्यातिथिमहाभागाय उपायनीकृताः।

(२) 'अर्वाचीनसंस्कृतम्' षड्वर्षाणि अत्येति

१५.१०.१९८४ ई० तारिकायाम् 'अर्वाचीनसंस्कृतम्' षष्ठं वर्षं पूरयति। अद्यावधि अस्य नियमतः प्रकाशनं जायते। अग्रेऽपि भूयादिति परमेशः प्रार्थ्यते। सदस्यानां न्यूनता, ग्राहकशुल्कस्यानियतप्राप्तिः, महर्घता, समुचितानुदाना-भावः इत्यादयो विषया अस्मिन् प्रमोदावसरे न संकेतनीयाः, केवलं परिश्रम एव आराधनीय इति सम्पादकस्य मतम्। (रमा शुक्ला)

संस्कृत-वार्ता

(१) सागरविश्वविद्यालये शोधसंगोष्ठी सम्पन्ना

'संस्कृत-साहित्ये इस्लामपरम्पराया अवदानमि'त्यमु विषयमधिकृत्य सितम्बरमासस्य २०, २१, २२ तारिकासु सागरनगरस्थ - डा० हरिसिंहगौर विश्वविद्यालयस्य संस्कृतविभागे विश्वविद्यालनुदानायोगस्य साहाय्येनैका अखिलभारतीयशोधसंगोष्ठी समायोजिता। गोष्ठ्यामस्यां देशस्य नाना दिग्भ्यः समागतानामेकविंशद् विदुषां पंचाशत्प्रायाणां स्थानीयानां च पण्डितानां सम्मेलनं संजातम्।

संगोष्ठ्या उद्घाटनं २०.९.१९८४ तारिकायां प्रातः नववादने संस्कृत हिन्दी-भाषयोः प्रथितयशसां साहित्यकाराणां डा० विद्यानिवासमिश्रमहाभागानामाध्यक्ष्ये म०प्र०-उच्चशिक्षानुदानायोगाध्यक्षाणां डा० श्यामाचरण-दुबेमहोदयानां करकमलाभ्यां सम्पन्नम्। अवसरेऽस्मिन् मुम्बापुरीतः समायाताः सुरगवीसमुपासकाः प्रसिद्धाः पण्डितवर्याः श्रीमन्तो गुलामदस्तगीर-अब्लासअलीबिराजदारमहाशयाः मुख्यातिथय आसन्। संगोष्ठ्याः संचालकेन डा० राधावल्लभत्रिपाठिना समागतानां सुधियां सभाजनं समाचरता गोष्ठ्या अनुबन्धः प्रत्यपादि। अस्मदीया परम्परा धर्मविशेषे वा न पर्यवस्यति, अपितु विश्वमेकनीडायितं कुर्वती नानावर्गीयान् नानाधर्ममताद्यवलम्बिनो जनान् वा स्वसामर्थ्येन औदार्यसंजीवनशक्त्या परस्परमनुकूलयति, अत एव मोहम्मदीया संस्कृतेन भूरिशो रचनामकार्षुस्तथैव संस्कृतपण्डिता अपि इस्लामपरम्परां तदनुयायिनो वा अधिकृत्य प्रभूतं साहित्यं रचनाम्बभूवुरित्यासीत् तस्य वक्तव्यस्य स्वारस्यम्। मुस्लिमशासकाः कथं संस्कृतं पोषयाम्बभूवुस्तथैव कथं तानधिकृत्य पण्डितैः सहस्रशः चरितकाव्यानि प्रशस्तयो वा विरचितानि, आरब्यपारसीकभाषयोः संस्कृते संस्कृताच्चैतयोर्भाषयोरतिप्राचीनकालादेव कथं साहित्यानुवादपरम्परा प्रसृतेति श्रीमता त्रिपाठिना सप्रमाणं निरूपितम्। उद्घाटनाभाषणं कुर्वता डा० दुबे महाशयेन भारतीयताया अवबोधविषये स्वीयं सचिन्तित मतमुपन्यस्तम्, अस्मत्संस्कृतेः सामासिकं च स्वरूपं प्रकटी-

कृतम्, यत्र इस्लामपरम्पराया अंशदानं लक्ष्यालक्ष्यतया विलसति। पं० गुलाम-दस्तगीरअब्बासअलीबिराजदारमहाभागः स्वीये मसृणनिष्यन्दितस्पन्दे संस्कृत-भाषणे वैदिकपौराणिकमङ्गलाचरणपूर्वकं धर्मभाषयोरन्योन्याश्रयत्वं संस्कृत-भाषायाश्च सार्वजनीनत्वं स्फुटमभिव्यानक्। अध्यक्षेण डा० मिश्रवर्येण संस्कृत्योः मिथः सम्मिश्रणे संकरस्थाने संसृष्टिमूरीकुर्वता साहित्यस्य वृहत्तर भूमिका विशदं निरूपिता। विश्वविद्यालयस्य कुलपतिः श्री एम०वी० मल्होत्रा सर्वेभ्यः स्वागतं व्याहरन् १९८२तमे वर्षे विश्वविद्यालयानुदानायोगसाहाय्येन समायोजिते अखिलभारतीयन्यायदर्शनोच्चतराध्ययनप्रशिक्षणसत्रे पं० बद्रीनाथशुक्ल - पं० रामप्रसादत्रिपाठिप्रभृतिभिर्मूर्धन्यैर्नैयायिकैः विहितानां प्रवचनानां तदुपरि प्रशिक्षणार्थिप्राध्यापकैरुपस्थापितानां प्रश्न-शंकादीनां शास्त्रार्थचर्चानां समाधानानां च संक्षिप्तं संकलनं **'न्यायसत्रम्-'** नाम पुस्तकं सद्यः प्रकाशितमस्मिन्नवसरे विमोचितवान्।

संगोष्ठ्यां समाविष्टेषु षट्सत्रेषु अष्टत्रिंशत् शोधलेखा पठिताः। तत्र प्रथमे सत्रे डा० कृष्णदत्तवाजपेयीमहोदयो 'मुगलकालिकाभिलेखीयसन्दर्भ-साक्ष्ये संस्कृतसाहित्याय इस्लामस्यावदानम्,' जम्मूविश्वविद्यालयस्य संस्कृत-विभागे आचार्याध्यक्षा श्रीमती वेदकुमारी घई 'कश्मीरसुरत्राणानां संस्कृत सेवा', शिवपुरीस्थशासकीयमहाविद्यालये संस्कृतविभागाध्यक्षः डा० सीता-राम दातरे 'अकबरेण समादृताः जैनसंस्कृतविद्वांसः' विभागीयो डा० बालशास्त्री च 'अब्दुल्लाहचरितस्य ऐतिहासिकसन्दर्भा'—इत्यादिलेखेषु मुगलकालिकमितिहासमज्ञाततथ्यगवेषणपुरस्सरं परीक्ष्यन्ते स्म। सत्रेऽस्मिन्न ध्यक्षता डा० वाजपेयिना विहिता।

द्वितीये सत्रे अलीगढमुस्लिमविश्वविद्यालयस्य डा० नजीरमोहम्मदः अध्यक्षतामकरोत्। तत्र मध्यकालिकसंस्कृतमहाकाव्येषु चित्रितम् इस्लाम-साम्राज्यचरितमवलम्ब्य प्रयागविश्वविद्यालयीयो डा० राजेन्द्रमिश्रः, अर्वाचीन-संस्कृतकविषु इस्लामसाहित्यप्रभावमवलम्ब्य देहलीवास्तव्योऽर्वाचीनसंस्कृत-पत्रिकायाः सम्पादको डा० रमाकान्तशुक्लः, खानखानाब्दुलरहीमस्य संस्कृत-साहित्यसर्जनां विषयीकृत्य इन्दौरसंस्कृतमहाविद्यालयस्य प्राध्यापको डा० लक्ष्मणनारायणशुक्लः दाराशिकोहस्य महनीयं कर्तृत्वमधिकृत्य डा० नजीर-मोहम्मदश्च शोधपत्राणि पठितवन्तः।

तृतीये सत्रे संगीतायुर्वेदज्योतिर्विद्यादिशास्त्रीयविषयेषु इस्लामपम्पराया अवदानमधिकृत्य विविधा विपश्चिदपश्चिमा व्याख्यातवन्तः। तत्र लक्ष्मण-

पुरवास्तव्यः सर्वगन्धासम्पादकः डा० वीरभद्रः, सागरनिवासी डा० वी० एल० अवस्थी, आकाशवाण्यां संस्कृतवार्ताप्रवाचको डा० पतञ्जलिकुमारः, सागरीयः पं० सुन्दरलालशास्त्री, डा० हर्षद धौलकिया, श्रीमती सुधा मलैया, डा० वीरेन्द्रमोहनश्च स्वस्वविषयजातं सम्यक् प्रत्यपादयन्। अध्यक्षता चास्य सत्रस्य डा० वेदकुमारीघईमहाभागया निर्व्यूढा।

चण्डीगढस्थपंजाबविश्वविद्यालये संस्कृतविभाग आचार्यपदमलंकुर्वतो डा० देवीदत्तशर्ममहाभागस्य आध्यक्ष्ये चतुर्थसत्रं प्रारभत्। तत्र 'उपनिषत्सु इस्लामदर्शनस्य समन्वयपीठिका—अल्लोपनिषत्' इति शीर्षकमवलम्ब्य प्रथमं रीवास्थ टी०आर०एस० महाविद्यालयस्य संस्कृतविभागाध्यक्षेण डा० भास्कराचार्यत्रिपाठिना साधु समाम्नातम्। अनन्तरं शृङ्गारमंजरीमधिकृत्य विभागीया डा० कुसुम भूरिया, प्रणामीसम्प्रदायमादाय हिन्दीविभागीय-प्राध्यापकेन डा० लक्ष्मीनारायणदुबेमहाशयेन, जातकपद्धत्युद्धरण-खानखाना चरितं चावलम्ब्य डा० प्रेमनारायण द्विवेदिना, खानखानाचरिते ऐतिहासिक-वृत्तं सूक्ष्मेक्षिकया गवेषयता नागपुर-विश्वविद्यालयस्य डा० के०आर० जोशी महोदयेन अकबरस्य कार्मण्यविषये डा० नारायणशंकरशुक्लेन च स्वीयानि पत्राणि पठितानि।

पंचमे सत्रे 'पारसीकपदप्रकाशं' गृहीत्वा डा० देवीदत्त शर्मा, सेकशुभोद-यायाः भाषाशास्त्रीयमध्ययनमादाय डा० भगवानदीनमिश्रः, अन्यं पारसीक-पदप्रकाशं प्रकाशयन् डा० नारायणशंकरशुक्लः अध्यक्षतां सम्पादयंश्च उस्मा-नियाविश्वविद्यालयीयः डा० पी०जी० लाल्ये नवरसमंजर्यामादिलइब्राहिम-शाहचरितं विवृण्वन् समीचीनतया तथ्यानि प्रकटीचक्रुः।

अन्तिमे सत्रे इन्दौरसंस्कृतमहाविद्यालयस्य प्राचार्यः डा० हर्षदरायधौल-किया अध्यक्षोऽभवत्। तत्र सुलैमच्चरितम्, पण्डितराजे पारसीकप्रभावम्, जगद्विजयच्छन्दः तत्कर्तारं कवीन्द्राचार्यसरस्वतीम्, अकबरनामेति ग्रन्थस्य महेशठक्कुरकृत-संस्कृतानुवादम्, पारसीतः अनूदितान् ग्रन्थांश्चाधिकृत्य कु० अवस्थी-डा० सत्पाल नारंग-डा० नारायणशंकरशुक्लादयो विवेचनं कृतवन्तः।

अतः परं सान्ध्यवेलायां गोष्ठ्याः समापनं समभवत्। समापनसत्रस्य मंगलाशंसनं डा० विन्ध्येश्वरीप्रसादमिश्रेण सद्योविरचितसंस्कृतपद्यप्रसूनानि विकीर्य भावसान्द्रेण वचसा निर्व्यूढम्। अनन्तरं प्रतिनिधिरूपेण डा० देवीदत्तशर्मा साधुवादपुरस्सरं संगोष्ठ्याः समग्रमपि कार्यजातं प्रशशंस, संचालकेन डा० राधावल्लभत्रिपाठिना विषयस्योपसंहृतिं विधाय धन्यवाद-

मुखेन प्रास्थानिकमभिनन्दनं व्यधायि । समापन-सत्राध्यक्षाणां श्रीत्रिलोचन-शास्त्रिणामाध्यक्ष्यभाषणेन साकं संगोष्ठीयं परिणतिमाप ।

संगोष्ठ्या द्वितीयेऽह्नि सायं षड्वादनवेलातः पंचाशत् संख्याकश्रोतॄणां समुपस्थितौ प्रथितयशसां संस्कृतकवीनां काव्यकल्लोलिनी सहृदयानमन्दानन्द-पदमुपदिशन्ती समुल्ललास । अस्यां डा० बी०एल० अवस्थीमहाभागानामाध्यक्ष्ये डा० भास्कराचार्य-त्रिपाठिवर्याणां रसनिर्भरसंचालकत्वे च प्रायशः पंचदशकविभिः स्वीयाः कविताः श्राविताः । तेषु प्रयागीयो डा० राजेन्द्रमिश्रः, देहलीतः समागतो डा० रमाकान्तशुक्लः, लक्ष्मणपुरीयो डा० वीरभद्रः, सागरीयो डा० राधावल्लभत्रिपाठी, अध्यक्षवर्यो अवस्थीमहाभागश्च श्रोतृभि, साधुवादपुरस्सरं चर्चिताः । डा० विन्ध्येश्वरीप्रसादमिश्रस्य गलज्जलिकाद्वयी, डा० के०आर० जोशी महोदयस्य निर्वाचनगीतम्, डा० घईमहाभागाया डा० सत्यपाल नारंगस्य च व्यंग्यरचनाः श्रीरामलखनपाण्डेयस्य मुक्तकं चापि श्रोतृभिर्भूरिशः शंसिताः ।

(प्रस्तोता—डा० विन्ध्येश्वरी प्रसाद मिश्रः)

(२) पारिजातस्य द्वितीयवर्षपूर्तिः

कानपुरतः प्रकाशितं सत् 'पारिजातं' नाम मासिकं सुरभारतीपत्रं १९८४ वर्षस्य जुलाईमासे द्वितीयाब्दं सोल्लासं पूरयित्वा तृतीयाब्दे प्रविष्टम् । पत्रस्य सम्पादका डा० प्रकाशमिश्रशास्त्रिप्रभृतयो निर्देशका परामर्शदातृणश्चपत्रस्य नियमितप्रकाशनार्थं वर्धापनीयाः सन्ति । पारिजातस्य सौरभ्यं दिशि दिशि प्रसरतु !

(३) उत्तरप्रदेश-संस्कृत-अकादम्या वार्षिकोत्सवः

लखनऊ-नगरे रवीन्द्रालये ३०-३१.८.१९८४, १-९-८४ ई० तारिकासु उ०प्र० संस्कृत-अकादम्याः त्रिदिवसीयो वार्षिकोत्सवः सम्पन्नः । अस्मिन्नवसरे कविसम्मेलनं, नाट्यप्रदर्शनं विविधाश्च प्रतियोगिताः समनुष्ठीयन्त ।

(४) आकाशवाण्याः दिल्ली-केन्द्रात् संस्कृतरूपकं प्रसारितम्

२.१०.१९८४ ई० तारिकायां गान्धि-जयन्त्यवसरे, डा० रमाकान्त-शुक्लेन ग्रथितं निर्देशितं च 'महात्मा' इतिशीर्षकं संस्कृत रेडियोरूपकं प्रसारितमभूत् । अर्धघण्टापरिमितेऽस्मिन् रूपके लेखकेन गान्धिपरकसंस्कृतरचना अवलम्ब्य महात्मगान्धिनो जीवनस्य परिचयः प्रस्तुतः । सस्वरश्लोकपाठः

स्वयं लेखकेन कृत:, वाचक-वाचिकयोर्भूमिके श्री सुरेशपन्त-कु० शशिबाला-गुप्ताभ्यां सुरुचिरं निर्व्यूढे। श्री गोपाल सक्सेना प्रस्तुतिसाहाय्यमाचचार।

(५) श्रीलालबहादुर शास्त्रि-केन्द्रीय-संस्कृत-विद्यापीठं आवासीयपरिसर उपराष्ट्रपतिना उद्घाटित:

९.१०.१९८४ ई० तारिकायां नवदिल्ल्या: श्रीलालबहादुरशास्त्रि केन्द्रीय संस्कृतविद्यापीठस्य नवनिर्मित आवासीयपरिसरो मुख्यातिथिना भारतस्य महामहिमोपराष्ट्रपतिना श्री रामस्वामि-वेंकटरामन्महाभागेन समुद्घाटित:। केन्द्रीयशिक्षामन्त्री श्रीमती शीला कौलमहाभागा समारोहस्याध्यक्ष्यं व्यधात्। केन्द्रीयउपशिक्षामन्त्री श्री पी० के थुंगनमहाभागोऽतिथीनां स्वागतं चकार। प्राचार्येण डा० मण्डनमिश्रमहाभागेन विद्यापीठस्य प्रगतियोजनानां परिचयो दत्त:।

(६) फिलाडेल्फियायां षष्ठं विश्व संस्कृत-सम्मेलनम्

संयुक्तराष्ट्रामेरिकायां फिलाडेल्फिया-नगरे पेनसिल्वानिया विश्व-विद्यालये १३-२० अक्तूबर १९८४ तारिकासु षष्ठं विश्वसंस्कृतसम्लनं समायोज्यते यत्र नानादेशागतैर्विद्वद्भि: शोधपत्राणि प्रस्तोष्यन्ते।

अधिवेशनदिनेषु 'शारदा' नाम पाक्षिकी पत्रिका दैनिकरूपेण फिलाडेल्फियायां प्रकाशयिष्यते इति तत्सम्पादकप्रवरेण पं० वसन्त अनन्त गाडगील-महाभागेन संकल्पितम्। नूनमयमुदन्त: प्रीतिकर: सुरगवीसमुपासकानाम्।

षष्ठविश्वसंस्कृतसम्मेलनस्य 'संस्कृतम् . आधुनिकभारतीयार्यभाषाश्चे' त्यष्टमे प्रभागे कॅम्ब्रिजविश्वविद्यालयस्य प्राच्यविद्यासङ्कायस्याचार्याणां डा० आर०एस० मैकग्रेगर-महाभागानामाध्यक्ष्ये अर्वाचीनसंस्कृतस्य प्रधान-सम्पादको डा० रमाकान्त शुक्ल: १५.१०.१९८४ ई० तारिकायां 'संस्कृते हिन्द्या: शैलीगत: प्रभाव: (The Stylistic Impact of Hindi on Sanskrit) इति विषयमवलम्ब्य शोधपत्रं प्रस्तौति।

भारतात् डा० रामकरण शर्म डा० मण्डन मिश्र - डा० विद्यानिवास मिश्र - डा० रेवाप्रसाद द्विवेदि - डा० शिवशेखर मिश्र - डा० रसिकविहारी जोशी - डा० मुहम्मद इसराइल खान - डा० जानकी—प्रो० लद्दू - डा० रामचन्द्र द्विवेदिप्रभृतयो नैके विद्वांसोऽस्य सम्मेलनस्य स्वोपस्थित्या विचारप्रस्तुत्या च गौरवं वर्धयन्ति। सम्मेलनस्य संयोजकत्वेन

पेनसिल्वानियाविश्वविद्यालयस्य दक्षिणैशियाक्षेत्रीयाध्ययन - विभागाध्यक्षः प्रोफेसर अर्नेस्टबेण्डर महाभागः संयोजनश्रमाय वर्धाप्यते ।

(७) उज्जयिन्यां कालिदाससमारोहः

४-१०.११.१९८४ ई० तारिकासु उज्जयिन्यां कालिदासजयन्ती-समारोहः सम्पत्स्यते यस्योदघाटनं भारतस्य महामहिमराष्ट्रपतिना श्री ज्ञानी जैलसिंह-महाभागेन करिष्यते । अस्मिन्नवसरे नाट्यप्रदर्शनं, अन्ताराष्ट्रियनाट्यसंगोष्ठी शास्त्रविचारपरिषद, विविधाः सङ्गीतप्रस्तुतयश्च सम्पत्स्यन्ते ।

(रमा शुक्ला)

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)



१	प्रकाशन का स्थान	नयी दिल्ली
२.	प्रकाशन की आवधिकता	त्रैमासिक
३.	मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) ६, वाणी-विहार, नयी दिल्ली ११००५९
४.	सम्पादक का नाम, राष्ट्रीयता तथा पता	डा० रमाकान्त शुक्ल भारतीय ६, वाणी-विहार, नयी दिल्ली-११००५९
५.	उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं।	देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

देववाणी-परिषदा प्रकाशिता: ग्रन्था:



